


परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

# सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

## जिनवाणी-महोत्सव

# सहस्रग्रन्थसंग्रह

* जन्मदिवस 19–03–1971 * मुनिदीक्षा–11–05–1989 * आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणा:–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)


# जैनेन्द्र-लघुवृत्ति

ग्रन्थकर्त्ता
परम पूज्य आचार्यश्री पूज्यपाद जी महाराज

वृत्तिकार
राजकुमार जी शास्त्री

मुद्रक
विद्याविलास मुद्रणालय, काशी (उत्तरप्रदेश)

(परम्परानायक)




परम पूज्य चारित्र–चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)



परम पूज्य तीर्थभक्त–शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)



परम पूज्य सिद्धान्त–चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)



परम पूज्य तपश्चर्या–चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्राय: होता है। फलत: उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तुत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि–परिवार

# भूमिका।

अयि, अगणितगुणपयः पारावाराः, विद्याविनोद रसिकाः विदितमेव निखिलशास्त्राणां मध्ये शब्दशास्त्रमेवगुरो वर्त्ति, तस्यदुरधिगमतया तज्ज्ञानार्थमा चार्यवर्य्य श्रीगुणन न्दिभि र्व्युत्पित्सुजनोपचिकीर्षया जैनेन्द्रप्रक्रिया विरचिता। सात्व तिकर्कशवृत्तिभिर्ग्रथ्य मानतया मन्दमतीनां सुखबो धायन-प्राभूदिति तेषान्दयमानैः र्मान्यपण्डितवरैर्वंशी धरमहाशयैः काचनजैनेन्द्रप्रक्रिया ख्योग्रन्थो व्यरचि। तस्याअप्यतिगहनतया ऽतिविपुलतयाच व्युत्पित्सूनां सुकुमारमतीनाम्म नोरञ्जनी न-जाता। अतस्तेषां प्रथम परीक्षार्थमु पस्थानुमिच्छूनां सुकुमा-रमतीनामु पकाराय लघुकौमुदीसरणिमनुसृत्यैव महता श्रमे-णजैनेन्द्र महावृत्ति ग्रन्थादाकृष्यैतजैनेन्द्रलघुवृत्याख्यग्रन्थम-तिलघुभूतं व्यरच्चयम्। अस्याश्च टिप्पणीङ्का शिक स्याद्वाद संस्कृत पाठशालायां व्याकरणाध्यापक पण्डित वेणीमाधव-मिश्रशर्मभिस्तथा पण्डित सुब्रह्मण्यशास्त्रिभिश्चनिर्माप्य पतयो संवलिताञ्चेयङ्का शीस्थ चौखम्बा संस्कृत मुद्रणागाराधिपति बाबूश्रीजयकृष्णदास हरिदास गुप्त महोदयस्यहस्ते मुद्रापयितु मर्पिता। तत्रचकार्य बाहुल्यवशादि यताकालेनैव ग्रन्थमपिपू र्णता मापादितेति तस्योपकृतिम्मु हुः स्मरामि। भूशंसम नुक-म्पितश्चास्मिपण्डित वरसुब्रह्मण्यशास्त्रिभि र्येनात्मनोऽमूल्यस-

मयदानेन बहुशः स्थलविशेषेषु निजकृपादृष्ट्येयं समालोकिता संशोधिताचेति। तावतापि सीसकाक्षरयोजक दोषेण मदीय दृष्टिदोषेणचोपनता असन्निवेशिताश्च शुद्धिपत्रेप्यशुद्धयः क्वचित्कदाचित्सम्भाव्यन्तएवेति तदर्थं साञ्जलिबन्धं विपश्चितोऽनुनयामि। यद्येनाममत्सराः सहृदयवरा निजकृपादृष्ट्याकृतार्थयेयु स्संशोध्यच मामपि प्रबोधयेयु स्तदात्मात्मानं सफलोद्योगं मन्ये। प्रयतिष्येचास्याः पुनर्मुद्रणसमये यथा दर्शिताशुद्ध्यपाकरणाय। सम्भावयामि चेदानीमियञ्छात्राणां मतीव मनोरञ्जनी भूत्वा ममपरिश्रमं सफलीकरिष्यति, छात्राऽपि एतस्याः पठनपाठनादि व्यवहारेण सुखेन जैनेन्द्रव्याकरणमहार्णवं समुत्तीर्य चिरञ्जणा भवेयुरि त्याशासे। सकलकल्याण हेतुर्वीर रागोऽपिममपरिश्रमं सफलीकरोत्वित्यभ्यर्थये। इत्यलमतिपल्लवितेन।

फाल्गुन
शुक्लद्वितीया
वीरनिर्वाण
संवत् २४४९

ग्रन्थकर्ता-विद्वज्जनकृपाभिलाषुकः
पण्डित श्रीराजकुमार शास्त्री।
प्रधानधर्माध्यापकः वाग्वरप्रान्तीय-
दि० जैनपाठशाला जिला बांसवाड़ा।

# जैनेन्द्रलघुवृत्ति विषयानुक्रमः ।


| विषयाः | | | | पृष्ठाङ्कः |
|---|---|---|---|---|
| १ | संज्ञाप्रकरणम् | ... | ... | २ |
| २ | अच्सन्धिप्रकरणम् | ... | ... | ५ |
| ३ | प्रकृतिसन्धिप्रकरणम् | ... | ... | १० |
| ४ | हल्सन्धिप्रकरणम् | ... | ... | १३ |
| ५ | विसर्गसन्धिप्रकरणम् | ... | ... | १७ |
| ६ | स्वादिसन्धिप्रकरणम् | ... | ... | १७ |
| ७ | अजन्तपुंलिङ्गप्रकरणम् | ... | ... | १९ |
| ८ | अजन्तस्त्रीलिङ्गप्रकरणम् | ... | ... | २९ |
| ९ | अजन्तनपुंसकलिङ्गप्रकरणम् | | ... | ३१ |
| १० | हलन्तपुंलिङ्गप्रकरणम् | ... | ... | ३३ |
| ११ | हलन्तस्त्रीलिङ्गप्रकरणम् | ... | ... | ४४ |
| १२ | हलन्तनपुंसकलिङ्गप्रकरणम् | | ... | ४५ |
| १३ | झिसंज्ञकप्रकरणम् | ... | ... | ४६ |
| १४ | मिङन्तभ्वादिप्रकरणम् | ... | ... | ४८ |
| १५ | मिङन्तादादिप्रकरणम् | ... | ... | ६९ |
| १६ | मिङन्तजुहोत्यादिप्रकरणम् | ... | ... | ७७ |
| १७ | मिङन्तदिवादिप्रकरणम् | ... | ... | ८० |
| ८१ | मिङन्तस्वादिप्रकरणम् | ... | ... | ८४ |

॥ ॐ ॥

# नमोऽनेकान्ताय ।

स्वर्गीय पूज्य सिंघई चतुर्भुजाख्यस्य पितुः स्मरणार्थं
श्रीमद्देवनन्द्याचार्य विरचित जैनेन्द्रव्याकरणस्य
श्रीमदभयनन्दिकृत महावृत्ति माश्रित्य
धर्मशास्त्रिपदोपाहितेन पण्डित श्री
राजकुमारेण विरचिता ।

# जैनेन्द्रलघुवृत्तिः ।

काशीस्थ श्रीस्याद्वाद महाविद्यालयाध्यापकेन
पण्डित सुब्रह्मण्यशास्त्रिणा टिप्पण्यादि
शोधन पुरस्कारेणसुपरिष्कृता ।


इयंच
पं० गुलाबचन्द्रेण तथा सागरान्तर्गत गौरझामर निवा-
सिना चौधरी महेन्द्रकुमारेणच काशीस्थ बाबूश्री-
जयकृष्णदास-हरिदास-गुप्त महोदयानां
विद्याविलास मुद्रणालये मुद्रापयि-
त्वा प्रकाशिता ।

वीरनिर्वाण संवत् २४[illegible] । ख्रीष्टाब्दः १९२४ ।

प्रथमावृत्तिः १००० ] [ मूल्यमेकरूप्यकम् ।

॥ ॐ नमः श्रीपूज्यपादाय ॥

# ॥ जैनेन्द्रलघुवृत्तिः ॥

## ॥ अथ संज्ञाप्रकरणम् ॥

१लक्ष्मीरात्यन्तिकी यस्य निरवद्यावभासते ।
२देवनन्दितपूजेशे नमस्तस्मै स्वयम्भुवे ॥ १ ॥
नत्वा सरस्वतीं देवीं शुद्धां साध्वीं करोम्यहम् ।
देवनन्दप्रवेशाय जैनेन्द्रलघुवृत्ति[३]काम् ॥ २ ॥

अइउण् १ । ऋलृक् २ । एओङ् ३ । ऐऔच् ४ । हयवरट् ५ । लण् ६ । ञमङणन

---

गुरुं गां पितरौ नत्वा वेणीमाधवशर्म्मणा ।
जैनेन्द्रलघुवृत्तेर्हि क्रियते टिप्पणी मुदा ॥ १ ॥

१ लक्ष्मीः श्रीः सैव विशिष्यतेऽन्तमतिक्रान्तः कालोऽन्त्यः तत्र भवा आत्यन्तिकी अविनश्वरी आत्मस्वभावाधीना केवलज्ञानादिविभूतिरित्यर्थः । अवद्यात् गर्ह्यान्निष्क्रान्ता निरवद्या निर्दोषा अवभासते शोभते । यस्य भगवतः । यस्येति सर्वनामपदस्य सामान्यवाचित्वेऽपि अन्यस्यैवंविधा श्रीर्न सम्भवतीति पारिशेष्यादर्हद्भट्टारकस्य ग्रहणमिति दिक् । २ देवाः सुराः तैर्नन्दिता अभिनन्दिता सा चासौ पूजा च तस्या ईट् ईष्टे इति ईट् क्विपि चतुर्थी । ३ स्वार्थे कप्रत्ययः । ४ अर्हस ।

ग् ७ । ऊभञ् ८ । घढधष् ९ । जबगडदश् १० खफछठथचटतव् ११ । कपय् १२ । शषसर् १३ । [1]हल् १४ । इति प्रत्याहारसूत्राणि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्सूत्रे अकार इत् ।

[2]कार्यार्थोऽ[3]प्रयोगीत् १ । २ । ३ ॥ शास्त्रेऽन्यस्य कार्यार्थमाश्रीयते प्रयोगे च न श्रूयते यः स इत्संज्ञो भवति । अन्वर्था चेयमित्संज्ञा । एति गच्छति नश्यतीतीत्वात् इत्यनेनैव तस्य नाशसम्भवात् शास्त्रान्तरेण खं विधानं व्यर्थम् । इति ण्वादीनामित्संज्ञा ॥

नाशः [4]खम् १ । १ । ६१ ॥ प्रसक्तस्य नाशः खसंज्ञो भवति [ यस्येत्संज्ञा तस्य खम् ] ॥

अन्त्येनेतादि १ । १ । ७२ ॥ अन्त्येनेत्संज्ञकेन गृह्यमाण [6]आदिस्तन्मध्यपतितानामात्मना सह ग्राहको भवति । यथा अणिति अइउवर्णानां संज्ञा ॥

आकालोऽच् प्रदीपः १ । १ । ११ ॥ अ आ आ३ इत्येवं काल इव कालो यस्य सोऽच् यथासंख्यं प्रदीप

---

१ अक्षुजन् । २ कार्यार्थ इति किम् । कुलान्यः कुलीनः । ३ अप्रयोगीतीति किम् । परमकुलीनः । ४ इण् धोः क्विप् । ५ आदिनो नाशस्य संज्ञित्वं संज्ञाऽपि भाविनीति नेतरेतराश्रयदोषः । ६ आद्यन्ताभ्यामवयवाभ्यामवयविसमुदाय आक्षिप्यत इत्यलम् ।

इत्येवं संज्ञो भवति । स प्रत्येकमुदात्तानुदात्तस्वरितभेदेन त्रिधा

**उच्चनीचावुदात्तानुदात्तौ । १ । १ । १३ ॥** ताल्वादिस्थान ऊर्ध्वभागनिष्पन्न उदात्तसंज्ञो भवति । नीचभागनिष्पन्नोऽनुदात्तः ॥

**व्यामिश्रः स्वरितः १ । १ । १४ ॥** उच्चनीचगुणव्यामिश्रोऽच् स्वरितसंज्ञो भवति । स नवविधोऽपि ङसंज्ञोऽङसंज्ञक इति द्विविधः ॥

**नासिक्यो ङः १ । १ । ४ ॥** नासिकायां भवो वर्णो ङसंज्ञो भवति । तदेवम् अ इ उ ऋ ऌ एषां प्रत्येकमष्टादश भेदाः । सन्ध्यक्षराणां ह्रस्वा न सन्ति, अतस्तानि द्वादश प्रभेदानि ॥

**[1]संस्थानमित्यं स्वम् १ । १ । २ ॥** ताल्वादिस्थानमाभ्यन्तरक्रिया च यदीये यदीयाभ्यां तुल्ये तन्मिथः स्वसंज्ञं भवति । रेफोष्मणां स्वा न सन्ति । ऋकारऌकारयोः स्वसंज्ञा वक्तव्या । अकुहविसर्जनीयाः कण्ठ्याः । जिह्वामूलीयो जिह्व्यः । इचुयशैस्तालव्याः । उपूपध्मानीयाः । लृतुलसा दन्त्याः । नासिक्योऽनुस्वारः । इति स्थानानि ॥ क्रिया=यत्न । स द्विधा आभ्यन्तरो बाह्यश्च । आद्यश्चतुर्धा—स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतभेदात् । तत्र स्पृष्टकरणा वर्गाः । ईषत्स्पृष्टकरणा अन्तस्थाः । ईषद्विवृतकरणा ऊष्माणः । विवृतकरणाः स्वराः । संवृतकरणं पञ्चमवर्णस्येत्येके । बाह्यश्चाष्टविधः । विवारः संवारः श्वासो नादो

---

१ स्थानग्रहणात् तथा, क्रियाग्रहणाच्च अवश्यमेतदीयमावेशः ।

घोषोऽघोषोऽल्पप्राणो महाप्राण इति भेदात् । वर्गाणां प्रथमद्वितीयाः शषसा विसर्गश्चैषां श्वासोऽघोषो विवारश्च । वर्गाणां तृतीयचतुर्थपञ्चमा हकारो यणश्चैषां संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमा यरलवाश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । कवर्गादयः पञ्चवर्गाः । यरलवा अन्तस्थाः । शषसहा ऊष्माणः । अचः स्वराः । अं अः इत्यचः परावनुस्वारविसर्गौ । कखाभ्यां प्रागर्धविसर्गाकारण उपध्मानीयः ।

१अणुदित्स्वस्यात्मनाऽभाव्योऽतपरः १ । १ । ७२ ॥ अणुदिच्च गृह्यमाणः स्वस्य ग्राहको भवत्यात्मना सह, भाव्यमानं तपरं च वर्जयित्वा । इहमण्ग्रहणं परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवं अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । तथा लृकारोऽपि । लृवर्णस्य द्वादश । तस्य दीर्घाभावात् । एचां द्वादशानाम् । यवला द्विधा, नासिक्येतरभेदात् । तेन द्वयोर्द्वयोः संज्ञा ॥

सन्धौ ४ । ३ । ६० ॥ संश्लेषः सन्निकर्षः सन्धिसंज्ञो भवति ।

२हलोऽनन्तराः स्फः १ । १ । ३ । अज्भिरव्यवहिता हलः स्फसंज्ञा भवन्ति ।

(१) अनेनाष्टादशानां संज्ञा भवति तपरनिर्देशेन परणकारेणाणो ग्राह्याः । इदं व्याख्यानं अत्र एवाण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् सिद्धमिति भाष्यम् ।२—तः परो यस्मात्स च तात्परः इति यः सो बोध्यः तेन विश्वपाभिरित्यत्र न रमेश इत्यत्र चतुर्मात्रिक ।

३—समुदायवाक्यपरिसमाप्तिराश्रीयते तेन प्रत्येकस्य स्फसंज्ञा न भवति । अनन्तरा किं । पचति । पनसम् ।

सुप्तिङन्तं पदं १ । १ । १०२ । 'सुबन्तं ति-ङन्तं च शब्दरूपं पदसंज्ञं भवति ।

॥ इति संज्ञाप्रकरणम् । १ ॥

## अथाच्संधिः ॥

अचीको यण् ४ । ३ । ६५ ॥ अचि परतः इकः स्थाने यणादेशो भवति सन्धि विषये । सुधी उपास्य इति स्थिते ।

ईष्केऽस्य व्यवधाये पूर्वपरयोः १ । १ । ६० ॥ ईषा यत्र निर्दिश्यते तत्र पूर्वस्याऽव्यवहितस्य कार्यं भवति ।

स्थानेऽन्तरतमः १ । १ । ४७ ॥ स्थाने प्राप्यमाणानामन्तरतम एवादेशो भवति । अन्तरः प्रत्यासन्नः । यत्रानेकविधमान्तर्यं तत्र स्थानकृतमेवान्तर्यं बलीयः । सुध्य् उपास्य इति जाते ।

अनचि ५।४।१२७॥ अत्र उत्तरस्य यरो विभाषया द्वे भवतोऽचि तु न । इति धकारस्य द्वित्वे सुध् ध् य् उपास्य इति जाते।

---

१—त्यग्रहणे यस्मात् स विहितस्तदादेस्तदन्तग्रहणमिष्यतेनैव तदन्तलाभे अन्तग्रहणात् संज्ञाविधौ त्यग्रहणे तदन्तविधिर्नास्तीति ज्ञापनात् तेन सध्योरणादं घश्चणादभि व्रिसंज्ञाऽभावो बोध्यः ।

२—प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरू
तेन त्रो इत्यादीनामपि यण् सिद्धिः । ३—व्यव
स्य पूर्वस्य परस्य वा प्राप्तः अव्यवहितस्यैव

झलां जश् झशि ५ । ४ । १२८ ॥ झलां वर्णानां जशादेशो भवति झशि परतः । इति पूर्वधकारस्य दकारः ।

स्कान्तस्य खम् १ । १ । ६१ ॥ स्कान्तस्य पदस्य खं भवति ।

अन्तेऽलः १ । १ । ४९ ॥ तन्निर्दिष्टस्य यो विधिरुच्यते सोऽन्ते वर्तमानस्यालः स्थाने भवति । इति यकारस्य खंप्रासम् । असिद्धं बहिरङ्गमन्तरङ्गे । अन्तरङ्गे खे कर्तव्ये बहिरङ्गं यणसिद्धं भवतीति खम भवति । सुद्ध्युपास्यः । सुध्युपास्यः । मद्ध्वरयः । मध्वरयः । पित्रर्थः । लाकृतिः ।

एचोऽयवायावः ४ । ३ । ६६ ॥ एचः क्रमादय् अव् आय् आव् एते स्युरचि ।

यथासंख्यं समाः १ । २ । ४ ॥ समाः शिष्यमाणाः यथासंख्यं भवन्ति । चयनम् । लवनम् । चायकः । पावकः ।

यि त्ये ४।३।६७। [1]यकारादौ त्ये परे ओदौतोरव् आव् एतौ स्तः । गव्यं । नाव्यं । गोयूताध्वपरिमाणे च गव्यूतिः ॥

अदेङेप् १। १ । १६ । अदेङो वर्णाः एप् संज्ञा भवन्तिः । तात्परं च तत्पूर्वं च स्वं न गृह्णाति ।

आदेप् ४ । ३ । ७५ अवर्णान्तादचि परतः पूर्वपरयोरेप् च भवति । देवेन्द्रः । गन्धोदकम् । लणो लकारस्या-

* प्रश्लेषनिर्देशात् प्रत्याहारग्रहणम् ।

---

[1] विधिस्तदाद्यादल् ग्रहण इति परिभाषया

उरण्रपरः । १ । १ । ५१ । ऋकारलृकारयोः स्थाने (?) संज्ञेत्युक्तं ऋवर्णस्य स्थाने अण् शिष्य [1]माणोरन्तो भवति । तवर्द्धिः । तवल्कारः ।

ऋतो रं वा ५ । ४ । ५ । ऋकारलृकारयोरशि परतो वा रं भवति ।

पूर्वत्रासिद्धम् । ८ । २ । १ । सार्द्धद्विपादचतुरध्याये कर्तव्ये परं [2]शास्त्रं सार्द्धपादमसिद्धं भवति । इत उत्तरं च पूर्वस्मिन् योगे कर्तव्ये परो योगोऽसिद्धो भवति । न इह । अस्मा उद्धरति ।

आदैगैप् । १ । १ । ४५ । आदैचो वर्णा [3]घैप् संज्ञा भवन्ति ।

एच्यैप् ४ । ३ । ७६ । आदेचि परे द्वयोरेक ऐप्भवति । पवपयादः । त्रिनैश्वर्यम् ।

---

१—अणिति किं मातापितरौ उदितीकि गेयं ।
२—पूर्वपदेनात्र परपदस्यात्लोपो ज्ञेयः ३—कार्यासिद्धत्वे तु मनोरथः । अमू इत्यादीनामसिद्धिः, अत उक्तं शास्त्रमिति ।

४ प्रत्येकवाक्यपरिसमाप्तिराश्रीयते, प्रत्येकमादैचां वर्णाना मैपित्येषा संज्ञा भवति, पारिशेष्यात्संज्ञासंज्ञि सम्बन्धो ज्ञायते । इयमपरा संज्ञा आदैचामैपा भावितानामतद्भावितानाञ्च सामान्येन संज्ञा तद्भावितानामुदाहरणम् । नाडायनः । अतद्भावितानाम् । मालामयम् । तादृपि परस्तपरस्तेन महौषधिरित्यादिषु त्रिमात्रचतुर्मात्राणां निवृत्तिः ।

**एत्येधत्यूठसु** । ४ । ३ । ७७ । एजादौ एति एधत्यूठि च परतोऽवर्णान्तादैप्[1] भवति । उपैति । उपैधते । विश्वौहः । एजादौ किम् । उपेतः । माभवान्प्रेदिधत् । **अक्षाद् हिन्यामैप्वक्तव्यः** अक्षौहिणी सेना । **प्रादूहोढोढ्यैषैष्येषु** प्रौहः । प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः । **ऋते भासे** सुखेन ऋतः सुखार्तः । भेति किम् परमर्तः । स इति किम् । सुखेनर्तः **ऋणदशप्रवत्सतरकम्बलवसनानामृणे** ऋणार्णम् । दशार्णम् । इत्यादि ।

**क्रियायोगे गिः** १ । २ । १२९ ॥ क्रियायोगे प्रादयो गि संज्ञा भवन्ति । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप एते प्रादयः ।

**भूवादयो धुः** १ । २ । १ । अर्थोपलक्षिताम् इत्येवमादयो धुसंज्ञा भवन्ति ॥

**धातूलि गेः** ४ । ३ । ७९ । अवर्णान्ताद्गे ऋकारादौ धौ द्वयोरेकः ऐप् भवति । प्रार्ध्नोति । उपार्ध्नोति ।

**एङि पररूपम्** ४ । ३ । ८१ । अवर्णान्ताद्गेरेङादौ धौ पररूपमेकादेशो भवति । उपेलयति । उपोषति ॥

**अन्त्यादचष्टिः** । १ । १ । ६५ । अचां योऽन्त्योऽच् तदादिशब्दरूपं टिसंज्ञं भवति । **शकन्ध्वादिषु[2] पररूपम्** वक्तव्यं टेः । शकन्धुः । कर्कन्धुः । मनीषा ।

---

१ अत्र विषयसप्तमी । २ व्यपदेशिवद्भावेनात्र टिः ।

ओमाङोः ४ । ३ । ८२ । अवर्णान्तादोमाङि स्थैतयो परतः पररूपं भवति । तदौकारः । अद्य आ ऊढा ।

१तद्वत् । ४ । ३ । ७५ । तयोरिव तद्वत् । तयोः पूर्वपरयोः यत्कार्यं तत्कृतेऽप्येकादेशे यथा स्यात् । अद्योढा ।

सवेऽकोदीर्घः ४ । ३ । ८८ अकः सवेऽचिपरे पूर्वपरयोरेको दीर्घो भवति । लोकाग्रम् । कवीन्द्रः । मधूदकम् । पितृषभः ।

एङोऽति २पदान्तात् ४ । ३ । ९६ । एङः पदान्तादति परतो द्वयोरेकः पूर्वो भवति मुनेऽनघ । साधोऽनघ ।

मयोञोऽस्वगुणः ५ । ४ । १५ । मयः परस्योञो वो वा भवत्यचि परे । शमु अत्र । शम्वत्र ।

चेकोऽसेऽस्वे प्रः ४ ३ । १०४। इकः असवेऽचि परतः प्रो वाभवत्यसे परे । कुमारि अत्र । कुमार्यत्र । दधि अत्र दध्यत्र । प्रादेश सामर्थ्यादत्र यण् न भवति । सविधौ च न स्वयि कुमार्यंश । अस्य इति किं । वृधोदम् ॥

अचो रहाद्वे ५ । ४ । १२६ । अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः गिर्य्यारोहणम् ।

ऋत्यकः ४ । ३ । १०५ । ऋकारे परतोऽकः प्रादेशो वा भवति । महऋषिः । महर्षिः ।

शित्सर्वस्य १ । १ । ५२ । शिदादेशः सर्वस्य स्थाने वेदितव्यः ।

---

१—वर्णमात्रश्रुति धर्मानतिदेशोऽनेन बोध्यते तेन मालाभि रित्यत्र न । २—पदान्तात् किम् । भो अति भवति

ङित् १ । १ । ५० । ङित्य आदेशोऽनेकाल् सोऽन्तेलः स्थाने भवति ।

गोरिन्द्रेऽवङ् ४ । ३ । १०१ गोरन्तस्येन्द्रस्थेऽचि परतो ऽवङादेशो भवति । गवेन्द्रः ।

विभाषाऽन्यत्र ४ । ३ । १०२ इन्द्रशब्दादन्यत्र शब्दे योऽच् तस्मिन् विभाषया गोरवङादेशो भवति । गवाश्वम् । गोऽश्वम् । विभाषाग्रहणादिह नित्यं भवति । गवाक्षः ।

छे ४ । ३ । १४१ । छकारे परतः ह्रस्य तुग्भवतिः । देवच्छत्रं ।

वा पदस्य ४ । ३ । १४। धन्तस्य पदस्य छे वा तुग्भवति । कुवलीच्छाया । कुवली छाया ।

इत्यच् सन्धिः ।

## अथ प्रकृतिभावः ।

दूराद्धूते ५ । ३ । ९२ ।। दूरादाह्वाने वर्तमानस्य वाक्यस्य टेः पो वा भवति । आगच्छ भो देवदत्त ३ ॥

ईदूदेद्द्विर्दिः । १ । १ । २०॥ ईदूदेदित्येवमन्तो यो द्विः स दिसंज्ञो भवति । अग्नी इति । वायू इति । मणीवादिषु नेष्यते । मणीव ।

मः । १ । १ । २१ ॥ मकारस्य स्थाने यो मकारस्तस्मात्परावीदूतौ १ दिसंज्ञौ भवतः । अमी अत्र । अमू आसाते ॥

मकारात्परस्यैकारस्यासम्भवादेदित्यस्य निवृत्तिः । एतदारम्भसामर्थ्याच्च मकारादीनां सिद्धिः ॥

चादिरसत्त्वे । १ । २ । १२७ ॥ अद्रव्यार्थाश्चादयो निसंज्ञा भवन्ति ॥

प्रादिः ४ । २ । १२८ ॥ प्रादयो निसंज्ञा भवन्त्य[1]सत्त्वे ॥

निरेकाजनाङ् १ । १ । २२ ॥ आङ्वर्जितो निसंज्ञा [2]एकाज् द्विसंज्ञो भवति । अ—अपेहि । इ इन्द्रं पश्य । उ-अपसर [3]ईषदर्थक्रियायोगमर्यादाभिविधौ च यः । ... आ एवं नु मन्यसे । आ एवं किलतत् ॥

ओत् १ । १ । २३ ॥ ओदन्तो निर्दिसंज्ञो भवति ॥ अहो इति ।

सौ वेतौ १ । १ । २४॥ सि निमित्तो य ओकारस्तदन्त इतौ परतः वा द्विसंज्ञो भवति ॥ साधो इति। साधविति ॥

एङोऽति पदान्तात् ४ । ३ । ८६ । एङन्तस्य गोरति वा प्रकृतिभावः पदान्ते । गो अग्रम् गोऽग्रम् । एङन्तस्य किम् । [4]चित्रग्वग्रम् । पदान्ते किम् । गोः ॥

॥ इति प्रकृति भावः ॥

---

१ असत्त्व इति किं विप्रः । २ एकश्चासौ अच्च एकाच् इति यः सः वेसे तु प्राश्नाति इत्यत्र दोषः ॥

३ ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥
एतस्य उदाहरणानि महावृत्तौ द्रष्टव्यानि ॥

४ स्थानिवत्त्वेनाश गोत्वम् ।

# अथ हल्सन्धिः ॥

**स्तोः[1] श्चुना श्चुः ५।४।११८॥** सकारतवर्गयोः शकारचवर्गाभ्यां योगे [2]शकारचवर्गौ भवतः। जिनालयश्शोभते। धन्यश्चिनोति। तरञ्चिश्छिनत्ति। भवाञ्झकारयति।

**शात् ५।४।११९।** शकारात्परस्य तवर्गस्य चवर्गो न भवति। प्रश्नः।

**ष्टुना ष्टुः ५।४।१२०।** सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः। कष्षण्ड। अश्वट्टीकते। पेष्टा। वृहट्टक्कः।

**पदस्य टोर्नाम्नवतिनगरी ५।४।१२१।** पदस्य टोः परेषां नाम्नवतिनगरीणामेव ष्टुत्वं भवति। षण्णाम्। षण्णवतिः। षण्णगरी। **पदान्तट्टोः परस्य नान्यस्येति नियमार्थः** तस्यामूलिट् तरति। षट् सन्तः। पदान्तात् किम्। ईट्टे। टोः किम्। सर्पिष्टमम्।

---

१ श्चाविति सिद्धे श्चुनेति निर्देशः शादिति प्रतिषेधश्च ज्ञापकः परेण पूर्वेण च श्चुनायोगे श्चुत्वमिति तेन राज्ञेत्यादिसिद्धिः।

२ निमित्तकार्यिणोर्नैयथासंख्यं शादिति ज्ञापकात्। सौत्रत्वात् पुंस्त्वम्। एवमग्रेऽपि।

योगः संयोगः तेन चितमित्यादौ न दोषः। अत्र पदस्येत्यधिकृतमपि न सम्बध्यते। शादिति ज्ञापकात्। तेन याञ्चा सिद्धा।

न तोऽषि ५ । ४ । १२२ । तवर्गस्य षकारे यदुक्तं तन्न भवति । तीर्थकृत्षोडशः ।

झलां जश् ५ । ३ । ३७ पदान्ते वर्तमानस्य झलां जश् भवति । वागीशः ।

यरो ङो विभाषाङे ५ । ४ । १२५ । यरः पदान्तस्य विभाषयाङादेशो भवति ङे परतः । सुवाङ्नयति । सुवाग्नयति । ह्ये नित्यं भवति । त्वङ्मयम् ।

तोर्लि ५ । ४ । १२४ । तवर्गस्य लकारे परतः परस्वं भवति तडिल्लोखा । भवाल्लोकेशः ।

स्थास्तम्भोः [2]पूर्वस्योदः ५ । ४ । १२३ उदः परयोः स्थास्तम्भोः पूर्वस्वं भवति ।

परस्यादेः । १ । १ । ५१ ॥ परस्य क्रियमाणं कार्यं शिष्यमाणमादेरलः स्थाने वेदितव्यम् । इति सस्य थः ।

झरो झरि स्वे ५ । ४ । १३६ ॥ हल उत्तरस्य झरो स्वे झरि परतः खं भवति ।

खरि ५ । १ । १३ ॥ झलां चर् भवति खरि परे । इत्युदो दस्य तः । उत्थानम् । उत्तम्भितव्यम् ।

झयो हः ५ । ४ । १३८ ॥ झयः पदान्तादुत्तरस्य हकारस्य पूर्वस्वं वा भवति । महाप्राणस्योष्मणः स्थाने तादृश

---

१ पदान्तस्येति किम् । वेद्मि । यत्नाति ।

२ परस्वनिवृत्त्यर्थं पूर्वस्येति । अत्र योगविभागस्तेन स्कन्देरपि रोगो पूर्वस्वम् उत्कन्दो नाम रोगः ।

एव पूर्वचतुर्थो भवति । सुशाग्घसति । सुशाग्हसति ।

**शश्छोऽटि ५ । ४ । १३७ ॥** झयः पदान्तादुत्तरस्य शस्याटि परतः छकारो भवति । धर्मभिद् शेत इत्यत्र दस्य श्चुत्वेन जकारे कृते खरीति जकारस्य चकारः । धर्मविच्छेते । धर्मविच्शेते । केचित्—*शश्छोमीति पठन्ति । तच्छ्लाघनम् । तच्श्लाघनम् ।

**मोऽनुस्वारः ५ । ४ । ७ ॥** मकारान्त पदस्यानुस्वारो भवति १हलि । व्रतं रक्षति ।

**२नश्चापदान्तस्य झलि५ । ४ । ८।** नकारस्य मकारस्य चापदान्तस्यानुस्वारो भवति झलि परतः । तितं सति । गिंस्ते । झलीति किम् । राजन्यः ।

**ययनुस्वारस्य परस्वम् ५।४।१३२ ॥** ययि परतोऽनुस्वारस्य परस्वं भवति । शङ्कितः । अञ्चितः ।

**वा पदान्तस्य ५ । ४ । १३३ ॥** पदान्तस्यानुस्वारस्य वा परस्वं भवति । शुकङ्करोषि । शुकं करोषि ।

**म्राट् ५।४ ६ ॥** सम्राडिति निपात्यते । क्विबन्ते राजतौ परतः । सम्राट् ।

**हिम्परे वा ५ । ४ । १० ॥** हकारे ३मपरे परतो मकारस्य वाऽनुस्वारो भवति । कथंह्मलयति । कथम्ह्मलयति ।

---

१ हलीति सूत्राद्धलीत्यस्यानुवृत्तिः । हलीति किम् । जिनमाश्रय । २ चेन मोऽनुकृष्यते ॥ अपदान्तस्य किं । राजन् पाहि ।

३ मः परो यस्मात् स मपर इति यः सो ग्राह्यः ।

यवल परे हकारे वा यवला भवन्ति कियँ ह्यः । किं ह्यः । किवँ ह्वलयति । किं ह्वलयति । किलँ ह्लादयति । किं ह्लादयति ।

**न परे नः ५ । ४ । ११ ॥** न परे हकारे परतो मस्य नो वा स्यात् । किं ह्नुते । किन्ह्नुते ।

**ङ्णोः धुट् सोऽश्च ५ । ४ । १३ ॥** ङकारान्तान्नकारान्ताच्च परस्य सकारस्य श्चावयव वर्जितस्य वा धुडागमो भवति ।

**टिदादिः १ । १ । ५३ ।** टित् यः स यन्निर्दिष्टस्यादिर्भवति ।

**किदन्तः १ । १ । ५४ ।** कित् यः स तन्निर्दिष्टस्यान्तो भवति । मधुलिट्त्सीदति । मधुलिट्सीदति । महान्त्साधुः । महान्साधुः ।

**ङ्णोः कुक्टुक्शरि ५ । ४ । १२ ॥** ङकारणकारयोः कुक्टुगागमौ स्तः शरि । प्राङ्क्शेते । प्राङ्शेते सुगण्ट्षष्ठः । सुगण्षष्ठः ।

**नश्छत्तुक् । १४ ॥** पदान्तस्य नस्य शे तुग्वा । भवाञ्छ्शेते । भवाञ्च्शेते । भवाञ्शेते ।

**ङमो नित्यं ङमुट् प्लात् ५ । ४ । १६ ॥** प्लात्परो यो ङम् तदन्तात्परस्याचां नित्यं ङमुट् भवति । कुङ्ङास्ते । सुगण्णीशः । कुर्वन्नास्ते ।

**समः स्कुसि ५ । ४ । ४ ।** समुदकस्य रुक्षः सकारे परे समः सौसुकौ स्तः । सँस्कर्ता । संस्कर्ता ।

---

१ श्चेति किम् । अट् श्चोतसि २ यथा संख्यं समा इति सूत्रेण यथाक्रमं बोध्यं ।

**पुमः खय्यम्परे सीसुक्** ५ । ४ । १ । पुम इत्येतस्य यदन्त्यं पदान्ते वर्तमानस्य [1]अम् परे खयि परतः सीरादेशः सुक्चा- गमः पर्यायेण भवतः । [2]पुँस्कोकिलः । पुंस्कोकिलः ।

**नश्छव्यप्रशान्** ५ । ४ । २ नकारान्तस्य पदस्याम् परे छवि स भवत्यनुस्वारपूर्वः प्रशान्तं वर्जयित्वा । भवांस्तरति ।

**छवि** ५ । ४ । २५ ॥ छवि परतो रेफस्य सकारादेशो भवति । कश्छिनत्ति ।

**नॄनः पि रीरुर्वा** ५ । ४ । ५ ॥ नॄन् शब्दस्य पकारे परे रीरादेशो रुश्वागमः पर्यायेण स्तः । नॄँ ँ पाहि । नॄँः पाहि नॄन्पाहि ।

**ँकँपौ च** ५ । ४ । २२ ॥ कुप्वोः परतः रेफस्य ँक ँपौ च । इत्येतावादेशौ भवतो विसर्जनीयश्च । क ँ करोति । कः करोति । क ँ पचति । कः पचति ।

**परो [3]श्रिः** । ५ । ३ । २ ॥ प्रकृतयोर्द्विरुक्तयोः परोवयवो [4]श्रिसंज्ञको भवति ।

**कस्कादिषु** ५ । ४ । २६ ॥ कस्कादिषु परतः रेफस्य सकारादेशो भवति । कस्कः । कौतस्कुतः ।

**रोऽसुपि**[5] ५ । ३ । ७८ ॥ अहन्नित्यस्य [6]रेफादेशो

१ अम् किम् । पुंवारं । खयि किं । पुंदासः । २ पुमांश्चासौ कोकिलश्च पुंस्कोकिलः । अत्र यः सः । अप्रशान् किं प्रशान्तनोति । ३ नॄनिति द्वितीयान्तानुकरणं पाठ्यन्तम् ।

४ इत एव निर्देशात्पर शब्दोऽवयववाचकः । ५ सुपि किं । अहोभ्याम् । ६ इकारेत्संज्ञाया अभावेनात्र राङ्गोरित्यस्याप्राप्तिः

भवति न तु सुपि। अहरहः। इति हल्सन्धिः।

## अथ विसर्गसन्धिः।

शर्परेखरि ५। ४। २०। शर्परेखरिपरतो रेफान्तस्य विसर्जनीयादेशो भवति। पुरुषः त्सरुकः। क्षुपीत्यस्यायमपवादः॥ शरि सश्च ५। ४। २३। शरि परतो रेफस्य सकारादेशो भवति विसर्जनीयश्च। कः शेते कश्शेते। इण्ः षः ५। ४। २७॥ इण उत्तरस्य सकारस्य षकारादेशो भवति कवर्गपवर्गादौ स्ये परतः। सर्पिष्कल्पम्। इदुदु ङोऽत्यपुम्मुहुसः ५। ४। २८॥ इकारोकारोको रेफस्य षकारोदेशो भवति कुप्वोः परतः त्यपुम्मुहुसो वर्जयित्वा। निष्कृतम्। दुष्कृतम्। शिरोऽधसोः पदे॥५। ४। ३५। एतयो रेफस्य सकारादेशो भवति पदशब्दे परतः। अधस्पदम्। शिरस्पदम्। तिरसो वा ५ तिरसो रेफस्य सिर्वा भवति। तिरस्कृत्य। तिरः कृत्य।

इति विसर्गः सन्धिः।

## अथ स्वादिसन्धिः॥

ससंजुषोरिः ५। ३। ७६ सकारान्तस्य पदस्य सजुषि

---

१ शर्परे खरि=शर्परं इति बहुव्रीहिः। क्षुपीत्यस्यापवादोऽयम्। २ पाशकल्पक काम्येषु षो वक्तव्यः। ३ इदुदिति किम्। गीः करोति। पूः करोति। ४ स इत्येव नेह। अधः पदम्। शिरः पदम्। कस्कादित्वात्सकारः।

स्यैतस्य च रिर्भवति। अस्यापवादः। **रेरे द्रुशोः॥४।३।१००॥** अतः परस्य रेरत्वं भवत्यकारे हशि च परतः। जिनोऽर्च्यः। जिनो वन्द्यः॥ **ओदं ऽपूर्वस्य योऽशि ५।४।४।** आंकारपूर्वस्यावर्णपूर्वस्य च रेर्यकारादेशो भवत्यशि परतः। देवा इह, देवायिह्। अशि किं। देवाः सन्ति॥ **हलि ॥५।४।६॥** य्योर्नित्यं खं भवत्यशि हलि परतः। देवा यान्ति। **रोरि ॥५।४।१८॥** रेफस्य रेफे परतः खं भवति। **खे पूर्वस्याणो दीः ॥४।३।२१६** ढकारस्य रेफस्य च खे सति पूर्वस्याणो दीर्घोभवति। पुना रात्रः। कवी रमते। पटू राजा। धीर भ्यस् इत्यत्र "बहौ भल्येत्" इत्यनेन एत्वं, सुपि इत्यनेन दीर्घ—च प्राप्तम्। प्राप्ते सति **स्पर्द्धे परम् ।१।२।६६॥** द्वयोः प्रसङ्गयोरन्यार्थयोरेकस्मिन् युगपदुपनिपाते स्पर्द्धःसंघर्षः। स्पर्द्धे सति परं कार्यं भवति। इत्येत्वम्। धीरेभ्यः। **हल्येतत्तदोरनञ्सेऽकोः सुखम्॥४।३।१०४॥** अककारयोरेतत्तदो र्हलि परतः सुखं भवति नञ्से तु न। एष ददाति। स तरति। अनञ्सेकिम्।

१ अतीति पर करणं किम्। श्व आगन्ता।

२ आंकार पूर्वस्योदाहरणं। भो देवाः। अघोयाहीत्यादि।

३ अशगो यो हल् तस्मिन् परेय्योर्नित्यं खं भवतीति फलितार्थः। अशीति विशेषणं किम्। वृक्षव् करोति।

४ अकोः कोः किम् एषको देवः।

अनेषो हसति । वाक्येतु भवत्येव । नैष ददाति । इति किमेषोऽत्र ।

## इति स्वादिसन्धिः ।

# अथ सुबन्तप्रक्रिया ।

अर्थवत्[1] । १ । २ । ५ । धुवर्जितमर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं भवति । कृत्तद्धितसमासाश्च । १ । २ । ४६ कृदन्तं तद्धितान्तं समासश्च प्रातिपदिकसंज्ञं भवति । ङ्याप्प्रातिपदिकात् । ४ । १ । १ । प्रत्ययः । ३ । १ । १ । परश्च । ३ । १ । २ । इत्यधिकृत्य[2] स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुप् । ४ । १ । २ ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः । साधने स्वार्थे । १ । २ । १५८ । साधने विवक्षिते एकाद्यर्थे विभक्तयः स्वार्थे भवन्ति । सा समाप्यपरास्तद्धलन्त्यः । १ । २ । १५७ । तस्य विभक्तिशब्दस्य हलोऽन्त्यस्याकारपकारपराः स्तासां विभक्तीनां यथा-संख्यं संज्ञा भवन्ति । यथा सुऔ जसिति वा । अम् औट् शसिति इप् । टाभ्यां भिसिति भा । ङेभ्यां भ्यसिति भ्यप् । ङसिभ्यां भ्यसिति का । ङस् ओस् आमिति ता । ङि ओस् सुपिति ईप् । सुपश्च । १ । २ । १५५ । सुपांत्रिकाण्येकशः एकद्वि बहु वचन संज्ञानि भवन्ति । विरामे विसर्जनीयः । ५ । ४ । १६ वर्णस्यानुच्चारणं विरामः । वि-

1 अधुकिम् । हनधी लेङि, अहन् इत्यादौ न त्वं भाभून् ।

2 अधिकारत्वं च स्वदेशवाक्यार्थं शून्यार्थे सत्युत्तर सूत्रैक वाक्यता एतद्वाक्यार्थ बोधजनकत्वम् ।

रामद्विषये रेफान्तस्य पदस्य विसर्जनीयादेशो भवति । वीरः । **स्वाभाविकत्वादभिधानस्यैकशेषानारम्भः ।१।१।१०।** शब्दाः स्वभावत एकशेषमनपेक्ष्यैवैकत्वद्वित्वबहुत्वेषु वर्तन्त इत्येकशेषानारम्भः । **सुटि पूर्वस्वम् ।४।३।८९।** अकोऽचि सुटि पूर्वस्वो द्वयोरेको दीर्घो भवति । इति दीर्घे प्राप्ते । **नेच्यात् ।४।३।९२।** अवर्णान्तादिचि सुटि पूर्वस्वो दीर्घो न भवति । ऐप् । वीरौ । **विभक्ती ।१।२।१५६।** सुपां त्रीणि २ वचनानि विभक्तिसंज्ञानि भवन्ति । **सम्बोधने बोध्यं ।१।४।५५ ॥** सम्बोधने या या बोध्यमिति संज्ञा भवति । **एकः किं ।१।४।५६।** बोध्यसंज्ञाया या एकवचनं किसंज्ञं भवति । **यस्थे तदादि गुः ।१।२।१०१** यस्थे परतस्तदादि शब्दरूपं गुसंज्ञं भवति । **प्रात् ।४।३।५८।** प्रान्तात्परस्य केरधयस्य नत्वः खं भवति । हे वीर । **पूर्वोऽमि ।४।३।९४** अकोऽमि परतो द्वयोरेकः पूर्वरूपो भवति । वीरम् । **नश्च पुंसि ।४।३।९१** शसि परतः पूर्वस्वो दीर्घो भवति नश्चान्तादेशः पुंसि । **अट्कुप्वाङ्व्यवायेऽपि ।५।४।८६** अट् कु पु आङित्येतैर्व्येकैर्नानैकैर्वा व्यवायेऽव्यवायेऽपि षकाररेफाभ्यामुत्तरस्य नस्य णो भवति । **अन्तस्य ।५।४।११५** पदान्तस्य नस्य णो न भवति । वीरान् । **स्येनात् ङस्टाङसेः ।५।१।१०।** अकारान्ता-

१ अनभिमुखी पुंसो ऽभिमुखीकरणं संबोधनम् । तद्बोधनाय हे भोः प्रभृतयः शब्दाः प्रयुज्यन्ते (२) अकार उच्चारणार्थः ।

ङ्गोः परेषां कुसङसीनां स्य इन आदित्येते आदेशा भवंति । अग्नेए । वीरेण । **सुपि** ५ । २ । ६७ अकारान्तस्य गोर्यञादौ सुपि दीर्घो भवति । वीराभ्याम् । **भिसोऽत ऐस्** ५ । १ । ८ । अकारान्ताद्गोरुत्तरस्य भिस ऐस् भवति । वीरैः । **ङेर्यः** । ५ १ । ११ । गोरकारान्तात्परस्य ङेर्यादेशो भवति । **स्थानिवदा शोनऽल्विधौ** १ । १ । ५६ । आदेशः स्थानीवभवत्यनलाश्रयेषु कार्येषु । इति स्थानिवत्वात् सुपीति दीः । वीराय । **बहौ झ-स्येत्** ५ । २ । ६८ । गोरकारांतस्य झलादौ बहुवचने सुपि एत्वं भवति । वीरेभ्यः । **विरामे वा** ५ । ४ । १३१ । विरामे वर्तमानानां झलां वा चत्वं भवति । **ओसि** ५ । २ । ६ ओसिपरतोऽरकारांतस्य गोरेकादेशो भवति । वीरयोः **प्रेल्म्वाप् चतुरो नुट्** । ५ । १ । ३६ ॥ प्रहलसुंखकेभ्य आम स्ताम्रामोनुडागमो भवति । **नाम्य तिसृचसृ** ४ । ३ । ३ । नामि परतोऽजन्तस्य गोर्दीर्घो भवति, न तिसृचतस्रोः । वीराणाम् । **स्यादेशयोः** ५।४।३६। इणक वर्गाभ्यामुत्तरस्या-देशरूपस्य त्यावयवस्यैव सस्य षादेशः । वीरेषु । एवं धर्मादयः । **सर्वादिः सर्वनाम** १ । १ । ३५ । सर्वादयः शब्दाः प्रत्येकं सर्वनामसंज्ञा भवन्ति । सर्व विश्व । उभ । उभयट् ।

---

१ बहौ किम् । वीरः । झलि किम् । वीराणाम् ।
२ आगमोऽयम् अव्यर्थोद्दिरिति तद्गुणा संविधानो बहुव्रिहिरियम् । प्रयोऽर्थति लिङ्गात् ।

अन्य । अन्यतर । इतर । डतर डतम । त्व । त्वत् । नेम । सम । सिमा(पूर्वः) पर । अवर । दक्षिण । उत्तर । अपर । अधर । स्व । अंतर त्यत् । तत् । यत् । अदस् । इदम् । एतद् । एक । द्वि । युष्मद् । भवत् । अस्मद् । किम् । इति सर्वादयः । **जशः शी ५।१।१४।** अकारान्तात्सर्वनाम्नो गेः परस्य जसः श्यादेशो भवति । सर्वे । **सर्वनाम्नः स्मै ५ । १ । १२।** अकारान्तात्सर्वनाम्नो ङेः स्मै स्यात् । सर्वस्मै । **ङसिङ्योः स्मात्स्मिनौ ५।१।१३।** अतः सर्वनाम्नो ङसिङ्योः स्मात्स्मिनौ स्तः । सर्वस्मात् । **आम्यात्सर्वनाम्नः सुट् ५ । १ । २४ ।** अवर्णान्तात्परस्य सर्वनाम्नो आमः सुडागमः । एत्वषत्वे । सर्वेषाम् । सर्वस्मिन्-पञ्चमदन्ता विश्वादयोऽपि ॥ उभशब्दो द्विवचनान्तः उभौ २ । उभाभ्यां ३ । उभयोः २ ॥ डतरडतमौ तेन तदन्तानां कतरक-तम यतर । यतम ततमाततराएकतराएकतम प्रभृतीनां ग्रहणम्॥ **पूर्वपरावरदक्षिणोत्तरापराधराण्यस्त्रौ व्यवस्थायां १। १ । ४२ ।** इमे व्यवस्थायामसंज्ञायां जसि वा स-र्वनाम संज्ञा भवन्ति । पूर्वे पूर्वाः । असंज्ञायाम् किम् उत्तराः कुरवः । स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्था-याम् किम् । दक्षिणागाथकाः कुशला इत्यर्थः । **स्वमज्ञातिधना-ख्यायाम् १।१ । ३५।** ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा । स्वे, स्वाः । **बहिर्योगोपसंव्यानेऽपुर्युसरं**

---

( १ ) स्वस्य पूर्वादि शब्दस्याभिधेयेनापेक्ष्यमाणस्यावधि नियम इत्यर्थः ।

१ । १ । ३४ । वाह्ये परिधानीये चार्थेऽन्तरशब्दः असि वा सर्वनामसंज्ञा भवति न पुरियोगे । अन्तरे अन्तराः वा । वाह्या इत्यर्थः । अन्तरे अन्तरा वा शाटकाः । परिधानीया इत्यर्थः । ङसिङ्योर्वा १ । १ । ४३ । पूर्वादीनि ङसिङ्योर्वा सर्वनामसंज्ञानि भवन्ति । पूर्वस्मिन् पूर्वे पूर्वस्मात् पूर्वात् एवं परादीनां ।

प्रथमचरमतयाल्पार्धकतिपयनेमाः १ । १ । ४१ । एते जसि वा सर्वनाम संज्ञकाः भवन्ति । प्रथमे, प्रथमाः । [तयः] त्यः । द्वितये द्वितीयाः शेषं वीरवत् ।। नेमे, नेमाः । शेषं सर्ववत् ।

तीयस्य ङिति १ । १ । ४४ । तीयप्रत्ययान्तस्य सर्वनामसंज्ञा वा भवति ङिति । द्वितीयस्मै, द्वितीयाय । एवं तृतीयः । निर्जरः ।

जराया वाऽसङ् २ । १ । ६० । जराशब्दस्यासङादेशो वा भवत्यजादौ विभक्त्याम् । पदङ्गधिकारे तस्य तदन्तस्य च एकदेशविकृतस्यानन्यत्वात् । इति प्रान्तस्यापि सिद्धम् । अतिजरसौ अतिजरसः । इत्यादि । पक्षे हलादौ च वीरवत् । वीरपाः ।

दो जसि च ४ । ३ । ६३ । दन्माज्जसीचिचद्वयोरेकः पूर्वस्वर्णो भवति । वीरपौ । वीरपाः । सुङऽनपः १ । १ । ३५

---

१ । इदं सूत्रं द्वितीयाय भोगायेत्यादौ न प्रवर्तते । तस्य लाक्षणिकत्वात् । २ । अजादौ किम् । जराभ्याम् ।

३ विभक्त्या मिति किम् । जराया इदं जारम् ।

४ आगमस्य सुत्रे नग्रहणम् त्याऽत्ययोर्मध्ये त्यस्यैव ग्रहण मितिनियमात् ।

सुङ् भसंज्ञो भवत्यनपि। **स्वादावऽघे** १। २। १०५। घवर्जिते स्वादौ परतः पूर्वं पदसंज्ञं भवति। **यचि भः** १। २। १०६। घवर्जिते[1] यकारादावजादौ च पूर्वं भसंज्ञं भवति। **भस्य** ४। ४। ११६। आपादपरिसमाप्तेरधिकारोऽयम्। **आतो धोः** ४। ४। १२५। आकारान्तस्य धोर्भस्य खं भवति। गोरपः गोरपा, गोरपाभ्यामित्यादि। एवं कीलालपादयः। धोः किम्। हाहान्। नेमिः नेमी। **जसि** ५। २। १०४। प्रान्तस्य गोरेप् भवति जसि नेमयः। **प्रस्यैप्** ५। २। १०३। प्रान्तस्य गोरेप्भवति कौ। **केरेङः** ३। ६। ५७ एङन्तादुत्तरस्य केः खं भवति। हे नेमे। नेमिम्। **स्त्र्य्ऽस्त्रियाम्** १। १। १६६ प्योः प्रः सुसंज्ञो भवति, सखिशब्दमन्तरा। **आङो, नाऽस्त्रियाम्**। ५।२।११३। सोरुत्तरस्याङो ना भवत्यस्त्रियाम्[2]। आङिति टा संज्ञा। नेमिना, नेमिभ्यां, नेमिभिः। **सोर्ङिति** ५। २। १०५। सुसंज्ञस्य गोरेब्भवति ङिति सुपि। नेमये। नेमिभ्यां नेमिभ्यः। **ङसिङसोः** ४। ३। ९७। एङ उत्तरयोर्ङसिङसोरति परे द्वयोरेकः पूर्वो भवति। नेमेः २ नेमीनाम् नेमयोः २। **औदच्च-स्रोः** ५। २। २। इदुद्भ्यां परस्य ङेरौत्, सोरच्च। नेमौ ने-

---

१ यकारादाविति किम्। गार्ग्यः। २ घवर्जिते किम्। सुपादौ। इत्यादौ पदादेशा पत्वे। ३ अस्त्रियां किम्। सिद्ध्या। ४ सोः किम्। सख्ये। ५ ङिति। किम्। नेमिभ्याम्।

भिदु । एवं गिरिकव्यादयः । अनङ् सौ ।५।१।७०। सख्युर्गोरनङादेशो भवत्यकौ सौ, उश्यान्त्योऽलुक् ।१।१।७७ अलामंतस्य समीपोऽलुङ्संज्ञो भवति । धेऽकौ ।४।४।४६। किवर्जितेधे परतो नकारान्तस्य गोरुङो दीर्घोभवति। हल्ड्यापो ग्रःसुसिप्त्यनच् ।४।३।५६। हलन्तादीऽन्तां-यो ड्यापतश्चन्ताश्च परेषामनचां सुसितीनां खं भवति। नखं मृदन्तस्याकौ ।५।३।३०। पदस्य योऽयमो मृदन्त-स्य नस्य खं भवति, नतु कौ । सखा। सख्युरकौ ५।१।६। सखिशब्दात्परोऽकि विषयो धोणिद्भवति ञ्णित्यचः ।५।२।३। अजन्तस्य गोरैभवति ञिति णिति च परे।सखायौ। सखायः। हे सखे । सखायम् सखायौ। सखीन् सख्या। सख्ये। ख्यत्यादुतः ।४।३।६६। खित्ती तिती शब्दाभ्यः परयोर्ङसिङसोरत उद्भवति । सख्युः । औदच्च सेः' इति डेरौत्। सख्यौ। शेषं नेमिवत् । पतिः से १।२।६७। पतिशब्दः से एव सुसंज्ञो भवति । जिनपतिना। सर्वं नेमि-वत्। से एवेति किम्। पत्या, पत्ये। पत्युः पत्यौ। कतिशब्दो नित्यंबहुवचनान्तः। ष्णान्तेप् १।१।३४। षकारन-कारान्ता संख्याकतिशब्दश्चेप्संज्ञौ भवतः। उसुजुस् १।१।

१ हल्ड्यापः किम्। राजा, ग्रामणीः। ग्रः किम्। निष्कौ-शाम्बिः। सुसिप्तीति किम्। अभैत्सीत्।अनचः किम्। विभर्ति।

६२ । उप्, उच्, उस्–संज्ञाभिर्भावितस्य नाशश्चैताः पृथक्संज्ञा भवंति । उश्चिसः ।५। । १९ । इत्संज्ञकादुत्तरयोर्जसूशसोरुव् भवति । त्यखे त्याश्रयम् । । १ । ६३ त्यस्य खे कृतेऽपि तदाश्रितं कार्यं भवति । इति जसः खेऽपि तदाश्रये पदि प्राप्ते । नोमता गोः ।१। १ । ६४। [1]उमताशब्देन नाशिते त्ये गोस्तदाश्रितं कार्यं न भवति । [2]कति २ । इत्यादि । त्रिशब्दो नित्य बहुवचनांतः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ ॥ त्रेस्त्रयः ५ । १ । ३५ । त्रीत्यस्य त्रयादेशो भवत्यामिपरे । त्रयाणाम् त्रिषु । गौणत्वेऽपि । परमत्रयाणां । त्रिषु । द्विर्नित्यं द्विवचनांतः । त्यदादेरः५। १ । १६१ । त्यदादीनामकारादेशो भवति विभक्त्याम् [अत्र विधिप्रति द्विपर्यन्तास्त्यदादयः] । द्वौ २ । द्वाभ्याम्३। द्वयोः२। पाति लोकमिति पपीः सूर्यः।पप्यौ । पप्यः। हे पपीः पपीम् । पपीन् । पप्या । पपीभ्याम् ३ । पपीभिः। पप्ये । पपीभ्यः २ । पप्यः । पप्योः २ दीर्घत्वान्न नुट्–पप्याम् । ङौतु खेकोदीः पपी । पपीषु । एवं वातप्रम्यादयः । य्वौस्त्र्याख्यौ मुः १ । २ । ९१ । ईदूदन्तौ स्त्र्याख्यौ मुसंज्ञौ स्तः । आख्याग्रहणं स्त्रीत्वे [3]न्यग्भूतेऽपि मुसंज्ञार्थं। प्रोऽम्बार्थम्वोः।५।२।१०२।अम्बार्थवाचकानां मुसंज्ञकस्य च प्रो भवति कौ परतः । हे अतिलक्ष्मि । आण्मोः।५।२।१०७। मुसंज्ञकाद्डोः परस्य ङितोऽडागमो भवति। आटश्च४।३।७८।आटोऽचि परतो द्वयोरैके ऐप्भवति अतिलक्ष्म्यै

1 का संख्यायेषामिति विग्रहः । 2 उमतेति किम् । कार्यते, हार्यते इत्यादि । 3 विशेषणी भूतेऽपीत्यर्थः

अतिलक्ष्म्याः । अतिलक्ष्मीणाम् । ङेराम् न्द्याम्नीभ्यः ४ । २ । ११० । नुसंज्ञाद्यावन्तान्नीशब्दाच्च परस्य ङेरामादेशो भवति । अतिलक्ष्म्याम् । शेषं पपीवत् अतिलक्ष्म्यादयोऽप्येवं । बहुश्रेयसी शब्दे तुहल्ड्याप्भ्यः इति सुलोपो विशेषः । कुमारी । श्नुधातुभ्रुवां य्वोरियुवौ ४ । ४ । ७७ ॥ श्नुप्रत्ययधातुभ्रुवामिवर्णोवर्णयो रियुवादेशौ भवतोऽचि[1] इति प्राप्ते । एर्गिनाक्चादुङोऽसुधियः ।४ । ४ । ७७ । गिनाक् च पूर्वाद्युक्ः परस्येवर्णस्य यण् भवत्यचि, सुधीशब्दं वर्जयित्वा । कुमार्यौ । कुमार्यम् कुमार्यः । हे कुमारि । कुमार्यम । कुमार्या । कुमार्यैः । कुमार्य्यि । शेषं पपीवत् गिपूर्वादुङः—उन्नयतीत्युन्नीः । उन्न्यौ २ । उन्न्यः २ उन्न्याम । एवं परिणी । प्रकृष्टं ध्यायतीति प्रधीः । प्रध्यम् । प्रध्या वाक्पूर्वादुङः—सेनान्यौ । सेनान्याम् । गिनाक्चपूर्वादुङ इति किम् ? यवक्रियौ । नेह-सुधियौ, सुधियः । आमि-सुधियाम् । सुधियि । क्रियायोगे गिः ।१ । २ । १२६ । क्रियायोगे प्रादयो गिसंज्ञा भवंति [गिसंज्ञकेतरपूर्वपदस्य यण् नेष्यते] शुद्धधियौ । सुखमिच्छतीति सुखीः, सुख्यौ, सुख्यः । सुख्यम । सुख्युः । सुख्याम् । सुख्यि । लूनं पूनं चेच्छतीति लूनीः । पूनीः । एवं भान्वादयः । तृज्वत्क्रोष्टुः ।५ । १ । ७३ । क्रोष्टुशब्दस्तृजन्तस्य भवति क्विवर्जिते धे । ऋतो ङिधे ।५ । २ । १०५ ।

---

[1] य्वोरिति किम् चक्लुः । [2] अचीति । किम् । अभुवान् ।
[3] ऋत इति तकपर करणं किम् । कॄ एत योरनुकरणे ऋकारान्त प्रसंग वारणाय तपर करणमावश्यकम् । अन्यथा कॄः क्रः । इत्यादावपि व्याप्तिः स्पष्टैव ।

ऋकारान्तस्य गोरेङ्भवति ङौ घे च परतः । इति प्राप्ते । **ऋदुशनस्पुरुदंशोनेहसां** ५ । १ । ७१ । ऋकारान्तानामुशनसादीनां चानङादेशो भवत्यकौ सौ। **स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृपोतृप्रशास्तृत्रपाम्** । ४।४ । ८ । एषामुङौ दीर्घो भवत्यकौघे । क्रोष्टा, क्रोष्टारौ-क्रोष्टून् । भादिष्वजादिषु वोभयम् । क्रोष्ट्रा; क्रोष्टुना, क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुभ्याम् । क्रोष्टुभ्यः । **ऋत उत्** ४ । ३ । ९८ । ऋतोङसिङसोऽचिपरे द्वयोरेक उद्भवति । **रात्सः** ५ । ३ । ४२ । रेफान्तस्य पदस्य स्फे यो रेफस्तस्मात्परस्य सस्यैव खं भवति । क्रोष्टुः २ क्रोष्ट्रोः २ । क्रोष्टूनाम् । क्रोष्टरि । पक्षे च हलादौ च भानुवत् । हूहूः हूहौ हूहू हूहूम् इत्यादि । अतिचमूः अतिलक्ष्मीवत् । हे अतिचमु । अतिचम्वै । अतिचम्वाः । अतिचमूनाम् ॥ खलपूः । **सुध्योः** ४ । ४ । ७८ । गिधाक्ष्वपूर्वादुङ परस्योवर्णस्य यण् भवत्यजादौ सुपि । खलप्वौ । खलप्वः । खलप्वि । एवं यवलवादयः । गिधादिति किम् । भूः भुवौ, भुवः । कटप्रूः कटप्रुवौ कटप्रुवः । **दृन्करपुनर्वर्षाभ्यो भुवः** । ४ । ४ । ७८ । एभ्य एवोत्तरस्य भुवो यण् भवत्यचि सुपि । दृन्भ्वौ । दृन्भ्वः । एवं स्वम्भू, करभू । कर्ता कर्तारौ । कर्तारः । कौ ऋतो ङिघे । इत्येषि, हे कर्तः । इत्यादि । एवमुद्गातृधातृनप्त्रादयः। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं । तेनेह न । पिता । पितरौ । पितरः । पितरम् । शेषं कर्तृवत् । भ्रात्राद्योऽप्येवं । ना नरौ । नरः । **नुर्वा** । ४ । ४ । ४। नृशब्दस्य वा दीर्घो भवति नामि परे । नृणां । नृणाम् । **गोर्णित्** ५ । २ । ९७ । गोशब्दात् द्विहितं घं णिद्भवति । गौः

उत्तर पूर्वस्यै, उत्तर पूर्वायै । तीय स्येति वा सर्वनाम संज्ञा ङित्सु । द्वितीयस्यै, द्वितीयायै । एवं तृतीया ।" [प्रोऽम्बा'र्थयोः"] । हेअम्ब । हेअक्क । हेअल्ल । जरा जरसौ इत्यादि । पक्षे रमावत्। सिद्धिः सिध्या । ङिति ह्रस्वश्च ।१ । २ । ६५ । य्वोर्यः श्रः स्त्र्याख्य इयुवोः स्थानिनौ यौ य्वौ तेषां ङिति वा मुसंज्ञा भवति । सिद्ध्यै । सिद्धये ।सिद्ध्याः२।सिद्धेः२। इदुद्भ्याम्।४। २ । १११ । मुसंज्ञकाभ्यामिकारोकाराभ्यां परस्य ङेराम् भवति । सिद्ध्याम् । सिद्धौ । शेषं नेमिवत् । एवं मत्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ ५ । १ ।१५८ । स्त्रीलिङ्गयोरेतौ स्तो विभक्तौ । रोऽन्तृणुः। ५ । १ । १५६ । तिसृ चतस्रोः ऋकारस्य रेफादेशो भवत्यचि । तिस्रः २। तिसृभिः अतिश्चिति प्रतिषेधान्न दीः । तिसृणाम् । तिसृषु । द्वे २ । द्वाभ्यां ३ । द्वयोः । गौरी, गौर्यौ, गौर्यः । हे गौरि गौर्यै इत्यादि । एवं नद्यादयः । लक्ष्मीः । शेषं गौरीवत् । एवं तरीतन्त्र्यादयः ॥ स्त्री । हे स्त्रि । स्त्रियाः । ४ । ४ । ७३ स्त्रिया इयादेशो भवत्य जादौ सुपि । स्त्रियौ स्त्रियः । वाम् शसोः ४ । ४ । ७४ । आम शसोः परतः स्त्रिया इयादेशो वा भवति । स्त्रियम् । स्त्रीम् । स्त्रियः स्त्रीः स्त्रिया । स्त्रियै स्त्रियाः २ : स्त्रियोः २। परत्वान्नुडि, । स्त्रीणां स्त्रियाम् । श्रीः । श्रियौ । श्रियः । आमीयुवो:१ । २।६३ । वा १ । २ । ६५ । इयुवोः स्थानिनौ स्त्र्याख्यौ य्वौ आम्येव वा मुसंज्ञौ भवतः । तेन नाम्यत्र । हे श्रीः । श्रियै, श्रिये । श्रियाः

---

१ अत स्त्रीत्वाभावः ।

गावौ, गावः। ओतः । ४ । ४ । ७५ । ओत आकारादेशो भ न्यम शसोः परतः। गाम् गावौ । गाः । गवा । गवे । गोः । इत्यादि। रायो हलि ५ । ५ । १४७। रैशब्दस्याकारादेशो भवति हलादौ सुपि । राः रायौ रायः राभ्यामित्यादि । ग्लौः । ग्लावौ ग्लावः । ग्लौभ्यामित्यादि । इत्यजन्ताःपुंलिङ्गाः ।

## अथाजन्ताः स्त्रीलिंगाः ।

दया हलङ्यादिना सोः खं औङ आपः ५।१। १५॥ आबन्तादौङः परस्यौङःशी भवति । दये दयाः । कौ५।२।१०१॥ आप एत्वं भवति कौ परे। केरेङः इति सुखं।हे दये,हेदयाः,दयाम् दये दयाः। आङि चापः । ५ । २ । १०० आबन्तस्य गोरेत्वं भवति आङ्योसि च परतः । दयया । दयाभ्यां । याडापः।५। २ । १०८ ॥ आबन्तादुत्तरस्य ङितो याडागमो भवति । ए-चयैप् । दयायै दयाभ्यां दयाभ्यः, दयायाः, दययोः दयानाम् दयायाम् दयासु । एवं ताराहारादयः । सर्वनाम्नः स्याट् प्रश्च ५ । २ ।१०६ ॥ आबन्तात्सर्वनाम्नः परस्य ङितः स्याडागमो भवति प्रश्चापः । सर्वस्यै । सर्वस्याः सर्वासाम् । सर्वस्याम् । शेषं दयावत् । एवं विश्वादयोऽपि । वा दिक्सखे १।१ ३६ ॥ दिगुपदिष्टे बसंज्ञके से सर्वादीनिसर्वनामसंज्ञानि वा

१ शसा साहचर्यात्सुबेवा । गृह्यते नेह अचि नवम् ।
२ ग्लौ र्मृगाङ्कः कला निधि रित्यमरः ।

श्रियः [ आमि वा नुः । श्रीणां, श्रियाम् । श्रियम् । श्रियाम्, श्रियि । श्रीषु । एवं सुधीः । धेनुः सिद्धिवत् **उगितश्चाङी** ३।१।६ उगिदन्तादृकारान्तान्नकारान्ताच्च स्त्रियां वर्तमानात्मृदो ङीःयो भवति । क्रोष्ट्री सखीवत् । सुभ्रूः श्रीवत् । स्वयम्भूः पुंवत् । **नेत्स्व-स्त्रादेः** ३ । १ । ८ । इत्संज्ञकेभ्य स्वस्त्रादिभ्यश्च स्त्रियां यदुक्तं तन्न भवति । स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा याता मातेति सप्तैते स्वस्त्रादय उदाहृताः । स्वस्त्रादयः प्रायः कर्तृवत् । स्वसृ । धकारान्तादयः पुंवत् । इत्यजन्ताः स्त्रीलिङ्गाः

# अथाजन्तनपुंसकलिङ्गाः ।

**नपः स्यमोः** ५ । १ । २० । नप उत्तरयोः स्यमोर्लुग्भवति । इतिप्राप्तमपवाद्य । **अतोऽम्** ५ । १ । २१ । अकारान्तान्नपः प-रयोः स्यमोरम् भवति । ततः " पूर्वोऽमि" ज्ञानम् । प्राप्त् । ई ज्ञान **नपः** ५ । १ । १६ । नपो गौरुत्तरयोङः शी भवति । 'ङेच्याल्' ज्ञाने **जस् शसोःशिः** ॥५ । १ । १७ । नपः परयो र्जस् शसोः शिर्भ-वति । **शि घस्** ॥१ । १ । ३१ ॥ नपि शि घसंज्ञं भवति । **नपोऽ झलः** ५ । १ । ५१ । झलन्तस्या जन्तस्य च नपोनुम् भवति । **परोऽन्त्यो मित्** । १ । १ । ५५ । मिदः स्वानिर्दिष्टस्यान्त्यादचः परो भवति [ वेऽस्मो । ज्ञानानि । मार्दो वीरवत् । एवं धनवन फलादयः । **उतरादेः पञ्चकस्यदुक्** ५ । १ । २२ । उतरादेः पञ्चकस्य दुगागमो भवति स्यमोः परतः । "नपः स्यमोः" कत-रत् कतरद् कतरे । कतराणि शेषं पुंवत् । एवं कतमत् ।

अन्यत् । अन्यतरत् । अनित्यमागमशासनमित्येकतरस्य न एकतरम् । उतरेण सिद्धे पुनरन्यतरग्रहणादन्यतमस्य डसमा-स्तत्वात् तुक् सर्वनामसंज्ञा च । [1]अन्यतमम् । प्रोनपि । १ । १ । ७ । ( मृदिति वर्तमानमर्थात्तान्तं संपद्यते ) नपि वर्तमानस्य मृदोऽन्त्यस्याचः प्रादेशो भवति कीलालपं ज्ञानवत् वारि । सुपीकोऽचि । ५ । १ । ५२ । अजादौ सुपि परे इगन्तस्य नुम् भवति । वारिणि । वारीणिलोमतागोरित्यस्यानित्यत्वज्ञापनात् । हे वारे । पूर्वविप्रतिषेधेनैयो बाधनान्नुम् वारिणे । वारिणः वारिणोः । वारीणि । हलादौ नेमिवत् । सक्थ्यस्थि दध्यक्ष्णामनङ् ५ । १ । ५४ । एषां नपामनङादेशो भवति अजादौ । भादौ । अनो खमवस्फात् ४ । १ । २० । अन्नन्तस्य स्था । कारस्य खं भवति मकारवकारान्तात् परं मुक्त्वा सक्थ्ना, सक्थ्ने । वा ङिश्योः॥४ । ४ । १२२ । अनो ऽकारस्य खं वा स्यात् ङौ शीशब्दे च परे । सक्थनि साक्थ्नी एवं अस्थिदध्यक्षीणि । सुधि, सुधिनी सुधीनि । हे सुधे । हे सुधि । भादौ वोक्तपुंस्कं पुंवत् ५ । १ । ५३ । भादावजादौ सुपि, तुल्ये प्रवृत्तिनिमित्ते उक्त पुंस्कमिगन्तं नब्वा पुंवद्भवति । सुधिया, सुधिने त्यादि । मधु, मधुनी, मधूनि । हे मधो, मधु । सुलु, सुलुनी, सुलूनि । सुलुनेइत्यादि । कर्तृ । कर्तृणी, कर्तृणि । हे कर्तः हे कर्तृ । कर्तृणाम् । एवं विधात्रादयः

---

१ लोमता गोरित्यस्या नित्यत्वे प्रमाणं सुपीकोऽचीति सूत्रस्थाचिग् ग्रहणमेव । २ भादौ किम् । दधिनी ।

प्रोनपि । ६ । १ । नपि वर्तमानस्य मृदः प्रो भवति । पचः प्रकर्तव्ये "स्थानेन्तरतमः" इति परिभाषा सूत्रेणोकारौकारौ भवतः । अतिरि। अतिरिणी । अतिरीणि। अतिरिणा। एकदेश विकृत मनन्यवत् । अति राभ्यां । अतिरीणां । उपगो शब्दस्य प्रादेशः । उपगु । उपगुनी । उपगूनि । उपगुनेत्यादि । अतिनु । अतिनुनी । अतिनूनि । अतिनुनेत्यादि । इत्यजन्तानपुंसकलिङ्गाः

# अथहलन्तपुंलिङ्गाः ।

होढः । ५ । ३ । ४८ । हकारान्तस्य हस्य ढकारादेशो भवति झलि पदान्ते च । दामलिट्-ड् । हे दामलिट्-ड् । दामलिहौ । दामलिहः । दामलिड्भ्याम् । दामलिट्सु । दामलिट्त्सु । दादे र्घोर्घः । ५ । ३ । ४९ । धुपाठे दकारादे र्धोर्हस्य घोभवति झलि पदान्ते च । इति घत्वे कृते ॥ एकाचो वशो भष् झषः स्ध्वोः । ५ । ३ । ५४ । एकाचोऽझषन्तस्य धोर्यो ऽवयवो वश् तस्य भष् भवतिसकारे ध्वशब्दे पदान्ते च । गोधुक्—ग् । गोदुहौ । गोदुहः । गोधुग्भ्याम् । गोधुक्षु ।वा द्रुह मुहष्णुहष्णिहाम् । ५ । ३ । ५० । एषां हस्य घा घो भवति झलि पदान्ते च । ध्रुक्—ग्, ध्रुट्—ड् । ध्रुग्भ्याम् ध्रुड्भ्याम् । ध्रुक्षु, ध्रुट्सु, ध्रुट्त्सु । एवं मित्र द्रुहादयः । ध्रादेः

---

१ दाम लिहमात्मन इच्छति दाम लिह्यति । ततः क्विपि दामलिट् । इत्यादि ।

षोऽध्यधिज्ञ्ध्वस्कः स्नं । ४ । ३ । ६२ । इत्यादि वर्जित स्य धोरादिभूतस्य षकारस्य एकारस्य च सकारनकारौ भवतः । स्नुक्—ग् । स्नुट्—ड् । एवं स्निक्—ग् । स्निट्—ड् । विश्व वाट्—ड् । विश्ववाहौ । विश्ववाहः । इग्यणोजि: । १ । १ । ४५ । य इक् यणः स्थाने भूतो भावी वा स जिसंज्ञको भवति । ऊ्ठः शड्ङे च । । ४ । ४ । १७ । स्यहम् । इत्यूठ् । जेः । ४ । ३ । ६४ । जेरचि परतः पूर्वं रूपमेकादेशो भवति । एत्येधत्यू ह्स्वित्यैप् । विश्वौहः । विश्वौहेत्यादि । चतुर नडुहो वा । ५ । १ । ७२ । अनयो रुकारस्य वा भवति धे परतः । सावनडुहः ५ । १ । ६० अस्य नुम् भवति सौ परे । अनड्वान् । वः कौ । ५ । १ । ७३ । तयो रुकारस्य वो भवति कौ परतः । हे अनड्वन् । अनड्वाहौ । अनड्वाहः । अनड्वाहम् । शसि अनडुहः । अनडुहा । वसुस्र सुध्वंसुनडुहान्द: । ५ । २ । ७६ । एषां दकारान्तादेशो भवति पदान्ते । अनडुद्भ्याम् । सान्तेति किम् । विद्वान् । पदान्तेति किम् । स्रस्तम् । ध्वस्तम् । दिवऔत् ७ । ६ । ८४ । दिवो वस्यौकारादेशो भवति सौ परतः । दुद्यौः । दुर्दिवौ । दुर्दिवः । दिव उत् । ४ । ३ । १०८ । दिवः पदस्योकारादेशो भवति पदान्ते । दुर्द्युभ्यामित्यादि । चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः । [ प्रेल् स्वाप् चतुरो नुट् ] । षोर्नोणः समाने पदे । ५ । ४ । ८५ । षकाररेफाभ्यामुत्तरस्य नस्य ण

---

१ अत्र नुम् विधि सामर्थ्याद्वसु स्रज़ स्थिति दत्वं न ।
२ अल्विधित्वेन स्थानिवत्वा भावाद्हल् ङ्याबिति सोः खंन भवति।

कारादेशो भवति समाने परे ।(अचोरहाभ्यां द्वे)चतुर्णाम् । रेश्च सुपि । ५ । ४ । २४ । ईप्बहुवचने परतो रेरेव सकारादेशो भवति विसर्जनीयश्च । षत्वम् । षस्य द्वित्वे[1] प्राप्ते । शरः ५ । ४ । २५ । शरोऽचि परे द्वे रूपे न भवतः । चतुर्षु । मोनः । ५ । ३ । ८३ । धोर्मस्य नो भवति पदान्ते । प्रतान् । प्रतान्सु । किमः कः । ५ । १६२ । किमः का देशो भवति विभक्त्याम् । कः । को । के । शेषं सर्ववत् । इदमोम्मः ५ । १ । १६६ । इदमो-मान्ता देशो भवति सौ परतः । अत्व बाधनार्थमिदं वचनम् । पुंसीदोऽय् ५ । १ । ६६ । इदम इदोऽय् सौ पुंसि । अयम् त्यदाद्यत्वे[2] एत्वतोऽपदे । ४ । ३ । ८४ । अकारस्य पररूपं भव न्त्य परे एपि परतः । दः । ५ । १ । १६७ । इदमो दस्य मादेशो भवति विभक्त्याम् । इमौ । इमे । इमम् । इमौ । अनाप्यकः । ५ । १ । १७० । अककारस्येदम इद्रूपस्यान इत्ययमादेशो भवत्यापि विभक्त्याम् । अनेन । हलि लुम् । ५ । १ । ३ । ७२ अककारस्येदमइद्रूपस्य लुम् भवत्यापि हलादौ विभक्तौ । (नानर्थकेऽन्ते ऽलो विधिः) । आभ्याम् । इदमदसोः सकोः । ५ । १ ।

---

१ निमित्ता न धिकरण निमित्तमत्परा । घटितत्वं समान पदत्वम् ।

२ आपिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः स्वीक्रियते न तु टाप् । विभक्त्यामिति निर्देशबलात् ।

३ यमपुंसि किम् ।

४१। कसहितयोरिदमदसोरेव भिस ऐस् भवति। इमकैरित्यादि। नेह। एभिः। अस्मै। एभ्यः। अस्मात्। अस्य। अनयोः एषाम्। अस्मिन्। अनयोः। एषु। **टौस्येनदेतदश्च** ४।३।१६। अन्वादेशे एतदिदमश्च एनदादेशो भवति टा ओस् इप् इत्येतेषु परेषु। अनेन छात्रेण छन्दो अधीतम्। एनं व्याकरण मध्यापय। अनयोः छात्रयोः शोभनं शीलम्। एनयोः रूपमपि। एनम्। एनौ। एनान्। एनेन। एनयोः। शेषं पूर्ववत्। राजा। **नः कौ**। ५।३।४४। पदान्तस्य नकारस्य खं न स्यात् कौ परे। हे राजन्। राजानौ। राजानः। अनोऽखमन्त्र स्फात्। राज्ञः। **न खं शा विधि तुकं कृति** ।५।३।२८। सुपः स्थाने सुपि च विधिं कृति विहितं च तुकं प्रति न खमसिद्धं भवति नान्यत्र इति नखस्या सिद्धत्वादात्वमैत्वमैत्वं चन स्यात्। राजभ्याम्। राजभिः। राज्ञि; राजनि। राजसु। यज्वा यज्वानौ यज्वानः। यज्वनः। यज्वना। अश्मनः। अश्मना। इत्यादि। इन् ह न् **पूषार्यम्णाम्** ४।४।६। शौ।४।४।३०। शावेवैषां दीनामुङो दीर्भवति नान्यत्र। इति निषेधे प्राप्ते। **सौ**।४।४।११। इन्नादीनामुङो दीर्भवत्य कौ सौ परे। वृत्रहा। हे वृत्रहन्।

१ क्रियागुण द्रव्यैः पूर्वं गृहीतस्य क्रिया गुण द्रव्यान्तरेण सम्बन्धे पुनरपि कथनमन्वादेशः।

२ सुब्विध्यादि भिन्ने न खमसिद्धं न भवतीति फलितार्थः। अतएव राजाश्व इत्यादौ दीर्घं सिद्धम्। ३ अत्राकारस्य खं न अखस्फादिति निषेधात्। ४ वृत्रं हतवानिति विग्रहः ४ कृत् विधेयग्रहणं वृत्रहण्या क्रियादि।

**एकाजुत्तरपदे णः** । ५ । ४ । ७६ । एकाचि धौ स्थितस्य पूर्वस्थ नुम्मुन्नकारस्य णो भवति । वृत्रहणौ । वृत्रहणः । शसि । अनः खे कृते । **हो हन्तेर्ञ्णिन्नेषु** । ५ । २ । ५६ । हन्तेः हंकारस्य कुत्वं भवति ञिति णिति त्येनकारे च परतः । वृत्रघ्नः । शार्ङ्गी शार्ङ्गिणौ । शार्ङ्गिणः । एवमर्यमन् पूषन् । इत्यादि । मघवा बहुल मित्यनेन वा तृ चान्त्यः । **उगिदचां घेऽध्वातोः** । ५ । १ । ४८ उगितामञ्चादीनामध्वातोश्च घे परतो नुम् भवति । वृत्वम् । मघवान् । मघवन्तौ । मघवन्तः । हे मघवन् । मघवद्भ्याम् । पक्षे मघवा । सुटि राजवत् । **श्वयुवमघोनोऽहति** ४ । ४ । ११८ । भसंज्ञानामन्तानामेषां ञिर्भवति न तु हृति । स्थान कृतान्त्यञिस्योकारः । मघोनः । मघोना मघवभ्याम् एवं श्वन् युवन् । अनन्यविकारेऽन्त्य सदेशस्येति परिभाषामाश्रित्य परस्यैव ञिर्भवति न तु वस्य । यूनः । यूना । युवभ्यामित्यादि । **पथिमथ्यृभुक्षामात्** । ५ । १ । ६२ । [२] एषामाकारोऽन्तादेशः स्यात्सौ । **इर्धे** । ५ । १ । ६३ । पथ्यादीनामिकारस्याकारादेशो भवति धे परतः । **थोन्थः** । ५ । १ । ६४ । पथिमथोस्थस्य न्थादेशो भवति धे परे । पन्थाः । पन्थानौ । पन्थानः । **भस्यटेः खम्** । ५ । १ । ६५ । भसंज्ञकस्य पथ्यादेष्टेः खं भवति । पथः पथा । पथिभ्याम् एवंमथिन्, ऋभुक्षिन् प्यान्तेल् । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः । **नोङः** । ४ । ४ । ५३ ।

---

[ १ ] भाविनः सुटो निवृत्त्यर्थं ससुट्क निर्देशः ।
( २ ) भस्येति किम् । उदञ्चौ ।

नान्तस्योङो दीर्घो भवति नामि परे । पञ्चानाम् । पञ्चसु । विभक्त्यामाष्टनः ५।१।१४३। अष्टन आकारान्तो देशो वा भवति विभक्त्याम् । अष्टाभ्य औश् ५।१।१४८। आत्व पक्षे ऽष्टनः परयोर्जस्शसोरौश् भवति । अष्टभ्य इति सिद्धे कृतात्वस्योच्चारणं यत्रैवात्वं तत्रैवौशिति। अष्टौ ।अष्टौ अष्टाभि अष्टाभ्यः। अष्टानाम् । अष्टासु । आत्वाभावे पञ्चवत् । ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चः । २।१।५७। ऋत्विगादयः क्विन्नन्ता निपात्यन्ते, अञ्चुयुजिक्रुञ्चिभ्यस्तु क्विर्विधीयते । कृदमिङ् । २।१।८०। अत्र धोरधिकारे मिङ्वर्जितास्त्याः कृत्संज्ञा भवन्ति । क्विन्प्रत्ययस्य कुः । ५।३।७५। क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशो भवति पदान्ते । ऋत्विक्—ग् । ऋत्विजौ । ऋत्विजः । ऋत्विग्भ्यामित्यादि । युजेरसे । १।५०। योगार्थस्य युजेरसे नुम् भवति घे परे।सुडं इकान्तस्य खे चाकृते नस्य कुत्वेन ङः । युङ् । युञ्जौ । युञ्जः । युग्भ्याम् । चोः कुः । ५।२।३०। चवर्गस्य कवर्गः स्याज्झलि पदान्ते च । भिषक्-ग् । भिषजौ । भिषजः । भिषग्भ्याम् । खन् । खञ्जौ । खञ्जः । खन्भ्यामित्यादि । व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः । ५। ५३ । एषां छशान्तयोश्च षो भवति झलि पदान्ते च । जश्त्वचर्त्वे । राट् । राड् । राजौ । राजः । राड्भ्याम् । राट्सु । परिव्राट् ५।३।६६। परिव्राट् शब्दस्य क्विबन्तस्य कृतदीर्घत्वस्य पदान्ते षत्वं निपात्यते । एवं कर्मपरिमृट् । देवेट् । विश्वसृट् । सृजियज्योः क्विप्रत्ययेति कुत्वमपवाद्यषत्वमनवकाश-

त्वात् । तेन विश्वसृडादीनकुत्वम् । परिव्राट् । परिव्राजौ परिव्राजः । विश्वस्य वसुराटोः । ५ । ३ । २१६ । विश्वस्य दीर्घो भवतिवसु-राडित्येतयोः परतः । विश्वाराट्–ड् । विश्वराजौ । विश्वराजः । विश्वाराड्भ्याम् । स्फादेः स्कोन्ते च । ५ । ४३ । पद-स्यावयवो यः स्कस्तदाद्योः सकारककारयोः खं भवति झलि च दान्ते च । भृट्—ड् । सस्यशस्ततोजस्त्वेन जः । भृज्जौ । भृज्जः । भृड्भ्यामित्यादि । तोः सः सावनंते । ५ । ६४ । त्यदादीनामनन्तेवर्तमानस्य तवर्गस्य सकारादेशो भवति सौ परे । स्यः । त्यौ । त्ये । सः । तौ । ते । यः । यौ । ये । एषः । एतौ । एते । ङेसुटोरम् । ५ । १ । २४ । युष्मदस्मद्भ्यामुत्तरस्य ङे इत्येतस्य सुटश्चामादेशोभवति । त्वाहौ सौ । ५ । १ । १५३ । युष्मदस्मदोर्मान्तस्य त्व अह इत्येतावादेशौ भवतः सौ । खमादेशे । ५ । १४९ । आदेशविभक्त्यां परतो युष्मदस्मदोः खं भवति । त्वम् । अहम् । युवावौद्वौ । ५ । १५१ । द्विवे

१ परित्यज्य सर्वं व्रजतीति विग्रहः ।

१ दान्त इति पदान्तोपलक्षणम् अत एव पदान्त विषये ऽवेदं भवति नान्यत्र ।

२ झलि किम् । भृज्जतीति भृट् ।

३ अनन्त्येति किम् । हेसः । अत्र परत्वात्त्वं बाधित्वादस्य सकारे सस् इति जाते ततो हलङ्यादिना सुलोपे त्वविसर्जनीयौ स्यातां तथा च हे सः इति रूपं स्यात् किन्तु ङियां सेति रूपं न स्यात् ।

वर्त्तमानयोर्युष्मदस्मदोर्मावधेर्युवावौ स्तोऽधिभक्ताम् । आवि ४।४।४८ याया औङि एतयोरात्वं भवति । युवाम् । आवाम् । यूयवयौ जसि ।५।१।५२। अनयोर्मावधेर्यूयवयादेशौ भवतो जसि । "त्वमादेशे" इति टे: त्वम् । यूयम् । वयम् । त्वमावेके ।५।२।१५६। एकत्वे वर्त्तमानयोर्युष्मदस्मदोर्मावधेस्त्वमादेशौ भवतः । इपि ।५।१।१४६। अनयो रात्वं स्यादिपि । त्वाम् । माम् । शसो नः ।५।१।२५। आभ्यां शसो नः स्यात् । "परस्यादेः" स्यान्तस्य णं । युष्मान् । अस्मान् । या:४।४।१४८। अनयोर्यकारादेशः स्यादनादेश विभक्त्यां परत: । त्वया । मया । युष्मदस्मदोः ।५।१।१४७। अनयोरात्वं स्याद्धलादौ विभक्तौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः । तुभ्यमह्यौ ङयि ।५।१।१५३। अनयोर्मावधेस्तुभ्यमह्यादेशौ भवतो ङयि । "त्वमादेशे" । तुभ्यम् । मह्यम् । भ्यसोऽभ्यम् ।५।१।२६। आभ्यां परस्य भ्यसोऽभ्यमादेशो भवति । युष्मभ्यम् । अस्मभ्यम् । ङसेः ।५।१।२८। आभ्यां परस्य ङसेरत् । त्वत् । मत् । अत्काया: ।५।१।२० आभ्यां काया भ्यसोऽत् स्यात् । युष्मत् । अस्मत् । तवममौ ङसि ।५।१।१५५। अनयोर्मावधेस्तवममौ स्तो ङसि । युष्मदस्मदोर्ङसोऽश् ।५।१।२३। तव । मम । युवयोः । आवयोः । साम आकम् ।५।१।२९। आभ्यामुत्तरस्य साम आकं भवति । युष्माकम् । अस्माकम् । त्वयि मयि ।

युवयोः । आवयोः । युष्मासु । अस्मासु । युष्मदस्मदोऽविभक्तिस्थस्य वाम्नावौ ।५ । ३ । १६ । पदात्परयो रपादादौ वर्तमानयो युष्मदस्मदोरेत इप् तौ विशिष्टयोवन्नावा देशौ स्तः । बहौ वस्नसौ ५ । ३ । १७ । पूर्वोक्तविशिष्टयोरनयोर्वस्नसौस्तः । एकस्य ते मे । ५ । ३ । १८ । अनैकान्तयो र्युष्मदस्मदो स्त्वामा इत्येतावादेशौ भवतः । ज्ञानं वां रक्षतु । शीलं नौ रक्षतु । ज्ञानं वो रक्षतु । शीलं नो रक्षतु । ज्ञानं ते दीयते।शीलं मे दीयते।ज्ञानंत्वा रक्षतु । ज्ञानं मा रक्षतु । समाने वाक्ये युष्मदस्मदोरादेश विधि रिष्यते : तेनेह न । ओदनं पच तव भविष्यति । आ न त्वादेशे ।५ । ३ । २२ । एतयोरेते आदेशा वा भवन्ति न तु कथितानुकथने । तेनान्वादेशे तु नित्यो विधिः । ज्ञानं ते दीयते । ज्ञानं तुभ्यं वा दीयते । तस्यते इदं कर्मत्येव । पादः पत् । ४ । ४ । ११७ । पादन्तस्य गोर्भस्यावयवस्य पाच्छब्दस्य पदादेशो भवति । सुपदः । सुपदा । सुपद्भ्याम ।अग्निमत् । अग्निमद् । अग्निमथौ । अग्निमथः । हलुङः किङ्त्यनिदितः । ४ । ४ ।२२ । अनिदितो हलन्तस्य गोरुङोनकारस्य खं भवति ङिङति परतः । उगिदच्चा धेऽध्यादेरिति नुम् । क्विन्यस्य कुरित्यनेन नस्यङः। प्राङ् । प्राञ्चौ । प्राञ्चः । अचः । ४ । ४ । १८३ । नष्ट न कारस्याञ्चते र्भस्या कारस्य खं भवति । चि । ४ । ३ । २३३ । नष्टन कारे ऽञ्चतौ परे पूर्वस्याणो दी र्भवति।प्राचः । प्राचा । प्राग्भ्याम । प्रत्यङ् । प्रत्यञ्चौ । प्रत्यञ्चः । प्रतीचः । प्रत्यग्भ्याम् । इदुदः

---

१ १६ तु भवत्येव शालीनां ते ओदनं दास्यामि ।

४ । ४ । १२४ । उदः परस्य नए नकारस्याञ्चते र्भस्याकार स्येद्भवति।उदङ्। उदीञ्चौ। उदञ्चः। उदीचः। उदग्भ्यामित्यादि। प्रीचः। **सहस्य सध्रिः** । ४ । ३ । २०१ । क्वय न्तेऽञ्चतौ। सध्र्यङ्। **समः समि** । ४ । ३ । १९९ । क्व्यन्तेऽञ्चतौ। सम्यङ्। समीचः। सम्यग्भ्य म्। **तिरसस्तिर्यखे** ४ । ३ । २०० । तिरसस्तिर्यादेशो भवति अखे अनष्टाकारे क्व्यन्तेऽञ्चतौ । तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यग्भ्याम्। **नाञ्चेः पूजे** । ४ । ८ । २८ । अञ्चतेर्नस्य खं न भवति पूजेऽर्थे। प्राङ्। प्राञ्चौ। नखाभावाद् खं न। प्राञ्चः। प्राङ्भ्यां। प्राङ्क्षु। एवं पूजार्थे। प्रत्यङ्ङादयः। क्रुङ्। क्रुञ्चौ। क्रुङ्भ्याम्। पयोमुक्—ग्। पयोमुचौ। पयोमुचः। पयोमुग्भ्याम्। "सांतस्येति धेर्दीः। उगित्वान्नुम्। महान्। महान्तौ। महान्तः। हे महन्। महद्भ्याम्। **अत्वसोऽधोः** । ४ । ४ । १२ । अत्वन्तस्यासन्तस्य चाधोर्वर्जितस्य सन्तस्य चो ङो दीर्घो भवत्यको सौ। उगित्वान्नुम्। धीमान्। धीमन्तौ। धीमन्तः। हे धीमन्। शसादौ महद्वत्। भातेर्डवतुः। डित्त्व सामर्थ्यादभस्यापि टेः खम्। भवान्। भवन्तौ। भवन्तः। शत्रन्तस्य भवन्। **थः** । ४ । ३ । ४ । तयोर्द्विरुक्तयोः समुदितयोस्थसंज्ञा भवति। **नथात्** । १ । १ । ५६ । थादुत्तरस्य शतुर्नुम्न भवति। ददत्—द्। ददतौ। ददतः। जक्षित्यादयः पञ्च थसंज्ञा भवन्ति। जक्षत्—द्।

[१] नपन का स्येति किम्। पूजायाम्। उदञ्चः।

१ सौत्रत्वात्पुंस्त्वं बोध्यम्। २ शत्रन्तस्यात्वन्तस्याभावान्न दीर्घत्वम्।

जक्षती। जक्षतः। एवं जाग्रत्, चकासत्, दरिद्रत्, शासत्। गुह्—ट्। गुहौ। गुहः। गुड्भ्याम्। **त्यदादौ दृशोऽना लोचेटक् च**। २। २। ४८। त्यदादिषु धातुदृशेर्धातोरनालोचेऽर्थे टक् भवति क्विप् च। **आ सर्वनाम्नः**। ४। ३। १६७। सर्वनाम्न आकारान्तादेशः स्याद्दृगादिषु परतः। तादृक्—ग्। तादृशौ। तादृशः। "व्रश्चेति" षः। अत्र चत्वम्। विट्—ड्। विशौ विशः। विड्भ्याम्। **नशो वा**। ५। १०१। नशः कवर्गोऽन्तादेशो वा पदान्ते। नक्—ग्। नट्—ड्। नशौ। नशः। नग्भ्याम्। नड्भ्याम्। **स्पृशोऽनुदके क्विः**। २। २००। अनुदके सुपि वाचि स्पृशेः क्विर्भवति। घृतस्पृक्—ग्। घृतस्पृशौ। घृतस्पृशः। दधृक्—ग्। दधृषौ। दधृषः। दधृग्भ्याम्। रत्नमुट्—ड्। रत्नमुषौ। रत्नमुषः। रत्नमुड्भ्याम्। षट्। षड्। षड्भिः। षड्भ्यः। षण्णाम्। षट्सु। इत्थं प्रतिषत्वस्यासिद्धत्वात्सजुषाशिरिति रिरित्वम्। **इको दीर्घोऽकु**। ५। ८५। रेफवान्तस्य धोरेक इकोर्दीर्घो भवति। पिपठीः। पिपठिषौ। पिपठीर्भ्याम् "नुम्शर्व्यवायेऽपि" इति षः पूर्वस्य ष्टुत्वेन षः। पिपठीष्षु। पिपठीःषु। तितीः। तितीर्षौ। तितीर्भ्याम्। विद्वान्। विद्वांसौ। हे विद्वन्। **वसोर्जिः**। ५। ५। ११८॥ वस्वन्तस्य भस्य जिर्भवति। विदुषः। वसुस्रंस्विति दः। विद्वद्भ्याम्। **पुंसोऽसुङ्**। ५। १। ६६। पुंसोऽसुङादेशो भवति धे परतः। पुमान्। हे

---

१ स इव पश्यतीति विग्रहः। २ अनुदके किम्। उदकं स्पृशतीति उदकस्पर्शः।

पुमन् । पुमांसौ । पुमांसः । पुम्भ्याम् । पुंसु । ऋदुशनस्पुरुदंश इ-त्यनङ् । उशना । वोशनोशनन् ।५ । १ । ८२ । एतौ निपात्यौ कौ वा । हे उशन । हे उशनन् हे उशनः।हे उशनसौ । उशनोभ्याम् । उशनस्सु । उशनःसु अनेहा अनेहसौ।हे अनेहः । वेधाः वेधसौ । हे वेधः । वेधोभ्याम् । असौ । ५ । १ । १६५ । अदसोऽसा-विति निपात्यते सौ । असौ । त्यदाद्यत्वे "एच्यतोऽपदे" इति पररूपे एत्वेऽपि च कृते मुत्वं भवति, प्रकृतित्यकार्यस्यान्तरंग-त्वात् । अमू । जशः शीत्वे एति च कृते । बह्वामीरेतः । ५ । ३ । ८६ । बह्वर्थं वर्तमानस्यादसोदात्परस्यैव ईकारादेशो भ-वति दस्य च मः । अमी । पूर्वोऽमि ततो मुत्वं । अमुम् । अमून् । मुत्वे कृते सुसंज्ञा प्रतिमुत्वस्यासिद्धत्वात् । न मुटाविधौ ५ । २ । २६ । कर्तव्ये कृते च मुभावो नासिद्धः । अमुना । अमू भ्याम् ३ । । अमीभिः । अमुष्मै । अमुष्मात् । अमुष्य । अमुयोः २ अमीषाम् अमुष्मिन् अमीषु । इति हलन्ताः पुंलिङ्गाः ।

## अथ हलन्तस्त्रीलिङ्गाः ।

**नहो धः** । ५ । ३ । ५१ । नहो हस्य धो भवति झलि प-दान्ते च । **नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ** । ४ । ३ । २१६ । क्विबन्तेषु परेषु पूर्वपदस्य दीः । उपनह्यत इति विग्रहः । उपानत्-द् । उपानहौ । उपानहः । उपानत्सु "क्विन्प्रत्ययस्येति हस्य कुत्वेन घः । उष्णिक्-ग् । उष्णिहौ । उष्णिहः उष्णिग्भ्याम् । द्यौः । दिवौ । दिवः । द्युभ्याम् । गीः । गिरौ । गिरः । एवं पूः । चतस्रः

चतसृणाम् । का । सर्वावत् ॥ यः सौ । ७ । २ । ११० । इदमो दस्य यो भवति सौ । "इदमोमः" इयम् । त्यदाद्यत्वे टाप् । "द" इति मः । इमे २ । इमाः २ । इमाम् । अनया 'हलि लोपः' आभ्याम् । आभिः । अस्यै । अस्याः । अनयोः । आसाम् अस्याम् । आसु । त्यदाद्यत्वं टाप् । स्या । त्ये । त्याः । एवं तद्, एतद् । वाक्, वाग् । वाचौ, वाग्भ्याम् वाक्षु । अप्शब्दो नित्यं बहुवचनान्तः । "अप्तृन्" इति दीर्घः । आपः । अपः । ५ । २ । १५० । अपस्तकारो भवति भादौ प्रत्यये परे । अद्भिः । अद्भ्यः । अपाम् । अप्सु । दिक्, ग् । दिशौ । दिशः । दिग्भ्याम् । ऋत्विगादिना क्विः । कुत्वं च । दृक्, दृग् । दृशौ । दृशः । दृग्भ्याम् । त्विट्, त्विड् । त्विषौ । त्विषः । त्विड्भ्याम् । ससजुषोरुः" रो इकोदीर्घ इति दीर्घः । सजूः । सजुषौ । सजूर्भ्याम् । आशीः । आशिषौ आशिषः । आशीर्भ्याम् । असौ । उत्वमत्वे । अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्यः २ । अमुष्याः । अमुयोः । अमूषाम् । अमुष्याम् ।

## ॥ अथ हलन्त नपुंसकलिङ्गाः ॥

"नपुंसकस्वमोः" । दत्वम् । स्वनडुत्, स्वनडुद् स्वनडुही २ । "चतुरनडुहोर्वा" । नपो झलः" इति नुम् । स्वनडुंहि । शेषं पुंवत् । वाः । वारी । वारि । वार्भ्याम् ॥ चत्वारि ॥ किम् कं । कानि । इदम् । इमे । इमानि । इन्वन्वादेशो नोमते ते प्रतिषेधं प्राप्ते द्वकारान्तत्वोच्चारणं नपि प्रयोजयति । एनत् । एने । एनानि । एनेन । एनयोः । अहः । "वा ङिश्योः" अह्नी, अहनी । अहानि । अहन् । ५ । ३ । ७७ । अहन्नित्यस्य पदस्य रि भवति । अहोभ्याम् । दण्डि । दण्डिनी । दण्डीनि । दण्डिना । दण्डिभ्यां । सुपथि ।

अत्वादि धे—सुपथी । सुपन्थानि ॥ ऊर्क्, ऊर्ग् । ऊर्जी । ऊर्ञ्जि-
। नरजानां स्फः ॥ तत् । ते । तानि । यत् । ये । यानि । एतत् ।
एते । एतानि ॥ शकृत् । शकृती । शकृन्ति । ददत् । ददती ।
**वा थे नपः** ।५।१।६७। थादुत्तरस्य नपुंसकस्य शतुरवयव
स्य नुम् वा भवति धे । ददन्ति । ददति । **शीम्योरात्** ।५।
१।५८। अवर्णान्ताद्धोः परस्य शतुरवयवस्य नुम्वा भवति शी-
म्योः परतः । तुदन्ती, तुदती । तुदन्ति । **श्यशपः** ।५।१।५६।
श्यशब्भ्यामुत्तरस्य शतुर्नित्यं नुम् भवति शीम्योः परतः । पचत्
पचन्ती । पचन्ति ॥ दीव्यत् । दीव्यन्ती । दीव्यन्ति । धनुः ।
धनुषी । सन्तेतिर्दीः । धनूंषि । धनुषा । धनुर्भ्याम् । एवं च
क्षुरादयः ॥ पयः । पयसी । पयांसि । पयसा । पयोभ्याम् ॥
सुपुम् । सुपुंसी । सुपुमांसि ॥ अदः । अमू । अमूनि शेषं पुंवत् ।

## इति हलन्तनपुंसकलिङ्गाः ।

**असंख्यं भिः** ।१।१।७४। असंख्यं भिसंज्ञं भवति ।
**सुपो भेः** ।१।४।१५०। भिसंज्ञकादुत्तरस्य सुप उ-
भवति। स्वर् अन्तर् । पुनर्,सुनुतर् । उच्चैस् । नीचैस् । शनैस्
ऋधक् । ऋते । युगपत् । आरात् । पृथक् । ह्यस् । श्वस् । दि-
वा । रात्रौ । सायम् चिरम् मनाक् । ईषत् । जोषम् । तूष्णीम् ।
बहिस् । अवस् । अधस् । समया । निकषा स्वयम् वृथा । नक्त-
म् । न । नञ् । हेतौ इद्धा । अद्धा । सामि । वत् । राजवत् । स-
न्निन्दवत् ॥ सना । उपधा । सनत् । सनात् । तिरस् । अन्तरा ।
अन्तरेण । ज्योक् । कम् । शम् । सहसा । विना । नाना । स्व-
स्ति । स्वधा । अलम् । वषट् । श्रौषट् वौषट् । अन्यत् । अस्ति

उपांशु । क्षमा । विहायसा । दोषा मृषा । मिथ्या । मुधा । पुरा । मिथो । मिथस् । प्रायस् । मुहुस् । प्रवाहुकम् । प्रवाहिका । आर्यहलम् । अभीक्ष्णम् ॥ साकम् । सार्धम् । नमस् । हिरुक् धिक् । अथ । अम् । आम् । प्रताम् । प्रशाम् । मा । माङ् आकृति गणोऽयं । निसंज्ञाश्च सर्वे—च वा आह । अह । एव । एवम् । नूनम् । शश्वत् । युगपत् । भूयस् । कूपत् । सूपत् । कुवित् । नेत् चेत । चण् । यत्र । कच्चित् । नह । हन्त । माकिम् । नकीम् । नकिः । माङ । नञ् । यावत् तावत् । त्वै । न्वै । द्वै । रै । श्रौषट् । स्वाहा । नेहा । वषट् । तुम् । तथाहि खलु । किल । अथो । अथो । सुष्ठु । स्म । आदह । [ निविभक्तीकप्रतिरूपकाश्च ] अवदत्तम् । अहंयुः । भवति । अ । आ । इ । ई । उ । ऊ । ए ऐ । ओऔ पशु । शुकम् । यथाकथाच । पाट् । प्याट । अङ्ग । है । हे । भोः अये । द्य । विषु । एकपदे । युत् । आयः चादिरप्याकृतिगणः ॥ कायास्तसिल्याद्यश्च प्राक् पश्चात् । [ तस्सातृत्राशः कृत्वसुकृद्धाऽऽम्क्त्वातुमइत्येतदन्ताः निसंज्ञा भवति । तस्—सर्वतः । सात्—भस्मसाद् भवति । त्रा—राजत्रा वसति । शस्—बहुशः । कृत्वस्—शतकृत्वः । सुच्—द्विः । वतराजवद्—वृत्तं । धा—बहुधा । आम्—कासांचक्रे । क्त्वा—कृत्वा । अम्—पूर्व भोजम् । तुम्—कर्तुम् व्रजति ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ॥
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥

केषांचिदाचार्याणां मते हलन्त शब्दानामाप्यो भवति—यथा निशा वाचा दिशा इत्यादि । इति निसंज्ञकानि ॥

ॐ

## ॥ अथ मिङन्ताधिकारः ॥

देव देवं जिनं नत्वा, सर्व सत्त्वा भय प्रदम् ॥
शब्द शास्त्रस्य सूत्राणां, लघुवृत्तिर्विरच्यते ॥ १ ॥

## । तत्रादौभ्वादयः ।

लट् । लिट् । लुट् ।(१)लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । एषु पञ्चमो लकारः २ छन्दो मात्र गोचरः ॥ लः कर्मणि च भावे च धेः २ । ४ । ५४ । (२)सकर्म काद्धो लंकाराःकर्मणि कर्तरि च भवन्ति(३)धे र्भावे कर्तरि च भवन्ति। सम्प्रति । २ । २ । १०१ । सम्प्रति काले धो र्लट् स्यात् । भू सत्तायाम्॥१॥ अटा वितौ । उच्चारण सामर्थ्याल्लस्य नेत्वम् । भूल् इति स्थिते। मिब्वस्मस्, सिप् थस् थ, तिप् तस् झोङ्, वहि महि, थासा थां ध्वं, ताता झङ् । २ । ३ । १६३ । मिबाद्यां लस्यादेशा भवन्ति । लोमं । १ । २ । १४१ । लादेशो मसंज्ञो भवति । ङ्ऽनुदात्ते तादः । १ । २ । ६ । ङ्कारेतोऽनुदात्ते तश्च धोर्द एव भवति । अस्त्वरितेतः कर्त्रौऽपेफले १ । २ ।

---

(१) लेट् लकार स्योदाहरणम्—जोषिषत्—इत्यादि ।

(२) फलव्यधिकरणव्यापारवाचकत्वम् सकर्मकत्वम् ।

(३) फलसामानाधिकरणव्यापार वाचकत्वम् ।अकर्मकत्वम् ।

६७। ञितः स्वरितेतश्चधोर्दोभवति कर्तृगामिनिक्रियाफले। मिङस्त्रिशोऽस्मद्युष्मदन्याः ।१।२२६१। मिङोमदसंज्ञानिश्रीणिश्रीणिवचनानि अस्मद् युष्मद् अन्य इत्येवं संज्ञानि भवन्ति। एकोद्विर्बहुश्चैकशः । १ । २ । ७४४ । यान्यस्मद्युष्मदन्य संज्ञानां संज्ञित्वेनोपात्तानि षट् त्रिकाणि तान्येकश एक द्वि बहु इत्येवं संज्ञानि भवन्ति साधनेस्वार्थे । १ : १५२ । स्वार्थे साधनेऽस्मदादयो ज्ञेयाः। मिङ् शिद्गः । २ । ४ । १२ । धो विहिता मिङः शितश्च स्या ग संज्ञका भवन्ति। कर्त्तरि श(१)प् । २ १ । ६४ । कर्तृ वाचिनि गे परतः शप् भवति। गाऽगधोः । ५ । २ । ८१ । गेऽगे च परे गोरेब् भवति, अवादेशः। भवति। भवतः। झोऽन्तः। ५ । १ । ३। त्यावयवस्य झकारस्यान्ता देशो भवति। एग्यतोऽपदे। भवन्ति। भवसि। भवथः। भवथ। यञ्यतो दीः। ५ । २। ९६ । यञादौ गे परे अकारान्तस्य गो दीर्भवति। भवामि। भवावः। भवामः। सभवति। तौभवतः। ते भवन्ति। त्वम् भवसि। युवां भवथः। यूयं भवथ। अहं भवामि। आवां भवावः। वयं भवामः। परो(२)क्षे लिट्। २ । २ ९५ । भूतानद्यतने परोक्षे वर्तमानाद्धो लिट् स्यात्। मानां णल

(१) शप्त्योमध्येभवति विकरणत्वात्।

(२) परोक्षत्वं च। साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम्।

वमभाऽथुमऽणलऽतुसुसः । २ । ४ । ६८ । लिटो मानां नथानां णलादयो भवन्ति । भू अ इति स्थिते । लुङ् लिटो वुँक् । ४ । ४ । ८० । लुङ् लिटो रचि परतो भुवो वुग् भवति । लिड्यच् कचि धोः । ४ । ३ । ७ । लिटि उचि कचि च परतो धोरादेरेकाचो द्वे स्तः । भूव् भूव् अ इति स्थिते । पूर्वोऽभ्यः । ४ । ३ । ६ । द्विरुक्तयोः पूर्वोऽवयवोऽभ्य संज्ञो भवति । हलोऽनादेः । ५ । २ । १६१ । भ्यस्य सम्बन्धिनो हलोऽनादेरुब् भवति । इति वकारस्योप् । प्रः । ५ । २ । १७५ । भ्यस्य सम्बन्धिनोऽचः प्रादेशो भवति । भवतेरः । ५ । २ । १७२ । भवतेश्च भ्योकारस्याकारो भवति लिटि । (१) झलां जशिति भकारस्य बकारः । बभूव । बभूवतुः । बभूवुः । लिट् । ५ । ४ । ९५ । लिट् चाग संज्ञो भवति । वलाद्यगस्येट् । ५ । १ । ८ । ४ । वलादेर गस्येडागमो भवति । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम । अन(२)द्यतने लुट् । २ । ३ । १४ । वर्त्स्यत्यनद्यतनेऽर्थे धो लुड् भवति । स्यतासी लृलुटोः । २ । १ । ३० । धोः स्यतासीत्येतौ त्यौ स्तो लृलुटोः । शपापवादः । लृ इति लृङ्लृटो र्ग्रहणम् । कोपोऽग एव ।

(१) अपदान्तेऽपि क्वचित् प्रवर्तते लक्ष्यानुरोधात् ।

(२) अतीतायाराज्ञेरन्त्यार्धेनागामिन्याः पूर्वार्धेन च सहितः कालोऽद्यतनः—तद्भिन्नो ऽनद्यतनः ।

२ । ४ । १४ । मिङ् शिङ्भ्यामन्यः शेषः अगसंज्ञक एव भवति । इट् । लुटोऽन्यस्य डारौरसः । १ । ४।१५४ । लुटोऽन्यसंज्ञकस्य डारौरसो भवन्ति । भविता । रि । ५ । २ । १५३ । तासेरस्तेश्च धोः रेफादौ सकारस्य लं भवति । तासस्त्योः स्वं । ५ । २ १५२ । तासेरस्तेश्च सकारस्य सं भवति सकारादौ त्ये । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि भवितास्वः । भवितास्मः । लृट् । २ । ३ । ११ । स(१) त्स्यंत्यर्थे वर्तमानाद्धोर्लृट् भवति । स्यः । इट् । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः । लोट् । २ । ३ । १५३ । विध्यादिष्वर्थेषु धो लोंट् भवति । आ(२)शिषि लिङ् लोटौ १ । ३ । १४९ । आशिष्यर्थे धो लोंट् भवति लिङ् च । एरुः । २ । ७५ । लोट इकारस्य उः । भवतु । तुह्योस्तातङ् वाशिषि । ५ । १ । ३० । आशिषि तुह्योस्तातङ् वा । परत्वात्सर्वादेशः । भवतात् । लोटो लङ् वत् । १ । ४ । ७२ । लोटो लङिव कार्यं स्यात् । मिप थस् थतसोऽस्तंतताम् । २ । ४ । ८२ । क्ङितां ताम्-

---

( १ ) भविष्यदर्थे-इत्यर्थः । भविष्यत्वं च । वर्तमान काल-वृत्ति प्रागभाव प्रतियोगित्वं ।

( २ ) आशीष्टार्थ शंसनमाशीः—

वादीनाममीदृश आदेशा भवन्ति । भवताम् । भवन्तु । **सेर्ह्यपिच्च** । २ । ४ । ७४ । लोटः सेर्हि सोऽपिच्च । **अतो हेः** । ४ । ४ । १०३ । अतः परस्य हेरुप् । भव, भवतात् । भवतम् । भवत । **मेर्निः** । २ । ४ । ७७ । लोटो मेर्निः स्यात् । **पिच्चाऽस्मदः** । २ । ४ । ७८ । लोटोऽस्मद आडागमो भवति पिच्च । **प्रागधो गे** । १ । २ । १४० । ते गिति संज्ञकाः धोः प्रागेव प्रवक्तव्याः । **आनि** । ५ । ४ । १०३ । प्रादिभ्यः परस्यानीत्यस्यनस्य णो भवति । प्रभवाणि । (दुरःषत्व-णत्वयो र्गित्वप्रतिषेधो वक्तव्यः । दुः स्थिति । दुर्भवानि । **ङितः सखं** । २ । ४ । ८० । अस्मद् संज्ञकस्य ङितः सकारस्य खं भवति । अन्तेल इति सकारस्य खं । भवाव भवाम । **अनद्यतने लङ्** । २ । १ । १०९ । अनद्यतने भूते धो लङ् भवति । **लुङ् लङ् लृङ्क्ष्वड्** । ४ । ४ । ६९ । धोरडागमो भवति लुङादिषु परतः । **एरमे** । २ । ४ । ८१ । ङितो लस्येकारस्य खं भवति म विषये । अभवत् । अभवताम् । अभवन् । अभवः । अभवतम् । अभवत । अभवम् । अभवाव । अभवाम । **विधिनिमन्त्रणा मन्त्रणाधीष्ट सम्प्रश्नप्रार्थने लिङ्** २ । ३ । १३७ । एष्वर्थेषु धोर्लिङ् स्यात् । **या सुण्मो ङित्** । २ । ४ । ८४ । लिङो म वि-विषयस्य या सुडागमो भवति ङिच्च । **लिङोऽनन्त्य सखं** । ५ । १ । १५३ । लिङोऽनन्त्यस्य सकारस्य खं स्याद् गे । इति प्राप्ते । **अतो येयः** । ५ । । १३९ । गोरतः परस्य

यास् इत्येतस्येय् भवति । एप् । वलि वयोः खं । ४ । ४ । ५५ । वकार यकारयोः खं भवति वलि क्वौ च परतः। भवेत् । भवेताम् । झेर्जुस् । ३ । ४० । ८८ । लिङो झेर्जुस् । स्यात् । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम । लिङाशिषि । २ । ४ । ९३ । आशिषि लिङ् अग संज्ञो भवति । किदाशिषि । २ । ४ । ८५ । आशिष्यर्थे लिङो या सुट् किद्भवति । स्कादेः स्कोन्ते चेति स खं । क्ङिति । १ । १ । १९ । किति गिति ङिति च परत एवैपौ न स्तः। भूयात्। भूयास्ताम् भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म । लुङ् । २ । २ । ३८ । धोर्भूते काले लुङ् स्यात् । सिल्लुङि । ३ । १ ५२ । धोर्लुङि परतो सिस्त्यो भवति । इश्णेप् पिब सुभूभ्यः सेर्मौ । १ ४ । १४९ । भूसंज्ञेभ्योभ्वादिभ्यश्चसेः खं भवतिमेपरतः। सुभवत्योर्मिङि ।५।२।८६। सुभू एतयोः गे मिङि परे एव् न । अभूत् । अभूताम् । अभूवन्। अभूः अभूतम् । अभूत । अभूवम् । अभूव । अभूम । माङि लुङ् ।२।३।१५१। माङि वाचि धोर्लुङ् भवति । सर्वलकारापादः । सस्मे लुङ् च । २ । ३ । १५२ । स्मेनसह माङि वाचि धोर्लुङ् भवति लङ् च । न माङ् योगे ।४।४।८७। अण् न स्यात् । मा भवान्भूत् मास्म भवत् । लिङ् हेतौ लृङ् क्रियाप्रवृत्तौ ।२। ३ । ११५ । लिङ् हेतौ वर्त्स्यति धोर्लृङ् स्यात् क्रियाया अप्रवृत्तौ सत्याम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् ।

अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम । सुवृष्टिश्चेद भविष्यत्तदा सुभिक्षम भविष्यत् । इत्यादि ज्ञेयम् । अत सातत्यगमने । २ । अतति । आ(१)ल्लः । ५ । २ । १६९ । चस्यादेरतो दी भवति लिटि । आत । आततुः । आतुः । आतिथ आतथुः । आत । आतिव । आतिम । अतिता । अतिष्यति । अततु । अरश्चेत्यैप् । आतत् । अतेत् । अत्यात् । अत्यास्ताम् । लुङि सिचि इडागमे च कृते । हल्यस्तसेः । ५।२।९३। अस्तेस्सेश्च परस्य (२)केवल हल ईड्भवति इटीटः । ४ । ४ । १९ । (३)इटः परस्य सेः खं स्यादीटि परे । आतीत् । आतिष्टाम् । धु त्रिकसेः । २ । ४ । ८९ । एभ्यः परस्य झेर्जुस् स्यात् । आतिषुः । आतीः । आतिष्टम् । आतिष्ट । आतीषम् । आतिष्व । आतिष्म । आतिष्यत् । षिधु गतौ । ३ । षो षि च । १ । ८९ । स्फरुः । १ । २ । ९१ । स्फ संज्ञके परे प्रो रुसंज्ञको भवति । दीश्च । १ । २ । १०० । दीश्च रु संज्ञो भवति । घेरूडः । ५ । २ । ८३ । घेरुड एप् भवति गागयोः परतः । स्वादेरिति स । सेधति । परत्वम् । सिषेध ।

---

(१) आदेः किम् । पपाच ।

(२) केवलं किम् । अस्ति ।

(३) इटः किम् । अकार्षीत् । ईटि किम् । अलाविषम् । धु संज्ञकस्योदाहरणम् । अबिभयुः । वेतेस्तु । अविदुः । वेतेर्लङ्येवेति केचित् । अविदन् ।

लिङ् स्फात् (१)कित् । १ । १ । ७९ । अस्फान्तात्परोऽपिल्लिट् किद्भवति । सिषिधतुः । सिषिधुः । सिषेधिथ । सिषिधथुः । सिषिध । सिषेध । सिषिधिव । सिषिधिम । सेधिता । सेधिष्यति । सेधतु । असेधत् । सेधेत् । सिध्यात् । असेधीत् । असेधिष्यत् । एवम् चिती संज्ञाने । ४ । शुच शोके । ५ । गद व्यक्तायां वाचि । गदति । ने(२)र्गदनद पतपदघुमास्यति हन्ति यातिवातिद्रातिप्सातिवपतिवहति शाम्यतिचिनोतिदेग्धिषु । ५ । ४ । १०० । नेः परस्य नेर्णत्वं भवति गदादिषु परतः । गदति । कुहोश्चुः । ५ । २ । १६३ । वस्य कवर्गहकारयोश्चुत्वं भवति । उङोऽञः । ५ । २ । ४ । उ(३)ङोऽकारस्यैब्भवति ञ्णिति परतः । जगाद । जगदतुः । जगदुः । जगदिथ । जगदथुः । जगद । जगाद, जगद । वाऽस्मणवाल् । ५।१।६८। अस्मदो णल् वा णित्स्यात् । जगाद जगद जगदिव । जगदिम । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् । अनोऽनादेर्वीः । ५ । १ । ८३ । अनादेरतो घेरैप् स्यादिडादौ मसौ परे । अगादीत्, अगदीत् । अगदिष्यत् । णद अव्यक्ते शब्दे । ७ । णो नः । ४ । ३ । ५४ ।

(१) अस्फात्किम् । ससंसे । अपित्किम् । बिभेदिथ ।

(२) नेर्णत्वमडव्यवायेऽपीति वचनात् । प्रण्यगदत् । इत्यपि सिध्यति ।

(३) उङः किम् । ध्वंसयति । अतः किम् । भेदयति ।

धोरादे (१)र्णस्य णो भवति । गेरसेऽपि विकुर्तेः । ५। ४। ८९। गेर्निमित्तात्परस्य विकुते र्नस्य णो भवत्यसेसेऽपि । प्रणदति । प्रणि नदति । नदति । ननाद । अतो हल्मध्येऽना-देशादेर्लिटि । ४। ४ ।१०८ । लिण्निमित्ता देशादिकं न भवति यद्गुरुस्तदवयस्याक्फ हल् मध्यस्थ स्यात एत्वं खस्य च खं भवति किति लिटि । नेदतुः । नेदुः । सेटि । ४। ४। ११८। प्रागुक्तं स्यात्से(७)टि लिटि । नेदिथ । नेदथुः । नेद ।ननाद ननद । नेदिव । नेदिम । नदिता । नदिष्यति ।नदतु । अनदत् । नदेत् । नद्यात् ।अनादीत् । अनदीत् । अनदिष्यत् । टुनदि समृद्धौ । ८ । इ-दितो नुम् । ५।१।३७। इदितो धोर्नुमागमो भवति । नन्दति । ननन्द । नन्दिता । नन्दिष्यति । नन्दतु । अनन्दत् । नन्देत् । नन्द्यात् । अनन्दीत् । अनन्दिष्यत् । अर्च पूजायाम् । ९ । अर्च-ति । तस्मात् नुट् । ५। २। ७० । द्वि हल् धोरातः परस्य नुट् स्यात् । आनर्च । आनर्चतुः । आनर्चुः । अर्चिता । अर्चिष्यति अर्चतु । आर्चत् । अर्चेत् । अर्च्यात् । आर्चीत् । आर्चिष्यत् । व्रज गतौ । १० । व्रजति । वव्राज । व्रजिता । व्रजिष्यति । अव्रजत् । व्रजेत् । व्रज्यात् । व्रजवद्धोऽतः । ५ । १ । ८७ । व्रजि वदोर्लकार रेफान्तस्य च धोरत ऐप् भवति मपरे सौ परतः ।

(१) आदेरिति किम् । शब्दार्थ अणधोर्लटि । अणति । खुभ्रोस्तु न । णकारीयति ।

(२) सेटि किम् । पपक्थ । धोः किम् । अमैत्सीत्–सेरिदि-त्वेऽपि न नुम् उच्चारण सामर्थ्यात् ।

अव्राजीत् । अव्रजिष्यत् । कटे वर्षावरणयोः । ११ । कटति । चकाट । चकटतुः । कटिता । कटिष्यति । कटतु । अकटत् । कटेत् । कट्यात् । ह्म(१)यन्तक्षणश्वसजागृणिश्व्येदि-ताम् । ७ । २ । ५ । ह्मयान्तस्य क्षणादेर्ण्यन्तस्यश्वयतेरेदिताञ्चवृद्धिर्न स्यादिडादौ सौ । अकटीत् । अकटिष्यत् । गुपू रक्षणे । १२ । गुपूधूपविच्छिपणिपनिभ्य आयः । ३ । १ । २८ । एभ्य आयप्रत्ययो भवति स्वार्थे । सनाद्यन्ता धातवः । ३ । १ । ३२ । येऽनुक्रान्ताः सन्नादयस्तदन्ता शब्दा धातुसंज्ञा भवन्ति । धातुत्वाल्लडादयः । गोपायति । आयादय आर्धधातुके वा । ३ । १ । ३१ । अर्धधातुके परत आयादयो वा भवन्ति । आमो मस्य नेत्वम् । उच्चारण सामर्थ्यात् । कास्प्रत्ययादाममन्त्रे लिटि । ३ । १ । ३५ । कासेरनेकाज्भ्यश्चाम् स्याल्लिटि । सूत्रे प्रत्यय ग्रहणं स्पष्टार्थम् । अतः खम् । ६ । ४ । ४८ । अकारान्तस्य खं भवत्यगे परतः । आमः । २ । ४ । ८१ । आमः परस्य खं भवति । लिङ्वदनुप्रयुज्यते । ३ । १ । ४० । कृञिति प्रत्याहारेण कृभ्वस्तीनां ग्रहणम् । लिङ्वदामन्तात् कृभ्वस्तयोऽनुप्रयुज्यन्ते । उरत् । ७ । ४ । ६६ । चस्य ऋवर्णस्य अका-

(१) अग्रहीत् । अधमीत् । अह्वयीत् । अक्षणीत् । अश्वसीत् । अजागरीत् । औनयीत् । अश्वयीत् । अकटीत् इति सूत्रोदाहरणानिशेयानि ।

(२) गोपायति । धूपायति । विच्छायति । पणायति । पनायति । पणेस्तुतावेव आयप्रत्ययः । व्यवहारे तु न ।

रादेशो भवति । ऐप् । गोपायाञ्चकार । द्वित्वात्परत्वाद्यणि प्राप्ते । द्वित्वेऽचि । १ । १ । ५९ । द्वित्व निमित्तेऽचि योऽऽदेशः स स्थानिवद्भवति द्वित्वे कर्तव्ये । गोपायाञ्चक्रतुः । (१)एकाचोऽनुदात्तात् । ५ । १ । ११५ । योधुरेकाजनुदात्तश्च ततः परस्यागस्थेण् न भवति । गोपायाञ्चकर्थ । गोपायाञ्चक्रथुः । गोपायाञ्चक्र । गोपायाञ्चकार, गोपायाञ्चकर । गोपायाञ्चकृव । गोपायाञ्चकृम । गोपायाम्बभूव । गोपायामास । जुगोप । स्वरतिसूङ्धूञ् सूत्यूदितः । ५ । १ । ९२ । स्वरत्यादेरुदितश्च परस्य वलादेर गस्येड् वा स्यात् । जुगोपिथ जुगोप्थ । गोपायिता गोपिता गोप्ता । गोपायिष्यति, गोपिष्यति, गोप्स्यति । गोपायतु । अगोपायत् । गोपायेत् । गोपाय्यात् । अगोपायीत् । नेटि । ५ । १ । ८० । इडादौ सौ परे ऐप् न भवति । अगोपीत् अगौप्सीत् । झलो झलि । ५ । ३ । ६२ । झ(२)लः परस्य सस्य खं भवति झलि । अगौप्ताम् । अगौप्सुः । अगौप्सीः । अगौप्तम् । अगौप्त । अगौप्सम् अगौप्स्व । अगौप्स्म । अगोपायिष्यत् अगोपिष्यत् अगोप्स्यत् क्षि क्षये । १३ । क्षयति । चिक्षाय चिक्षियथुः । चिक्षियुः । एकाच इति निषेधे प्राप्ते । (३)कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि । ५ । १ ।

(१) एकाचः किम् । अवधीत् । अनुपेशनिवृत्त्यर्थमदंतोवधिः ।

(२) झलः किम् । अमंस्थाः । झलि किम् । अमिंसाताम् ।

(३) चकृव सस्रुव । बभृव ववृव । तुष्टुव । दुद्रुव सुस्रुव । इति सूत्रोदाहरणानि ।

११९ । एभ्य एव लिटि नेड् भवत्यन्यस्मादनिटोऽपि भवति । वौपदेशोऽत्त्व दाच सृजि दृशास्ताभौ नित्यानिट-स्थेऽक्याद: । ५ । १०८ । नित्यानिट्तास्म्य अकारवद्भ्योऽ अंतेभ्यः सृजदृशिभ्यां च थे वेड् भवति । चिक्षयिथ । चिक्षेथ । चिक्षियथुः । चिक्षिय । चिक्षाय, चिक्षय । चिक्षियिव । चिक्षियिम । क्षेता । क्षेष्यति । क्षयतु । अक्षयत् । क्षयेत् । दीरकृड्डे । ५ । २ । १३४ । गोरजन्तस्यदीर्भवति यादौत्येपरे नतु कृतिगेच । क्षीयात् । साचैस्मे । ५ । १ । ७७ । इगन्तस्य गोरैभवति मपरे सौ परे । अक्षैषीत् । अक्षेष्यत् । तप संतापे । १४ । तपति । तताप । तेपतुः । तेपुः । तेपिथ । तत्प्थ । तेपिव । तेपिम । तप्ता । तप्स्यति । तपतु । अतपत् । तपेत् । तप्यात् । अताप्सीत् । अताप्ताम् । अतप्स्यत् । क्रमुपाद विक्षेपे । १५ । वा भ्राश-भ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः । २ । १ । ६६ । एभ्यो गे परतः श्यो वा स्यात् । पक्षेशप् । क्रमो(१)मे । ५ । २ । ७४। क्रमः शिति म निमित्ते दीर्भवति । क्राम्यति, । क्रामति । चक्राम । क्रमिता । क्रमिष्यति । क्राम्यतु, क्रामतु । अक्राम्यत् , अक्रामत् । क्राम्येत् ।

क्रामेत् । क्रम्यात् । अक्रमीत् । अक्रमिष्यत् । पा पाने । १६ । पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजि-घ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । ५ । २ । ७६ । पादीनां पिबादयो भवन्ति शिति त्ये परे । पिबादेशोऽद-

(१) मे किम् । आक्रमते ।

न्तस्तेन न पप्। पिबति। आतो णल औ ।५।२।३७। अदन्ताद्धोर्णल औकारादेशः स्यात्। पपौ। इटि चात्खं ४।४।६४। इथ्यजादौ च क्ङित्यगे परत आकारांतस्य खं भवति। पपतुः पपुः। पपिथ। पपाथ। पपथुः पप। पपौ। पपिव। पपिम। पाता। पास्यति। पिबतु अपिबत्। पिबेत्। लिङ्येत् ।४।४।६५। घ्वादीनामेद्भवत्यगे क्ङिति लिङि। पेयात्। भुभूस्थेत्यादिना से रुप्। अपात्। अपाताम्। उस्य-पदे ।४।३।८३। अवर्णान्तादुसि परतः परो भवत्य(१)पदे। अपुः। अपास्यत्। ग्लै (१) हर्षक्षये। १७। ग्लायति। एचोऽशित्याः ।४।४३।३८। (२)एजंतस्य धोरात्वं भवति न तु शिति। जग्लौ। ग्लाता। ग्लास्यति। ग्लायतु। अग्लायत्। ग्लायेत्। वाऽस्थः स्फादेः ।४।४।६६। आकारान्तस्य(३) स्फादेः स्थाहीनस्य लिङ्येद्वा स्यात्। ग्लेयात्। ग्लायात्। यम रम नमातः सक् च ।५।१।३२। एषां सक्सेरिट् च भवति से। अग्लासीत्। अग्लास्यत्। ह्वृ कौटिल्ये। १८ ह्वरति। स्फाद्यृ दर्तेरेप् ।५।२।३८। स्फादेः ऋतोऽतेश्च लिटि परत एप् भवति। उङ पेप्। जह्वार। जह्वरतुः। जह्वरुः। जह्वरथुः। जह्वर। जह्वार, जह्वर। जह्वरिव। जह्वरिम। ह्वर्ता।

---

(१) अपदे किम्। का उस्रा, कोस्रा।

(२) एचः किम्। कर्ता। अशिति किम्। गायति।

(३) स्फादेः किम्। यायात्।

ऋदृधन इट् स्ये । ७ । १ । ४४ । ऋतो हन्तेश्चागे स्येइट् भवति । हरिष्यति । हस्तु । स्फाशृदर्तेरस्कुरेप् ५ । २ । १२१ । स्फादेः स्कु वर्जितस्य ऋतोऽर्तेश्चैप्भवति । हर्यात् । अहर्षीत् । शु श्रवणे । १९ । श्रोः शृः । २ । १ । ८८ । श्रोः श्रुरित्यस्य देशः शनुस्त्यश्च स्यात् । शृणोति । गोऽपित् । १ । १७८ । पिद्वर्जिते गे परेङिद्वद् भवति । शृणुतः । (४)हुश्नुवोर्गे यः । ४ । ४ । ८१ । हुश्नुवोरनेकाचोऽस्कपूर्वस्योवर्णस्य यण् स्याद् जादौ गे परतः । शृण्वन्ति । शृणोषि । शृणुथः । शृणुथ । शृणोमि । वा म्वोः खं । ४ । ४ । ९६ । अस्का(५)दुतः खं वा स्यात् मकारवकारयोः परतः । शृण्वः शृणुवः । शृण्मः शृणुमः । शुश्राव । शुश्रुवतुः । शुश्रुवुः । शुश्रोथ । शुश्रुवथुः । शुश्रुव । शुश्राव, शुश्रव । शुश्रुव । शुश्रुम । श्रोता । श्रोष्यति । शृणोतु । शृणुतात् शृणुताम् । शृण्वन्तु (६)उतश्त्यादस्कात् । ४ । ४ । २५ । अस्कपूर्वात् त्योतो हेर्लुप् । शृणु, शृणुतात् । शृणुतम् । शृणुत । एप् वादेशौ । शृणवानि शृणवाव । शृणवाम । अशृणोत् । अशृणुताम् । अशृण्वन् । अशृणोः । अशृणुतम् । अशृणुत । अशृणवम् । अशृण्व । अशृणुव । अशृण्म अशृणुम । शृणुयात् । शृणुयाताम् । शृणुयुः । शृणुयाः । शृणुयाताम् । शृणुयात । शृणु-

(४) हुश्नवोः किम् । यो युवति । गे किम् । जुहुवतुः । अस्कादेः किम् अप्नुवन्ति ।

(५) अस्कात्किम् । शक्नुवः । त्ये किम् । युवः ।

(६) उतः किं । लुनीहि । त्यात्किम् । युहि ।

याम् । शृणुयाव । शृणुयाम । श्रूयात् । अश्रौषीत् । अश्रोष्यत् । गम्लृ गतौ । २० । गमिषु यमां छः । ५ । २ । ७५ । एषां छोऽन्तादेशः स्याच्छिति । गच्छति । जगाम । गमहनजनखनघसोऽनाङि । ४ । ४ । १४ । गमादीना मुङः खं भवत्यजादौ (७)क्ङिति न त्वङि । जग्मतुः । जग्मुः । जगमिथ । जगन्थ । जग्मथुः । जग्म । जगाम, जगम । जग्मिव । जग्मिम । गन्ता । (८)गमेरिण्मे । ५ । १ । १०६ । गमेर्मनिमित्तस्य सकारादेरिड् भवति । गमिष्यति । गच्छतु । अगच्छत् । गच्छेत् । गम्यात् । द्युत्पुषादिलृत्सार्तिशास्त्यर्तेर्मे । २ । १ । ४८ । द्युतादिभ्यः पुषादिभ्यः लृकारेद्भ्यः सस्त्यर्तिभ्यश्च लुङि मे परतोऽङ् स्यात् । अगमत् । अगमिष्यत् ।

॥ इति भ्वादिनः ॥

## अथ दपादिनः ।

एधै वृद्धौ ॥ १ ॥ (१)टिदृटेरेः । २ । ४ । ६५ दितां लकाराणां दस्य टेरेत्वं स्यात् । एधते ॥ आतो(२) ऽपः । ५ । १ ।

---

(७) क्ङिति किम् । गमनम् । अचि किम् । गम्यते । अङि किम् । अगमत् ।

(८) गमेः किम् । चेष्यति । मे किम् । सङ्गंस्यते ।

(१) तादिसादपरस्य विशेषितत्त्वात् पचमान इत्यादौ एत्वं न ।

(२) आतः किम् । पचन्ते । पिद्ग्रहणेति किम् । पचावहे । अतः किम् । चिन्वाते ।

११ । अतः परस्य षिङ्ङितस्यात इय् भवति । एधेते । एधन्ते ॥ थासः से । २ । ४ । ६८ । ट्तिो लस्य थासः से स्यात् । एधसे । एधेथे । एधध्वे । एध्यतोऽपदे । एधे । एधावहे । एधामहे ॥ मरोरिजादेः । २ । १ । ३२ । सरोरिजादेर्धो राम् भवति लिटि परतः॥ आःक्रञ् तस्कृञः । १।२।५८। आमंतस्यैव धोस्तत्क्रञो दो भवति॥ लिटस्तश्चयोरेशिरे ।२।४।६७। लिडादेशयो स्तझयोरेश् इरे च परौ स्तः । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे । इणः षीध्वं लुङ् लिटां धो ढः । ५ । ४ ६० । इणः परेषां षीध्वं लुङ् लिटां धस्य ढो भवति । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । एधामास । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे । धि । ५ । ३ । ४३ । धादौ त्ये परे सस्य खं स्यात् । एधिताध्वे । एति हः । ५ । २ । १५४ । तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ॥ आमेतः । २ । ४ । ७६ । लोट एकारस्याम् भवति । एधताम् । एधेताम् । एधन्ताम् ॥ स्वोवामौ । २ । ४ । ७७ । सवाभ्यां परस्य लोडेतः क्रमाद्वामौ स्तः । एधस्व । एधेथाम् । एधध्वम् ॥ एत ऐ । २ । ४ । ७९ । लोडस्मदः एकारस्यैत्वं स्यात् । एधै । एधावहै । एधामहै । अटश्च । ऐधत । ऐधेताम् । ऐधन्त । ऐधथाः । ऐधेथाम् ऐध-

ध्वम्। ऐधे। ऐधावहि। ऐधामहि॥ **लिङः सीयुट्** ।२।४।८३। लिङादेशानां सीयुडागमो भवति। सत्वं। एधेत। एधेयाताम्। **रन्नझ्झटः** ।२।४।८६। लिङो झस्य इटश्च रन् अत् इत्येतावादेशौ भवतः। एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्। एधेय। एधेवहि। एधेमहि। **सुट् तथोः** ।२।४।८७। लिङस्तथोः सुट् स्यात्। षत्वं। अगत्वात् सत्वं न। एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट ऐधिषाताम्॥(३)**देऽनतः** ।५।१।५। दविषये ऽनतः परस्य झस्याद् भवति। ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। ऐधिढ्वम्। ऐधिषि ऐधिष्वहि। ऐधिष्महि। ऐधिष्यत। ऐधिष्येताम्। ऐधिष्यन्त। ऐधिष्यथाः। ऐधिष्येथाम्। ऐधिष्यध्वं। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। कमु कान्तौ। **कमृते णिङीयङ्** ।२।१।४। अभ्यां यथासंख्यं णिङ् ईयङ् इत्येतौ स्वौ भवतः। ङित्वात्तङ्। कामयते। (४)**अयामन्तात्वाय्येत्न्युष्णु** ।४।४।४५। आम् अन्त आलु इत्नु एषु णेरयादेशः स्यात्। कामयाञ्चक्रे। "वा ऽगे" इति णिङ् वा। चकमे। चकमाते। चकमिरे। चकमिषे। चकमाथे। चकमिढ्वे। चकमे। चकमिवहे। चकमिमहे। कामयिता।

(३) कारयाञ्चकार। मंडयंतः। स्पृहयालु। स्पृहयाय्यः। स्तनयित्नुः। इमानि सूत्रोदाहरणानि।

(४) दे किम् चिन्त्यमिति।

कामयितासे । कमिता । कामयिष्यते । कमिष्यते । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट ॥ **षेटः** । ५ । ४ । ६१ । इ(१)णः परो य इट् ततः परेषां षीध्वं लुङ् लिटां धस्य घा ढः । कामयिषीढ्वम् । कामयिषीध्वं । कमिषीष्ट । कमिषीध्वं ॥ **णिश्रिद्रुस्रुकमेः कर्त(२)रि कच्** । २ । १ । ५६ । ण्यन्तेभ्यः श्र्यादिभ्यश्च कर्तृवाचिनि लुङि परे कच् भवति ॥ **णेः** । ४ । ४ । णेः खं भवत्यगे परतः ॥ **णौ कच्युकः प्रो ऽशास्वकृद्दितः** । ५ । २ । १२८ । कच् परे णौ (३)उकः प्रो भवति । लिङुचक्वि धोरितिद्वित्वम् । **धौ कच्यन क्ख्षेसन्वत्** । ५ । २ । १२९ । कच्यक कपरे धौ सनीवकार्यं भवत्यनकखे । **सन्यतः** । ५ । २ । १७६ । धस्यातइड् भवति सनि । **घेर्दीः** । ५ । २ । ११० । धस्यघेर्दीर्भवतिस न्वद्भावविषये । अचीकमत । णिङभावपक्षे ।

अचकमत । अकामयिष्यत । अकमिष्यत । अय गतौ ॥ ३ ॥ अयते । **गेरयौ** ५ । ३ । ५२ । गेर्योरेफस्तस्य लादेशो भवत्य ऽयतौ परे । प्लायते । पलायते ॥ **दयायासः** २ । १ । ३३ । दय् अय् आस् एभ्य आम् स्याल्लिटि ॥ अयाञ्चक्रे । अयिता । अ-

(१) इणः किम् । आसिषीध्वम् ।

(२) कर्तरि किम् । अकारयिषता देवदत्तेन ।

(३) णाविति किम् । अलीलवदित्यादौ वचन सामर्थ्यादन्तरङ्गमपि णेर्पं बाधित्वाप्रः स्यात् । ततश्चाः घादेशे अलीलुव दित्यनिष्टं स्यात् ।

यिष्यते । श्रयताम् । आयत । अयेत । अयिषीष्ट "वेट्" । अयिष्यत । शुतदीप्तौ ॥ ४ ॥ द्योतते ॥ द्युतिस्वाप्योर्जिः ५। २। १६६ । अनयोः त्वस्य इक् स्यात्लिटि । दिद्युते ॥ द्युद्भ्यो लुङि । १। २। ८६ । द्युतादिभ्यो लुङि परे वा मं भवति । (१)अद्युतत् । अद्योतिष्ट । अद्योतिष्यत । एवं श्विताङ् वर्णे ॥ ५ ॥ ञिमिदाङ् स्नेहने ॥ ६ ॥ ञिष्विदाङ् स्नेहनमोचनयोः ॥ ७ ॥ रुचं अभिप्रीतौ च ॥ ८ ॥ घुटे परिवर्त्तने ॥ ९ ॥ शुभे दीप्तौ ॥ १० ॥ क्षुभे संक्षोभे ॥ ११ ॥ णभुङ् भ्रंसुङ् अवस्रंसे ॥ १२ ॥ ध्वंसुङ् गतौ च ॥ १३ । स्रम्भुङ् विश्वासे । १४ । वृतुङ् वृत्तौ । १५ । वर्तते । ववृते वर्तिता ॥ स्यसनोर्वृद्भ्यः । १। २। ७७ । वृतादिभ्यः सनि स्ये च वा मं भवति ॥ न वृद्भ्यः । ५। १। ११६ । वृतादेः परस्य मस्य नेड् भवति ॥ वर्त्स्यति । वर्तिष्यते । वर्तताम् । अवर्तत । वर्तेत । वर्तिषीष्ट । अवर्तिष्ट । अवर्त्स्यत् । अवर्तिष्यत । ददै दाने । १९ । ददते ॥ न (२)शसददवादीनाम् । ४। ४। ११५ । शसेर्ददे र्वादीनां लिट्येत्वं तस्य खं च न स्यात् । ददे । ददाते । ददिरे । ददिता । ददिष्यते । ददताम् । अददत । ददेत । ददिषीष्ट । अददिष्ट । अददिष्यत । त्रपूङ् लज्जायाम् ॥ २० ॥ त्रपते । फलिभजोः । ४। ४। ११० ॥

(१) अत्र द्युत्पुषादिनाऽङ् ।

(२) शशसतुः । ददे ववमतु । शशसतुः । इति सूत्रोदाहरणानि ।

मन्वर्णः । ४ । ४ १११ । पथागतपरं चस्य च स्वं च भवति किति लिटि सेटि थेकवरतः । श्रेपे । श्रपिता, त्रसा । श्रपिष्यते, त्रस्यते । श्रपताम् । अश्रपत श्रपेत । श्रपिषीष्ट । त्रप्सीष्ट । अश्रपिष्ट । अत्रप्त । अश्रपिष्यत, अत्रप्स्यत ।

॥ इति दपदिनः ॥

## ॥ अथोभयपदिनः ॥

श्रिञ् सेवायाम् । १ । श्रयति, श्रयते । शिश्राय, शिश्रिये । श्रयि तासि । श्रयितासे । श्रयिष्यति । श्रयिष्यते । श्रयतु, । श्रयताम् । अश्रयत् । अश्रयत । श्रयेत्, । श्रयेत । श्रीयात् , । श्रयिषीष्ट । कच् । अशिश्रियत् । अशिश्रियत । अश्रयिष्यत् , । अश्रयिष्यत भृञ् भरणे २ । भरति, भरते । बभार बभ्रतुः बभ्रुः बभर्थ बभृव बभृम बभ्रे बभृषे भर्तासि भर्तासे भरिष्यति, भरिष्यते भरतु, भरताम् अभरत् अभरत भरेत्, भरेत ॥ रिङ् यश् लिङ् वो ५ । २ १३७ । ऋकारांतस्य रिङ् भवति यादगो(१) लिङि च रिङ् विधानसामर्थ्याद्दीर्घं । भ्रियात् । उः १ । १ । २ । ८६ । ऋवर्णान्तस्य धोः सकारादी सिली दे किदु वदू कार्य्यं भवति । भृषीष्ट भृषीयास्ताम् अभार्षीत् । प्रा(२)द्धोः । ५ ।३।४५ । शांताद्द गोः परस्य सकारस्य खं स्यात् झलि । अभृत अभृषाताम् अभरिष्यत् अभरिष्यत । हृञ्

---

(१) अगे किम् । बिभृयात् । यादीकिम् । कृषीष्ट ।

(२) प्रात्किम् । अच्योष्ट । गोः किम् । अलाविषाताम् । झलिकिम् । अकृपाताम् ।

हरणे ३। हरति, हरते। जहार। जहर्थ। जह्रिव। जह्रिम। जह्रे हर्तासि। हर्तासे। हरिष्यति, हरिष्यते। हरतु, हरताम्। अहरत। हरेत्। हरेत। ह्रियात्। हृषीष्ट। हृषीयास्ताम्। अहार्षीत्। अहृत। अहरिष्यत्, अहरिष्यत॥ धृञ् धारणे ४। धरति, धरते। णीञ् प्रापणे ५। नयति, नयते। डुपचीञ् पाके। ६। पचति, पचते। पपाच। पेचिथ, पपक्थ। पेचे। पक्तासि, पक्तासे। भजीञ् सेवायाम् ७। भजति, भजते। बभाज, भेजे। भक्तासि, भक्तासे। भक्ष्यति, भक्ष्यते। अभाक्षीत्। अभक्त। अभक्षाताम्। यजीञ् देवपूजासङ्गतिकरणदानेषु। ८। यजति, यजते॥ वस्यैषां क्ङिटि। ४। ३। १२। वस्येग्भवति वच्यादीनां ग्रहादीनां चक्ङिटि। इयाज॥ वचि(१)स्वपियजादीनां किति। ४। ३। ११। वचिस्वप्यो र्यजादीनां चेक् स्यात्किति लिटि। ईजतुः। ईजुः। इयजिथ, इयष्ठ। ईजे। यष्टा। षढोः कसि। यक्ष्यति, यक्ष्यते। इज्यात्, यक्षीष्ट। अयाक्षीत्। अयष्ट। वहप्रापणे। ९। वहति, वहते। उवाह। ऊहतुः ऊहुः। उवहिथ॥ झथोर्धोऽधः। ५। ३। ५६। अदधातेः झषन्तात्तथो र्धष् स्यात्॥ ढूले पूर्वस्याणो दीः। सहो वहोऽस्यौ। ४। ४। १०३। उवोढ। ऊहे। वोढा। वक्ष्यति। अवाक्षीत्। अवोढाम्। अवाक्षुः अवाक्षीः। अवोढम्। अवो-

(१) स्वाधिकारविहित त्यप्रत्येग्भवति। नेह। वाचमिच्छती तिवा च्यति।

ढ । अवाक्षम् । अवाक्ष्व । अवाक्ष्म । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवक्षाथाम् । अवोढ्वम् । अवक्षि । अवक्ष्वहि । अवक्ष्महि ।

इति भ्वादयः ॥ ४ ॥

## अथादादयः ।

अदो भक्षणे । १ । **लुगपोऽदादिभ्यः** । २ । ४ । ७२ । अदादिभ्यो धुभ्यः परस्य शप् उल्लुगति । अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः । **लिटि वा** । २ । ४ । ४० । अदो घस्लृ वा स्याल्लिटि । जघास । उपधा । **शासिवसिघसीनां** । ८ । ३ । ६० । इण्(१)कुभ्यां परस्यैषां सस्य षो भवति । घस्य षत्वम् । जक्षतुः । जक्षुः । जघसिथ । जक्षथुः । जक्ष । जघास, जघस । जक्षिव । जक्षिम । आद । आदतुः । आदुः । **आऽत्यदेर्ण सृजदृशां-ऽनिषधानिट् तासश्चेऽस्कन्यायैः** । ७ । २ । ६७ । निस्यानिट् ताभ्योऽकारवद्भ्योऽतेभ्यः सृजृदृशिभ्यां च थेडे भवति स्कादीन्विहाय । आदिथ । **हुझल्भ्यां(२) हेर्धिः(२)** ६ । ४ । १०१ । होझलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि अत्तात् । अत्तम् । अत्त । अदानि । अदाव अदाम । **अदोऽट्** । ७ । ३ । १०० । अदः

(१) इणकुभ्यामितिकिम् । शास्ति । वसति । जघास ।

(२) हुझलभ्य इति किम् । क्रीणीहि । वेरिति किम् । भिन्ताम् ।

परस्यग संज्ञकस्य (१)केवलालोऽड् भवति। आदत्। आत्ताम्। आदन्। आदः। आत्तम्। आत्त। आदम्। आद्व। आद्म। अद्यात्। अद्याताम्। अद्युः। अद्यात्। अद्यास्ताम्। अद्यासुः। **घस्लृ लुङ्घञसनऽद्युः** ।१।४।१११। अदे र्घस्लृ स्याल्लुङि घञि सनि घञि च परतः। अघसत्। आत्स्यत्। हन हिंसागत्योः।२। हन्ति। **अनुदात्तोपदेशवनतितनोत्यादीनां ङ खं झलि क्ङिति** ।४।४।३६। इत्येतानामेषां वनतेश्च खं (२)स्याऽझलादौ किति ङिति परे। यमि, रमि, नमि, गमि, हनि, मन्यतयाऽनुदात्तोपदेशाः। तनु, क्षणु, क्षिणु, ऋणु, तृणु, घृणु, वनु, मनु, तनोत्यादयः। हतः। घ्नन्ति। हंसि। हथः। हथ। हन्मि। हन्वः। हन्मः। जघान जघ्नतुः जघ्नुः। **घ्यात्** ।५।२।६०। खात्परस्य हंते हस्य कुत्वं भवति। जघनिथ। जघन्थ। जघ्नथुः जघ्न। जघान, जघन। जघ्निव। जघ्निम। हन्ता। हनिष्यति। हन्तु। हतात्। हताम्। घ्नन्तु। **हंतेर्जः** ।४।४।२५। हंतेर्जा देशो भवति ही परे। **असिद्धवदत्रा भात्** ।४।४।२०। इत ऊर्ध्वमापादसमाप्तेराभीयम्। समानाश्रये कर्तव्ये तदसिद्धम्। इति जस्यासिद्धत्वान्न हे खप्। जहि, हतात्। हतम्। हत। हनानि। हनाव। हनाम। अहन्। अहताम्। अघ्नन्। अहतम्।

(१) केवलमिति किम्। अत्ति।
(२) झलादाविति किम् शम्यते।
उपदेशे किम्। गतिः इह च यथास्यात।

अहत । अहनम् । अहन्व । अहन्म । हन्यात् । हन्याताम् । हन्युः अगे । १ । ४ । १०९ । इत्यधिकृत्य । हनो वध लिङि । १ । ४ । ११५ । स्मृतम् । लुङि । १ । ४ । ३२ । हन्तेर्लुङि वधादेशो भवति । वध्यात् । वध्यास्ताम् । वध्यासुः । अवधीत् । अहनिष्यत् । यु मिश्रणे । ३ । इल्यैप(१) वुष्युतः । ५ । २ ८७ । उद्विषये उकारस्यैप् पिति हलादौगे । यौति युतः । युवन्ति । यौषि । युथः । युथ । यौमि । युवः । युमः । युयाव । यविता । यविष्यति । यौतु । युताम् । अयौत् । अयुताम् । अयुवन् । युयात् । "हल्यैवुष्युत." इत्यैप् न पिच्च ङिन्नेति निषेधात् । युयाताम् । युयुः । यूयात् । यूयास्ताम् । यूयासुः । अयावीत् । अयविष्यत् । या प्रापणे । ४ । याति । यातः यान्ति । ययौ । याता । यास्यति । यातु । अयात् । अयाताम् । लङो वा । २ । ४ । ९३ । आतः परस्य लङो भेर्जुस् वा भवति । अयुः, अयान । यायात् । यायाताम् । यायुः । यायात् । यायास्ताम् । यायासुः । अयासीत् । अयास्यत् । वा गतिबन्धनयोः । ५ । भा दीप्तौ । ६ । ष्णा शौचे । ७ । श्रा पाके । ८ । द्रा कुत्सायां गतौ । ९ । प्सा भक्षणे । १० । रा दाने । ११ । ला आदाने । १२ । दाप् लवने । १३ । पा रक्षणे । १४ । ख्या प्रकथने । १५ । अयं ग एव प्रयोक्तव्यः । विद ज्ञाने । १६ । विदो लटो वा । २ ।

(१) उतः किम् । पाति । उद् विषये किम् । सुनोति । हलादौ किम् यवानि । पिति किम् । युतः ।

४ । ६९ । वेत्तेः परस्य लटो मानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे । वेत्ति । वित्तः । विदन्ति । वेत्तजागृविद्राम् २।१।३५। एभ्यो लिटि आम्वा भवति । विदाञ्चकार । विवेद । वेदिता । वेदिष्यति । विदाङ्कुर्वन्तु वा । २ । १ । ३७ । वेत्तेर्लोटि आम् लोट उप् एष्व भावो लोडन्त करोत्यनु प्रयोगश्च वा निपात्यते । प्रथमपुरुष बहुवचनेऽविवक्षिते । कृञ् तनादेरुः । २ । १ । ७४ । कृञस्तना दिभ्यश्च उस्त्यो भवति । शपोऽपवादः । विदांकरोतु । गेऽत उत् । ५ । ४ । ९८ । कृञोऽत उद्भवति गे क्ङिति परतः । विदाङ्कुरुतात् । विदाङ्कुरुताम् । विदाङ्कुर्वन्तु । विदाङ्कुरु । विदाङ्करवाणि । अवेत् । अविताम् । अविदुः । दः । ५ । ३ । ८२ । धोर्दकारस्य पदान्तस्य रिर्वा भवति सिपि । अवेः । अवेत् विद्यात् । विद्याताम् । विद्युः विद्यात् । विद्यास्ताम् । अवेदीत् । अवेदिष्यत् । अस भुवि । १७ । अस्ति । श्नसोरल्लोपः । ५ । ४ । १०० । श्नसोरस्तेश्चातः खं स्यात् क्ङिति(१) गे परे । स्तः । सन्ति । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । णि प्रादुर्भ्यां षऽस्यऽस्ते । ५।४।९८। णिभ्यः (२)प्रादुसश्चास्ते सस्य षो यकारेऽचि परे । निष्यात् । प्रनिषन्ति । प्रादुःषन्ति । यचीति किं अभिस्तः । अस्तेर्भूर्भूवर्षी । ७ ४।१।२४। भूभ्रंऽस्तेश्च यथ भू इत्येतावादेशौ

(१) क्ङितिकिम् । भिमति । अस्ति ।
(२) णिप्रादुभ्र्यामिति किम् । दधि स्यात् ।

भवतोऽगे परतः । बभूव । भविता । भविष्यति । अस्तु । स्तात् स्ताम् । सन्तु । श्नसोरेत्त्व स्वं ह्वौ । ४ । ४ । १०७ । श्नोर-स्तेश्च एत्वं स्यादौ परे च स्त्वञ्च । एत्वस्यासिद्धत्वाद्धेर्धिः । तातङ् पक्षे एत्वं न परेण तातङाबाधात् । एधि । स्तात् । स्तम् । स्त । असानि । असाव । असाम । आसीत् । आस्ताम् । आसन् । स्यात् । स्याताम् । स्युः । भूयात् । अभूत् । अभवि-ष्यत् । इण् गतौ । १८ । एति । इतः । यणो(१)ऽयोः । ४ । ४ । ७६ । इणो यण् भवति अजादौ त्ये । यन्ति । यस्याऽऽद्वे । ४ । ४ । ७२ । यस्य य्वोः इयुवौ स्तोऽ(२)द्वे ऽचि । इयाय । किसणोर्दीः । ५ । २ । १६८ । इणश्चस्य दीर्भवति किति लिटि । ईयतुः । ईयुः । इययिथ, इयेथ । एता । एष्यति । एतु । ऐत् । ऐताम् । आयन् । इयात्, । ईयात् । लुङ्घेत्यागाः । १ । ४ । ११७ । एत्योर्गा भवति लुङि परतः । अगात् । ऐष्यत् । शीङ् स्वप्ने । १९ ।(३)शीङो गे । ५ । २ । १३० । शीङ एङ् भवति गे परतः । ङ्किति "इत्यस्यापवादः । शेते । शयाते । शीङो रुट् । ५ । १ । ६ । (४)शीङः परस्य झस्यातो रुडाग मो भवति । शेरते । शेषे । शयाथे । शेध्वे । शये । शेवहे ।

(१) इयादेशस्यापवादोऽयम् अतएव यन्तीति । सिद्धम् ।

(२) अद्वे किम् । ईयतुः । अचि कीम् । इयाय ।

(३) गे किम् । शीश्ये ।

(४) शीङ इति सानुबन्धक ग्रहणं यङ्लुबन्तनिवृत्त्यर्थम् ।

शेमहे। शिश्ये। शिश्याते। शिश्यिरे। शयिता। शयिष्यते। शेताम्। शयाताम्। अशेत। अशयाताम्। अशेरत। शयीत। शयीयाताम्। शयीरन्। शयिषीष्ट। अशयिष्ट। अशयिष्यत।

इङ् अध्ययने। २०। इङ्काधध्युपसर्गतो नव्यभिचरतः। अधीते। अधीयाते। अधीयते। **गाङ्(१)लिटि**। १।४।१२१। इङो गाङ् स्याल्लिटि। अधिजगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अधीताम्। अधीयाताम्। अधीयताम्। अधीष्व। अधीयाथाम्। अधीध्वम्। अध्यैत। अध्यैथाः। अध्यैयाथाम्। अध्यैध्वम्। अध्यैवहि। अध्यैमहि। अधीयीत। अधीयीयाताम्।

अधीयीरन्। अध्येषीष्ट। **लुङ् लृङो र्वा**। १।४।१२२। इङो गाङ् वा स्याल् लुङ् लृङोः परतः। **गाङ्कुटादेरञ्णिन्ङित्**। १।१।७५। गाङित्येतस्मात् कुटादिभ्यश्च परेऽ(२)ञ्णितस्त्या ङितो भवन्ति। **घुमास्थागापाहाक्मां हलि**। ४।४।६४। एषामात् ईद्भवति हलादौ क्ङित्यये परतः। अध्यगीष्ट, अध्यैष्ट। अध्यगीष्यत, अध्यैष्यत। दुह प्रपूरणे। २१। दोग्धि। दुग्धः। दुहन्ति। धोक्षि। दुग्धे। दुहाते, दुहते। धुक्षे। दुहाथे। दुग्ध्वे। दुहे। दुह्वहे। दुह्महे। दुदोह। दुदु-

(१) गाङ्कुटादेरित्यत्रास्यैव ग्रहणार्थं उकारः कृतः।

(२) अञ्णितः किम्। उत्कोटयति। हलि किम्। ददतुः। क्ङिति किम्। दाता।

हे । दोग्धा । धोक्ष्यति । धोक्ष्यते । दोग्धु, दुग्धात् । दुग्धाम् । दुहन्तु । दुग्धि । दुग्धात् । दुग्धम् । दुग्ध । दोहानि । दोहाव । दोहाम । दुग्धाम् । दुहाताम् । दुहताम् । धुक्ष्व । दुहाथाम् । धुग्ध्वम् । दोहै । दोहावहै । दोहामहै । अधोक् । अदुग्धाम् । अदुहन् । अदोहम् । अदुग्ध । अदुहाताम् । अदुहत । अधुग्ध्वम् । दुह्यात् । दुहीत ॥ **सिलिङ् दे** । १।२।८५ । इक् समीपाद्धलः परौ झलादी सिलिङौ कितौ भवतो दे । धुक्षीष्ट । **इगुकः शलोऽनिटोऽदृशः क्सः** । २।१।४० । इगुक शलन्तस्तस्मादनिटः क्सो भवति दृशं वर्जयित्वा । अधुक्षत् । **लोपो दुहदिहलिहगुहां दन्त्ये** । ५।२।७० । दुहादिभ्यः परस्य क्सस्य वा लुग्भवति दे(१)दन्त्यादौ परतः । अदुग्ध । अधुक्षत । **क्सस्याचि खं** । ५।२।६९ । क्सस्य खं भवति अजादौ दे । अधुक्षाताम् । अधुक्षन्त । अदुग्धाः । अधुक्षथाः । अधुक्षाथाम् । अधुग्ध्वम् । अधुक्षध्वम् । अधुक्षि । अदुह्वहि, अधुक्षावहि । अदुह्महि । अधुक्षामहि । अधोक्ष्यत । एवम् दिह उपचये ।२२। लिह आस्वादने । लेढि । लीढः । लिहन्ति । लेक्षि । लीढे । लिहाते । लिहते । लिक्षे । लिहाथे । लीढ्वे । लिलेह । लिलिहे । लेढासि, लेढासे । लेक्ष्यति, लेक्ष्यते । लेढु । लीढाम् । लिहन्तु । लीढि । लेहानि । लीढाम् । अलेट्=अलेड् । अलिक्षत् । अलिक्षत । अलेक्ष्यत्, अलेक्ष्यत । ब्रूञ् व्यक्तायाँ वाचि । २४ । **ब्रुव आहश्च** ।

(१) दे किम् । अधुक्षत् । दंत्यादाविति किम् । अधुक्षामहि

२।४।७०। ब्रुवः परस्य लटो मानां णलादयो वा स्युः ब्रुवश्चाह देशः। आह। आहतुः। आहुः। आहथ। ।५।२।५२। झलि परे। चर्त्वम्। आत्थ। आहथुः। ब्रुव ईट्।५।२।९१। ब्रुवः परस्य हलादेः पित ईट् भवति। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। ब्रुवाते, ब्रुवते। उवाच। ऊचतुः। ऊचुः। उवचिथ। उवक्थ। ऊचे। वक्तासि वक्तासे। वक्ष्यति। वक्ष्यते। ब्रवीतु ब्रूतात्। ब्रुवन्तु। ब्रूहि। ब्रवाणि। ब्रूताम् ब्रवै। अब्रवीत् अब्रूत। ब्रूयात्। ब्रवीत। उच्यात्। वक्षीष्ट। वक्त्यऽस्तु(१) रूयातेरङ्।२।१।४५। एभ्यः कर्तरि लुङिअङ् भवति। वच्यस्पतश्वोऽथुकपुमोऽङि।५।२।१२८। एषामेते भवन्त्यङि परे। अवोचत्। अवोचत। अवक्ष्यत्। अवक्ष्यत। ऊर्णुञ् आच्छादने।२५। वोर्णोः।५।२।८८। ऐप् वा स्याद्धलादौ पिति गे। ऊर्णौति, ऊर्णोति। ऊर्णुतः। ऊर्णुवन्ति ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। न रफादौ न्द्रोऽद्वि।४।३।३। अचः पराः रफादया नदरा द्विर्न भवन्ति। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः। वोर्णोः।१।१।७७। ऊर्णोतेः पर इडादिस्थो वा ङिद्भवति। ऊर्णुनुविथ, ऊर्णुनविथ। ऊर्णुविता, ऊर्णविता। ऊर्णुविष्यति, ऊर्णविष्यति। ऊर्णौतु। ऊर्णोतु ऊर्णवानि। ऊर्णवै। हल्यैप्।५।२।८९। ऊर्णोतेरैप् केवले हलि पिति गे। ऐपोऽपवादः। और्णोत्। और्णोः। ऊर्णुयात्।

(१) अस्यतेः पुषादित्वेनैव सिद्धे वचनार्थं ग्रहणम्।

ऊर्णुयाः । ऊर्णवीत । ऊर्णुयात् । ऊर्णुविषीष्ट, ऊर्णविषीष्ट । प्रोर्णुवः । ५ । १ । ८२ । उर्णोते रिडादौ सती सेड्भवति । पक्षे पप् । और्णावीत् । और्णवीत् । और्णुवीत् । और्णाविष्टाम् । और्णुविष्टाम् । और्णविष्ट । और्णुविष्ट । और्णविष्यत । और्णुविष्यत । इत्यदादयः ॥

## ॥ अथ जुहोत्यादयः ॥

हु दाना दानयोः । १ । उज्जुहोत्यादिभ्यः । १ । ४ । ४५ । शप् उज्भवति । लिड्च कचि धोरिति द्वित्वम् । जुहोति जहुतः । अस्थात् । ५ । १ । ४ । धात्परस्य झस्यादुभवति । हुश्नुवोरिति यण् । जुह्वति । भीह्रीभृहुवामुवत् । २ । १ । ३५ । पभ्यो लिटि आम् वा स्यादामि उचिव कार्यं च । जुहवाञ्चकार । जुहाथ । होता । होष्यति । जुहोतु, जुहुतात् जुहुताम् । जुह्वतु । जुहुधि । जुहवानि । अजुहोत् । अजुहुताम् । जु(१)सि।५।२।८०।इगन्तस्यगोरेवभवत्यजा दैजुसि । अजुहवुः। जुहुयात् । हूयात् । अहौषीत् । अहो ष्यत् । ञिभीभये । २ । बिभेति। भियोवा । ४ । ४ । १०३ । इकारोवाभवतिहलादौ क्ङितिगे । बिभितः । बिभीतः । बिभ्यति । बिभयाञ्चकार । बिभाय । भेता । भेष्यति । बिभेतु बिभितात् । बिभीतात्। अबिभेत् । बिभियात् बिभीयात् । भीयात् । अभैषीत् । अभेष्यत् । ह्रीलज्जायाम् । ३ । जिह्रेति । जिह्रीतः । जिह्रियति । जिह्रयाञ्च-

(१)अचीत्यनुवृत्तेअजुहुरित्यादे न यप् । अनुबंध निर्देशात्

कार जिहाय । हेता । हेष्यति । जिहेतु । अजिहेत् । जिह्रीयात् । ह्रीयात् । अहैषीत् । अहेष्यत् । पॄ पालन पूरणयोः । ४ प्रोः । ५ । २ । १७५ । पॄ ऋ इत्येतयोश्चास्य इकारान्तादेशो भवत्युचि । पिपर्ति । पुत्रादुत् । ५ । १ । ७६ । धोः पवर्गाद्वकाराच्च परस्य ऋत उद्भवति । हल्यऽभकुर्छोरः । ५ । ३ । ८६ । रेफवान्तस्य भकुर्छुवर्जितस्य धो(१)रिगुडो दीर्भवति हलि । पिपूर्तः । पिपुरति । पपार । शृदृप्रां प्रो वा । ५ । २ । १२४ । एषां किति लिटि परतः प्रो वा भवति । पप्रतुः । ऋच्छत्यॄ ताम् । ५ । २ । १२३ । तौदादिकऋच्छेऋधोऋतां च एप् स्याल्लिटि । पपरतुः । पपरुः । वॄतो वा । ५ । १ । ८६ । वृङ् वृञ्भ्यामॄदन्ताच्चेटो दीर्घो स्यान्नतु लिटि । परीता, । परिता । परीष्यति परिष्यति । पिपर्तु । अपिपः । अपिपूर्ताम् । अपिपरुः । पिपूर्यात् । पूर्यात् । अपारीत् । सौ मे । ५ । १ । ८८ । अत्र इटो न दीः । अपारिष्टाम् । अपरीष्यत्,अपरिष्यत् । ओहाक् त्यागे । २ । जहाति । हाकः । ४ । ४ । १०४ । अस्य इत्वं वा भवति हलि (२) क्ङिति गे । जहितः । हल्यघोरीः । ४ । ४ । १०१ । आध्योरात ईत् वा स्याद्धलादौ क्ङिति गे परे न तु भोः । जहीतः । श्नभ्नोरातः । ४ । ४ । १०० । (३) श्नभ्नो-

---

(१) धोः किम् । दिवमिच्छति दिव्यतीत्यादौ माभूत् ।

(२) हलि किम् । जहति । क्ङितिकिम् । जहाति । गेकिम् । हीयते ।

(३) श्नभ्नोरिति किम् । याति । आकारस्येति । किम् । बिभर्ति । क्ङितीतिकिम् । अलुनात्

शाका रस्य लम्भवति क्ङिति गे परतः। जहति। जहौ। हाता। हास्यति। जहातु, जहितात्। जहीतात्। आच हौ। ४। ४।१०५। हौ परे आदर्द स्यादिश्च था। जहाहि। जहिहि। जहीहि। अजहात्। अजहुः। जहीत। भिर्लं ४।४।१०६। हाकः खं भवति यकारादौ गे (१) परतः। जह्यात्। हेयात्। अहासीत्। अहास्यत्। माङ् माने शब्दे च। ६। भृञांश्च थाणामिः। ५।२।१७४। एषां चस्य इर्भवत्यचि परे। मिमीते। मिमाते। ममे, माता। मास्यते। मिमीताम्। अमिमीत। मासीष्ट। अमास्त। अमास्यत। ओहाङ् गतौ। ७। जिहीते। जिहाते। जिहते। जहे। हाता। हास्यते। जिहीताम्। अजिहीत। जिहीत। हासीष्ट। अहास्त। अहास्यत। डुभृञ् धारण पोषणयोः। ८। बिभर्ति। बिभृतः। बिभ्रति। बिभृते। बिभ्राते। बिभ्रते। बिभराञ्चकार। बभार। बभर्थ। बभृव। बिभराञ्चक्रे, बभ्रे। भर्ता। भरिष्यते। बिभर्तु। बिभराणि। बिभृताम्। अबिभः। अबिभृताम्। अबिभरुः। अबिभृत। बिभृयात्। बिभ्रीत। भ्रियात्। भृषीष्ट। अभार्षीत्, अभृत। अभरिष्यत्। अभरिष्यत। डुदाञ् दाने। ९। ददाति दत्तः। ददति। दत्ते। ददाते। ददते। ददौ, दाता। दास्यति, दास्यते। ददातु। दाधा भ्वपित्। १।१।२७। दारूपा धारूपाश्च धवः, भुसंज्ञका भवन्ति पितौ मुक्त्वा। भ्वसोस्त्येत्वम्। देहि। दत्तम्। अददात्। अदत्त। दद्यात्। ददीत। देयात्। दा-

(१) गे किम्। हेयात्।

सीष्ट। अदात्। अदाताम्। अदुः। भुस्थोरिः। १। १। ६१। अत्र योरिदन्ता देशः सः कित्स्यादे। अदित। अदास्यत्, । अदास्यत। डुधाञ् धारण पोषणयोः। १०। दधाति। धः। ५। ३। ५५। दधातेर्भष (१) स्तस्य धशो भष् स्याज्झलि। धत्तः। दधति। दधासि। धत्थः। धत्थ। धत्ते। दधाते, दधते। धत्से। धध्वे। भ्वसोरित्येत्वं धं च। धेहि। अदधात्। अधत्त। दध्यात्। दधीत। धेयात्। धासीष्ट। अधात्। अधित। अधास्यत्। अधास्यत। णिजिर् शौच पोषणयोः। ११। निजामुत्येप्। ५। २। १७३। निजादिनामु २) त्रि परे चस्यैप् भवति। नेनेक्ति। नेनिक्तः। नेनिजति। नेनिक्ते। निनेज। निनिजे। नेक्ता। नेक्ष्यति,। नेक्ष्यते। नेनेक्तु। नेनिग्धि। थस्य गे पित्यचि। ५। २। ८५। थस्यद्युक्त एप्न स्यात्पित्यजादौ गे परतः। नेनिजानि। नेनिजाम्। अनेनेक्। अनेनिक्ताम्। अनेनिजुः। अनेनिजम्। अनेनिक्त। नेनिज्यात्। नेनिजीत। निज्यात्। निक्षीष्ट। वेरितः। २। १। ६१। इरितो धोर्मे ङुक्ष्यङ् वा भवति। अनिजत्। अनैक्षीत्। अनिक्त। अनेक्ष्यत। इति जुहोत्यादयः॥

## ॥ अथ दिवादयः ॥

दिवु क्रीडा जयेच्छापणि द्युति गतिषु। १। दिवादेः श्यः। २। १। ६५। दिवादिभ्यः श्यो भवति कर्तरि गे। शपो-

(१) झषन्तस्येति किम्। दधाति।
(२) उचि परे किम्। निनेज।

ऽपवादः । हल्येति दीः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् । एवम् षिवु तंतु संताने । २ । नृती गात्र विक्षेपे । ३ । नृत्यति । ननर्त । नर्तिता । **स्यसौ कृतचृतच्छृदतृदनृतः ।** ५ । १ । १०५ । एभ्यः परस्य सिवर्जितस्य (१)सकारादगस्य येड् भवति । नर्तिष्यति, नर्त्स्यति । नृत्यतु । अनृत्यत् । नृत्येत् । नृत्यात् । अनर्तीत् । अनर्तिष्यत् । अनर्त्स्यत् । त्रसी उद्वेगे । ४ । "वाभ्राशिति श्यन् । त्रस्यति । त्रसति । तत्रास । **वा जृ-**
**(२)भ्रमुत्रसाम् ।** ४।४।११३ । भ्रमादीनामेष्व वे वास्तः किति लिटि सेटि थे च । त्रेसतुः, । तत्रसतुः त्रेसिथ, तत्रसिथ । त्रसिता । शो तनूकरणे । ५ । **ओतः श्ये ।** ५ । २ । ७१ । ओकारस्योत् भवति श्ये परतः । श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शाता । शास्यति । **वा घ्राधेट्छाशासः ।** १ । ४ । १५० । घ्रादिभ्यो वा सेरुप् स्यान्मे(३)परे । अशात् । अशाताम् । अशुः । इट् सकौ । अशासीत् । अशासिष्टाम् । छो छेदे । ९ । छ्यति । षोऽन्त कर्मणि ।७। स्यति । ससौ । दो छेदे ।८। द्यति । ददौ । देयात् । **ग्राहिज्याव्यिव्यधिवष्टि** **व्यचिव्रश्चिप्रच्छिभ्रस्जां**

(१) सकारादावितिकिम् । नर्तिता । सिवर्जितस्येति किम् । अनर्तीत् । (२ जेरतुः । जजरतुः । भ्रेमतुः । बभ्रमतुः । त्रेसतुः । तत्रसतुः । इति सूत्रोदाहरणानि ।

(३) मेपरेकिम् अघ्रासातां सुमनसौ देवदत्तेन ।

क्ङिति च । ४ ३ । १२ । अशादीनां किति ङिति चेग् भवति ।
व्यधौ ताडने । ९ । विध्यति । विव्याध । विविधतुः । विध्यत् ।
अव्यात्सीत् । पुषौ पुष्टौ । १० । पुष्यति । पुपोषिथ । पोष्टा ।
पोक्ष्यति । द्युत्पुषादीत्यङ् । अपुषत् । शुषौ शोषणे । ११ । शुष्यति । शुशोष । अशुषत् । णश् अदर्शने । १२ । नश्यति । ननाश । नेशतुः । रधादेः । ५ । १ । ९३ । रध् नश् तृप् दृप् द्रुह् मुह् ष्णुह् ष्णिह् एभ्यो वलाद्यगस्य वेट् स्यात् । नेशिथ । मस्जिनशोर्झलि । ५ । ३९ । अनयोर्झ(१)लि नुम् भवति । ननंष्ठ । नेशिव । नेश्व । नेशिम, नेश्म । नशिता, नंष्टा । नशिष्यति, नङ्क्ष्यति । नश्यतु । अनश्यत् । नश्येत् । नश्यात् । अनशत् ।
षूङ्ौ प्राणिप्रसवे । १३ । सूयते । सुषुवे । क्रादि नियमादिट् । सुषुविषे । सुषुविवहे । सुषुविमहे । सविता । सोता । दूङ् परितापे । १४ । दूयते । दीङौ क्षये । १५ । दीयते । दीङो यङ्क्ङिति युट् ४ । ४ । ६१ । दीङः परस्याजादेः कङ्ङितोऽग स्य युडागमो भवति । दिदीये । मिञ्मीञ्दीङां य्ये च ४ । ३ । ४३ । एषामात्वं स्यात्य्ये चाशित्येज्विषये । दाता । दास्यति (धुस्थोरितीत्वं दीङः प्रतिषेधः) अदास्त । डीङ् विहायसा गतौ । १६ । डीयते । डिड्ये । डयिता । पीङ् पाने । १७ । पीयते । पेता । अपेष्ट । माङ् माने । १८ । मायते । ममे । जनी प्रादुर्भावे । १९ ।

---

(१) झलि किम् । मज्जनम् । नशनम् ।

जनी प्रादुर्भावे । १९ । जायते । जज्ञे । जनिता । जनिष्यते । दीपजनबुधपूरितायिप्यायिभ्यो वा २ । १ । ५२ । दीपादेः कर्तरि लुङि ते च्लिर्वा भवति । चिणो लुक् । ४ । ४ । १९२ । चेः परस्य तस्य लुग् भवति । जनिवध्योः । ५ । २ । ४० । अनयोर्वृद्धिर्न स्यात् ञिणति कृति च परतः । अजनि । अजनिष्ट । दीपीङ् दीप्तौ । २० । दीप्यते । दिदीपे । अदीपि । अदीपिष्ट । पदोङ् गतौ । २१ । पद्यते । पेदे । पत्ता । पत्सीष्ट । चिण्ते पदः । २ । १ । पदेर्धोर्लुङि ते परे चिर्भवति । अपादि । अपत्साताम् । अपत्सत । विदोङ् सत्तायाम् । २२ । विद्यते । वेत्ता । अवित्त । बुधोङ् ज्ञाने । २३ । बुध्यते । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि, अबुद्ध । अभुत्साताम् । युधोङ् संप्रहारे । २४ । युध्यते । युयुधे । योद्धा । अयुद्ध । सृजोङ् विसर्गे । २५ । सृज्यते । ससृजे । ससृजिषे । (२) झलि कितिसृजदृशोऽम् । ४ ।

---

(१) जनीति उच्चारणेऽपि=यञ्यतोदीः=इतिदीत्वे सिद्धे जाग्रहणमङ्गसपरिभाषाज्ञापनार्थम् । तेनपाघोः पिबादे शेकृते पधनभवति । विधा देशस्यादन्तत्वाश्रयणं तूपायान्तरम् ।

(२) झलि किम् । सर्जनम् । अकिति किम् । स्पष्टः । धोः स्वरूप ग्रहणात्तद्धितस्य विधानादिह न । विश्वसृड्भ्याम् । देवदृग्भ्याम् ।

३।५१। हलादाच किति परतः खुजि इशोरमागमो भवति। स्रष्टा स्रक्ष्यते। असृक्षाताम्। असृष्ट। असृक्षाताम्। मृषेस्तित-तक्षाथाम्। २६। मृष्यति, मृष्यते। ममर्ष। ममर्षिथ। ममृषिषे। मर्षितासि। मर्षिष्यति। मर्षिष्यते। णहौ बन्धने। २७। ननाह। नेहिथ। नद्धा। अनात्सीत्। अनद्ध। इति दिवादयः। ४।

# अथ स्वादयः।

षुञ् अभि(१)षवे। १। स्वादेः श्नुः। २। १। ६९। शपोऽपवादः। सुनोति। सुनुतः। हुश्नुवोरिति यण्। सुन्वन्ति। सुन्वः, सुनुवः। सुनुते। सुन्वाते। सुन्वते। सुनुवहे। सुन्वहे। सुषाव, सुषुवे। सोता। सुनु। सुनवानि। सुनवै। सुनुयात्। "दीरकृद्रे" इति दीर्घत्वम्। सूयात्। स्तुसु(२)धुञो मे। ५। १। १। ३१। परस्मै परस्य सेरिट् स्यान्मे। असावीत्। असोष्ट। चिञ् (३)चयने। २। चिनोति, चिनुते। चान्वेः। ५। २। ६३। चात्परस्य चिनोते र्वा कुर्भवति सँल्लिटोः परतः। चिक्ये, चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। ३।

(१) अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं नाम सुरा निष्पादन प्रकारः।

(२) पूर्वोक्तत्वा साहचर्यात्सुनोतेरेव ग्रहणम्।

(३) चयनं संग्रह विशेषः।

स्तृणुते । शारः स्यगि । ५ । २ । १६२ । शारस्य स्याद् भ-
वति खयि परे । तस्तार तस्तरतुः । तस्तरे । स्फाधूर्त्तौरेति
णप् । स्तर्यात् । स्फादृतोऽस्कुः । ५ । १ । स्फादस्कु प-
रा दकाराल्लिङ्सयोर्दे वेड् भवति । स्तरिषीष्ट, स्तृषीष्ट । अ-
स्तृत । धुञ् कम्पने । ४ । धू इ मां प्रोवेति मः । धुनोति, धु-
नुते । दुधाव । स्वरतीति वेट् । दुधविथ, दुधोथ । श्र्युकः(१)
कः किति । ४ । ४ ।११७ । श्रिञ एकाच उगंताच्च किनो
रिण् न भवति । अनेन निषेधे प्राप्ते । क्रादि नियमान्नित्यमि-
ट् । दुधुविव । दुधुवे । अधावीत् । अधविष्ट । अधोष्ट । अधा-
विष्यत् । अधोष्यत् । अधविष्यताम् । अधोष्यताम् । अधविष्य-
त । अधोष्यत ।

॥ इति स्वादयः ॥

# अथ तुदादयः

तुदॕव्यथने । १ । तुदृभ्यः शः । २ । १ । ७३ ।
शपोऽपवादः । तुदति(२) तुदते । तुतोद । तुतोदिथ । तुतुदे ।
तोत्ता । अतौत्सीत् । अतुत्त । णुदॕप्रेरणे । २ । नुदति । नुदते ।

(१) श्र्युकः कितीत्यत्रगकारोऽपिचर्त्वभूतोनिर्दिष्टः । तेन भूष्णुरित्यत्रेण्निषेधसिद्धिः ।

(२) तुदतीत्यादौ च्युङ्स्त्वेवं बाधित्वाशङ्कते पश्चादेत् न भवति क्ङितीति निषेधात् ।

तोसा। भ्रस्जाश् पाके। ३। भ्राशृज्येताक्। सस्य स्चु-त्वनेशः। शस्य जस्त्वेन जः। भृज्जते। **भ्रस्जोरसोरम्वा।** ४। ४। ४८। भ्रस्जेः रेफसकारयोः स्थाने रम्वा स्याद्मे-मित्वादन्त्यादचः परः। बभर्ज। बभर्जतुः। बभर्जिथ। बभ-र्ष्ठ बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। रफाद् रिति सखं। व्र-श्चेति षः। बभ्रष्ठ। बभर्ज्ज, बभ्रज्ज। भर्ष्टा, भ्रष्टा। भक्ष्यति। किङतिरमाद्देशबाधित्वा इक् पूर्वविप्रतिषेधेन। भृज्ज्यात्। भृ-ज्ज्यास्ताम्। भृज्ज्यासुः। भर्क्षीष्ट। भ्रक्षीष्ट। अभार्क्षीत्, अभ्रा-क्षीत्। अभर्ष्ट। अभ्रष्ट। कृष विलेखने। ४। कृषति, कृषते। चकर्ष, चकृषे। **वानुदात्तस्यर्दुङः। ४। ३। ५९।** अनुदात्तो य ऋ(१)दुङस्तस्याम्वा स्याज्झलादाव किति। क्रष्टा कर्ष्टा। कृक्षीष्ट।

"**स्पृशमृशकृषतृपदृपो वा। २। १। ३९।** स्पृ-शादिभ्यो लुङि वा सि भवति। अक्राक्षीत्, अकार्क्षीत्। अ-कृक्षत। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षाताम्। अकृ-क्षत। मिलसंगमे॥ ५॥ मिलति। मिलते। मिमेल। मेलिता। अमेलीत्॥ मुच्लृ–मोचने॥ ६॥ **शे(२)मुचां। ५। १।**

---

(१) ऋदुङ इति किम्। भेत्ता। झलादौ किम्। तर्पणम्। अकितीति किम्। तृप्तः।

(२) शे किम्। मोक्ता। मुचादीनां किम्। तुदति।

३८ । मुचादीनां शपरे नुम् भवति । मुञ्चति । मुञ्चते । मोक्ता । मुच्यात् । मुक्षीष्ट । अमुचत् , अमुक्त । अमुक्षाताम् ॥ लुप्लृ छेदने ॥ ७ ॥ लुम्पति, लुम्पते । लोप्ता । अलुपत् ,अलुप्त ॥ विदॢ लाभे ॥ ८ ॥ विन्दति, विन्दते । विवेद । विविदे । वेत्ता ॥ षिच क्षरणे ॥ ९ ॥ सिञ्चति, सिञ्चते । लिपिसिचिह्वश्च । ३ । १ । ५३ । एभ्यो च्लेरङ् भवति । असिचत् । दैवा । २ । १ । ४७ । लिप् सिच् इत्येतेभ्यो लुङि वा अङ् भवति । असिचत । असिक्त ॥ लिप उपदेहे ॥ १० ॥ लिम्पति, लिम्पते । लेप्ता । अलिपत् , अलिपत, अलिप्त ॥ इत्युभयपदिनः ।

कृती छेदने ॥ ११ ॥ कृन्तति । चकर्त । कर्तिता । कर्तिष्यति । कर्त्स्यति । अकर्तीत् ॥ खिद परिघाते ॥ १२ ॥ खिन्दति चिखेद । खेत्ता ॥ पिश अवयवे ॥ १३ ॥ पिंशति । पेशिता । ओव्रश्चू छेदने ॥ १४ ॥ वृश्चति । वव्रश्च । वव्रश्चिथ । वव्रष्ठ । व्रश्चिता । व्रष्टा । व्रश्चिष्यति । व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत् । अव्राक्षीत् । व्यच व्याजीकरणे ॥ १५ ॥ विचति । विव्याच । । विविचतुः । व्यचिता । व्यचिष्यति । विच्यात् । (१)अव्याचीत् । अव्यचीत् । उछि उञ्छे ॥ १६ ॥ उञ्छति । ऋच्छ इन्द्रियप्रलयमूर्तिभावयोः ॥ १७ ॥ ऋच्छति । ऋच्छत्यॄतामिति गुण् । ततो नुडिति नुट् । आनर्च्छ । आन-

(१) कुन्मात्र सित्ये परे कुटादिकार्यमयम् न तु तद्भिन्नेप्यपरे । अत एव अव्याचीदित्यादौ प्रवृद्धिर्ज्ञेयेति नेष्ट ।

चर्कनुः । अञ्चिछत्ता । उज्झ उत्सर्गे । १८ । उज्झति । लुभ विमोहने । १९ । लुभति । (१)तीषसहलुभरुषरिषः ।४ । १ । ९६ । एभ्यः परस्यतादेरगस्य वेट् स्यात् । लोभिता । लोब्धा । लोभिष्यति । तृप तृम्फ तृप्तौ । २० । २१ । तृपति । ततर्प । तर्पिता । अतर्पीत् । तृम्फति । ततृम्फ । तृफ्यात् । मृड पृड सुखने । २२ । २३ । मृडति । शुन गतौ । २४ । शुनति । इषुरिच्छायाम् । २५ । इच्छति । एषिता । एष्टा । एषिष्यति । इष्यात् । ऐषीत् ॥ कुट कौटिल्ये ॥ गाङ् कुटादीति ङिवम् । चुकुटिथ । चुकोट । कुटिता ॥ पुट संश्लेषणे । २७ । पुटति । पुटिता ॥ स्फुट विकसने । २८ । स्फुटति । स्फुर स्फुल संचलने । २९ । ३० । स्फुरति । स्फुलति ॥ स्फुरिस्फुल्योर्निर्नि वेः । ५ । ४ । ५८ ॥ षत्वं वा स्यात् । निः ष्फुरति । निः स्फुरति । णु स्तवने ।३१। नुवति । नुनाव । नुविता । टुमस्जो शुद्धौ । ३२ । मज्जति । ममज्ज । ममज्जिथ । नशमज्जेरिति नुम् । स्फादिखम् । ममङ्क्थ । मङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः । रुजो भङ्गे । ३३ । रुजति । रोक्ता । रोक्ष्यति । आरौक्षीत् । भुजो कौटिल्ये । ३४ । रुजिचत् । विश प्रवेशने । ३५ । विशति । मृश आमर्शने । ३६ । आमर्शनं स्पर्शः । वानुदात्तस्य दुङः । अम्राक्षीत् । अमार्क्षीत् । अमृक्षत् । षद्लृविशरणग-

(१) तीति किम् । पषिष्यति ।

त्यप्रसादनेषु । ३७ । सीदतीत्यादि । शद्लृ शातने । ३८ ॥
**शदेः शितः** । १ । ३ । ६० ॥ शदेः शितस्तङ् भवति । शीयते । शीयताम् । अशीयत । शीयेत । शशाद शत्ता । शत्स्यति । अशदत् । अशत्स्यत् ॥ कॄ विक्षेपणे । ३९ । **ॠत इद्धातोः** ७ । १ । १०० । ॠकारान्तस्य(१) धोरिकारादेशो भवति । किरति । चकार । चकरतुः । चकरुः । करीता, करिता । कीर्यात् । **किरतेर्लवने** । ६ । १ । १४० । उपात् किरतेः सुट् भवति लवनार्थे । उपस्कि(२)रति । **हिंसायां प्रतेश्च** । ६ । १ । १४१ । प्रतेरुपाच्च किरतेर्वधेऽर्थे सुट् स्यात् । उपस्किरति । प्रतिस्किरति ॥ गॄ निगरणे ॥ ४० । (३)**अचि विभाषा** । ८ । २ । २१ । गिरतेरेफस्य लकारादेशो वा भवत्यजादौ प्रत्यये परे । गिरति । गिलति । जगार । जगाल । जगरिथ । जगलिथ । गरीता । गरिता । गलीता । गलिता । प्रच्छ ज्ञीप्सायाम् । ४१ । ग्रहिज्येति संप्रसारणम् । पृच्छति । पप्रच्छ । पप्रच्छतुः पप्रच्छुः । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । मृङ् प्राणत्यागे । ४२ । **म्रियतेर्लुङ्लिङोश्च**(४) । १ । ३ । ६१ ।

(१) धोः किम् । मातॄणाम् । चिकीर्षतीत्यादौ लाक्षणिकत्वेऽपि प्रवर्तते लक्ष्यानुरोधात् ।

(२) लवन विषय विक्षेपं करोतीत्यर्थः ।

(३) व्यवस्थितत्वात्प्राण्यङ्गेनित्यम् गलः । विषे तु न गरः ।

(४) शे किम् मरिष्यति ।

म्रियतेर्लुङ्लिङोः गेच परतः दो भवति । रिङ् । इय् । म्रियते । ममार । मर्ता । मरिष्यति । मृषीष्ट । अमृत । पृङ् व्यायामे । ४३ । प्रायेणायं व्याङ्पूर्वः । व्याप्रियते । व्यापप्रे । व्यापर्ता । व्यापरिष्यते । व्यापृत । व्यापृषाताम् । जुषीङ् प्रीतिसेवनयोः । ४४ । जुषते । जुजुषे । ओविजीङ् भयचलनयोः । ४५ । प्रायेणउत्पूर्वः । उद्विजते । इड्विजः । १ । १ । ७६ । विजः पर इडादिर्ङिद्भवति । उद्विजिता ।

इति तुदादयः ।

# अथ रुधादयः ।

रुधिर् आवरणे । १ । रुधां श्नम् । २ । १ । ७३ । रुधादीनां गे श्नम् भवति । श्नसोऽल्लोपः । रुणद्धि । श्नसः खं । रुन्धः । रुन्धन्ति । रुणत्सि । रुन्धः । रुन्ध । रुणध्मि । रुन्ध्वः । रुन्ध्मः । रुन्धे । रुन्धाते । रुन्धते । रुन्त्से । रुन्धाथे । रुन्ध्वे । रुन्धे । रुन्ध्वहे । रुन्ध्महे । रुरोध । रुरुधे । रोद्धासि । रोद्धासे । रोत्स्यति । रोत्स्यते । रुणद्धु । रुन्धात् । रुन्धाम् । रुन्धन्तु । रुन्धि । रुणधानि । रुणधाव । रुणधाम । रुन्धाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधावहै । रुणधामहै । अरुणत् । अरुन्धाम् । अरुन्धन् । अरुणः । अरुणत् । अरुणद् । अरुन्ध । अरुन्धाताम् । अरुन्धत । अरुन्धाः । रुन्ध्यात् । रुन्धीत । रुध्यात् । रुत्सीष्ट । अरुधत् । अरौत्सीत् ।

अरुद्ध । अरुत्साताम् । अरुत्सत । अरोत्स्यत । अरोत्स्यत । भिदिर् विदारणे । २ । छिदिर् द्वैधीकरणे । ३ । युजिर् योगे । ४ । रिचिर् (१)विरेचने । रिणक्ति । रिङ्क्ते । रिरेच । रेक्ता । रेक्ष्यति । अरिणक् । अरिचत् । अरैक्षीत् । अरिक्त । विचिर् पृथग्भावे । ६ । विनक्ति । विङ्क्ते । क्षुदिर् संपेषणे । ७ । क्षुणत्ति । क्षुन्ते । क्षोत्ता । अक्षुदत् । अक्षौत्सीत् । अक्षुत्त । छृदिर् दीप्तिदेवनयोः । ७ । छृणत्ति । छृन्ते । चच्छर्द । स्यसावितिवेट् । चच्छृदिषे चच्छृत्से । छर्दिता । छर्दिष्यति । छर्त्स्यति । अच्छृदत् । अच्छर्दीत् । अच्छर्दिष्ट । तृह हिसि हिंसायाम् । ९ । तृणह इम् । ५ । २ । ९० । तृहः श्नमि कृते इमागमो भवति हलादौ पिति गे । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । (२)श्नान्नलोपः । ४ । ४ । २१ । श्नमः परस्य नकारस्य खं भवति । हिनस्ति । जिहिंस । हिंसिता । तिपि धोः । ५ । ३ । ७० । धोः सस्य दो भवति तिपि परे न त्वसेः । ससजुषोरिरित्यस्यापवादः । अहिनत् अहिनद् । अहिंस्ताम् । अहिंसन् । (३)

(१) विरेचनं मलादेर्निःसारणम् । अधोदेशसंयोगानुकूलो व्यापार इति यावत् ।

(२) सशकारग्रहणं किम् । विश्नानामित्यादौ लाक्षणिकत्वाल्लखाभावः ।

(३) अचकात् । अचकाद्वा रथमित्यादावपि दत्वं भवतीतिबोध्यम् ।

सिपिरिर्वा । ५ । ३ । ८१ । धोः सकारस्य वा रिर्भवति सिपि । पक्षे दः । अछिनः । अछिनत् । अछिनद् । उन्दी क्लेदने । १० । उनत्ति । उन्तः उन्दन्ति । उन्दाञ्चकार । औनत् । औन्ताम् । औन्दन् । औनः । औनत् । औनद् । औनदम् । तञ्चू संकोचने । ११ । तनक्ति । तञ्चिता । तक्ता । ऊविजी भये । १२ । विनक्ति । विक्तः । इड्‌विज इतिङित्वम् । विविजिथ । विजिता । अविनक् । अविजीत् । शिष्लृ विशेषणे । १३ । शिनष्टि शिष्टः । शिंषन्ति । शिनक्षि । शिशेष । शिशेषिथ । शेष्टा । शेक्ष्यति । शेड्ढि । शिण्ढि । शिण्ड्ढ । शिनषाणि । अशिनट् । शिष्यात् । शिष्यात् । अशिषत् । एवं पिष्लृ संचूर्णने । १४ । उभञ्जो आमर्दने । १५ । श्नान्नखं । भनक्ति । बभञ्जिथ । बभङ्क्थ । भङ्क्ता । भङ्‌धि । अभाङ्क्षीत् । भुजो रक्षा शनयोः । १५ । भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् । भुजोऽदौ । १ । २ । ६२ । भुजेरदर्थे दो भवति । ओदनं भुङ्क्ते । अदाविति किम । भुनक्ति वसुधां भरतः । इन्धीङ् दीप्तौ । १६ । इन्द्धे । इन्धाते । इन्धते । इन्त्से । इन्ध्वे । इन्धाञ्चक्रे । इन्धिता । इन्धाम् । इन्धाताम् । इन्धताम । इनधै । ऐन्ध । ऐन्धाताम् । ऐन्धाः । विदीङ् विचारे । १७ । विन्ते । वेत्ता ।

इति रुधादयः ।

## अथ तनादयः ।

तनुञ् विस्तारे । १ । कृञ्तनादेरुः २ । १ । ७४ ।

रुप्रत्तनादिभ्यश्च गे परत उरत्यो भवति । शपोऽपवादः । तनोति । तनुते । ततान । तेने । तनितासि । तनितासे । तनिष्यति । तनिष्यते । तनोतु । तनुताम् । अतनोत् । अतनुत । तनुयात् । तन्वीत । तन्यात् । तनिषीष्ट । अतानीत् । अतनीत् ।
(१)तनादिभ्यस्तथासोः । १ । ४ । १४८ । तनादिभ्यः सेर्लोप् भवति थासिते च परतः । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः । अतनिष्यत । अतनिष्यत । षणुञ् दाने । २ । सनोति । सनुते । ये था । ४ । ४ । ४५ । तेषां यकारे क्रित्याखं वा स्यात् । सायात् । सन्यात् । जनसनखनां ४ । ४ । ४२ । एषां ञस्य (२)झलादौ क्लित्याकारादेशो भवति । असात, असनिष्ट । असाथाः, असनिष्ठाः । क्षणुञ् हिंसायाम् ॥ ३ ॥ क्षणोति । हम्यन्तेति न पेप् । अक्षणीत्, अक्षत, अक्षणिष्ट । अक्षथाः, अक्षणिष्ठाः । तृणुञ् अदने ॥ ४ ॥ तृणोति तर्णोति, तृणुते, तर्णुते ॥ क्षिणुञ् हिंसायाम् ॥ ५ ॥ उत्ये । क्षेणोति, क्षिणोति । क्षेणिता । अक्षेणीत्, अक्षित । अक्षेणिष्ट ॥ डुकृञ् करणे ॥ ६ ॥ करोति ॥ गेऽनउत् । ४ । ४ । ९८ । कृञोऽत उद्भवति (३)गे क्लिति परतः । कुरुतः । हृद्येति न

(१) थासासाहचर्यादपरिनस्तपरगुह्यतेनतुमपदिनः अत एव अतत । अतनिष्ट । इत्यादिसिद्धति ।

(२) झलादौ किम् । जिजनिष्यति ।

(३) गेकिम् । भूत पूर्वगेऽपि यथास्यात् । कुरु । तपरकरणं ण्युडाद्यर्थनिवृत्यर्थम् । क्लितिकिम् । करोति ।

दीः। **कुर्वन्ति कृञो ये च ४ । ४ । ९७ ।** कृञः परस्योतः खं भवति यकारादौ म्वोश्च परतः। कुर्वः। कुर्मः। कुरुते। चकार, चक्रे। कर्तासि, कर्तासे। करिष्यसि, करिष्यते। करोतु। कुरुताम्। अकरोत्। अकुरुत। कुर्यात्। कुर्वीत। क्रियात्, कृषीष्ट। अकार्षीत्, अकृत। अकरिष्यत्, अकरिष्यत। **संपर्युपात् कृञः सुड् भूषे(१) ४ । ३ । ११० । समवाये ४ । ३ । १११ ।** समादिभ्यः परस्य कृञः सुड् भवति (२)भूषार्थे संघातार्थे च। संस्करोति अलङ्करोतीत्यर्थः। संस्कुर्वन्ति। सङ्घीभवन्तीत्यर्थः सम्पूर्वस्यकचिद् भूषणेऽपि सुट्। संस्कृतं भक्षा इति ज्ञापकात्। **उपात् प्रतियत्नवैकृतवाक्याध्याहारे। ४ । ३ । ११२ ।** उपात् कृञः सुडागमो भवति (३)प्रतियत्नाद्यर्थे। प्रतियत्नो गुणाधानम्। विकृतमेव वैकृतं विकारः। वाक्याध्याहारः। आकांक्षितैकदेशपूरणम्।

उपस्कृता-कन्या। उपस्कृताब्राह्मणाः। एधोदकस्योपस्कुरुते। उपस्कृतंभुङ्क्ते। उपस्कृतं ब्रूते। वनुङ् याचने ॥ ७॥ वनुते। ववने ॥ मनुङ् अवबोधने ॥ ८ मनुते। मेने। मनिता।

(१) एवं परिष्करोति। उपस्करोति। इत्यादि

(२) भूषेकिम्। उपकरोति। संपूर्वस्याभूषेऽपि कचिदिष्यते। यथा संस्कृतमन्नम्।

(३) प्रतियत्नाद्यर्थेकिम्। उपकरोति।

मनिष्यत । मनुताम् । अमनुत । मन्वीत । मनिषीष्ट । अमनत, अमनिष्ट । अमनिष्यत ।

॥ इति तनादयः ॥ ८ ॥

## अथ क्र्यादयः ।

डुक्रीञ् द्रव्यविनिमये । १ । क्र्यादिभ्यः श्ना । ३ । १ । ७९ । शपोऽपवादः । क्रीणाति । ई हल्यघोः । क्रीणीतः । श्नाभ्यस्तयोरातः । क्रीणन्ति । क्रीणासि । क्रीणीथः । क्रीणीथ । क्रीणामि । क्रीणीवः । क्रीणीमः । क्रीणीते क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणे । क्रीणीवहे । क्रीणीमहे । चिक्राय । चिक्रियतुः । चिक्रियुः चिक्रयिथ, चिक्रेथ । चिक्रिये । क्रेता । क्रेष्यति । क्रेष्यते । क्रीणातु क्रीणीतात् । क्रीणीताम् । अक्रीणात्, अक्रीणीत । क्रीणीयात् । क्रीणीत । क्रीयात्, क्रेषीष्ट अक्रैषीत्, अक्रेष्ट । अक्रेष्यत्, अक्रेष्यत । प्रीञ् तर्पणे ॥ २ ॥ प्रीणाति, प्रीणीते । श्रीञ् पाके ॥ ३ ॥ श्रीणाति, श्रीणीते ॥ मीञ् हिंसायाम् ॥ ४ ॥ (१)हिनुमीना । ८ । ४ । १५ । उपसर्गस्थान्निमित्तात् परयोः हिनुमीनोः णत्वं भवति । प्रमीणाति, प्रमीणीते । मिनातेरत्वं । ममौ । मिम्यतुः । ममिथ, ममाथ । मिम्ये । माता । मास्यति । मीयात् । मासीष्ट । अमासीत् ।

(१) हि गतौ वृद्धौ चेति स्वादौ पठितः । मीञ् हिंसायामिति क्र्यादौ पठितः । तयो रूपम् । प्रहिणोति । प्रमीणाति ।

असासिष्टाम् । असासत । षिञ् बन्धने ॥ ५ ॥ सिनाति, सि-षाय, सेता । स्कुञ् आप्लवने ॥ ६ ॥ स्तम्भुस्तुम्भुस्कु-म्भ्यः । २ । १ । ७९ । एभ्यः श्नुर्भवति कर्तरि गे श्ना च । स्कुनोति । स्कुनाति । स्कुनुते । स्कुनीते । चुस्काव, चुस्कुवे । स्कोता । अस्कौषीत् , अस्कोष्ट ॥ सर्वे स्तम्भ्यादयः सौत्रा-र्थाः म धिदिः । हौ हलः श्नः शानः । २ । १ । ७८ । हलः परस्य श्नास्यस्य शानो भवति हौ परतः । स्तभान ।

जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचः । २ । १ । ८० । एभ्यो लुङ्यङ् वा स्यात् ॥ स्तम्भेः । ५ । ४ । ४८ । गेः परस्य स्तम्भेः षो भवति । व्यष्टभत् । अस्तम्भीत् । युञ् बन्धने ॥ ७ ॥ युनाति, युनीते । क्नूञ् शब्दे ॥ ८ ॥ क्नूनाति, क्नूनीते । क्नविता । दृञ् हिंसायाम् ॥ १० ॥ दृणाति, दृणीते । दॄञ् हिंसायाम् ॥ १० ॥ दृणाति दृणीते ॥ पूञ् पवने ॥ ११ ॥ ल्वादेः ग्रः । ५ । २ । ७८ । ल्वादीनां शिति प्रो भवति । पुनाति, पुनीते पविता ॥ लूञ् छेदने ॥ १२ ॥ लुनाति, लुनीते । स्तृञ् आच्छादने ॥ १३ ॥ स्तृणाति । शरः (१)खयि । तस्ता-र । तस्तरतुः । तस्तरे । स्तरीता, स्तरिता स्तृणीयात्, स्तृणी-त । स्तीर्यात् ॥

लिङ्स्योर्दे ५ । १ । ९० । वृङ्वृञ्भ्यामृदन्तात्परयो लिङ्स्योरिड् वा भवति (२)दे । नालिङि । ५ । ७ । ८७ ।

(१) हलोऽनादेरित्यस्यापवादः ।

(२) देकिम् । अवारिषाम् ।

वृत इटो लिङि न दीः । स्तरिषीष्ट । उरिलिङिति स्तीर्षीष्ट । वृतो वाऽलिमसौ । अस्तारीत् । अस्तारिष्टाम् । अस्तारिषुः । अस्तरिष्ट । अस्तीर्ष्ट । कृञ् हिंसायाम् ॥ १४ ॥ कृणाति, कृणीते । चकार, चकरे ॥ वृञ् वरणे ॥ १५ ॥ वृणाति, वृणीते । ववार । ववरे । वरिता, वरीता । उदोष्ठ्य । वूर्यात । वरिषीष्ट । वूर्षीष्ट । अवारीत् । अवारिष्टाम् । अवरिष्ट अवरीष्ट । अवूर्ष्ट । धूञ् कम्पने ॥ १६ ॥ धुनाति, धुनीते धविता, धोता । अधावीत् । अधविष्ट । अधोष्ट ॥ ग्रह उपादाने ॥ १७ ॥ गृह्णाति । गृह्णीते । जग्राह, जगृहे ग्रहोऽलिटि(१)दीः । ५ । १ । ८५ । ग्रहेरेकाचः परस्य इटो दी र्न तु लिटि । गृह्णाति । गृह्णीते । जग्राह । जगृहे । ग्रहीता । गृह्णातु । हलः श्नः शानः । गृहाण । गृह्यात् । ग्रहीषीष्ट । ह्म्यन्तेति न वेप् । अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् ॥ कुष निष्कर्षे ॥ १८ ॥ कुष्णाति । कोषिता । अश भोजने ॥ १९ ॥ अश्नाति । अशिता । अशिष्यति । अश्नातु । अशान । मुष स्तेये ॥ २० ॥ मोषिता मुषाण ॥ ज्ञा अवबोधने ॥ २१ ॥ जज्ञौ । वृङ् सम्भक्तौ । २२ । वृणीते । ववृषे । ववृढ्वे । वरिता, वरीता । अवरिष्ट अवरीष्ट अवृत । इति क्र्यादयः ॥ ९ ॥

## अथ चुरादयः ।

चुर स्तेये ॥ १ ॥ पाशरूपवीणातूलश्लोक(२)सेना-

(१) अलिटि किम् । जगृहिव ।

(२) पाशाद्विमोचने । विपाशयति । रूपाद्दर्शने । रूपयति

लोमत्वचवर्मवर्णचूर्णचुरादेर्णिच् । २ । १ । २२ । एभ्यो णिच् स्यात् स्वार्थे । "च्युङः" इत्येप् । तदन्ताधव इति धुत्वं । तिप् शबादि । एबयादेशौ । चोरयति ।

णिचः । १ । २ । ६१ । णिजन्ताद्दो वा भवति फलेशे । चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । णिकमिति कच् । णौ कचीति प्रः । लिङ्च्कचिधोरिति द्वित्वं । हलोऽनादेः । "धेर्दीरिति" चस्य दीः । अचूचुरत्, अचूचुरत ॥ कथ वदने ॥ २ ॥ अकारस्य खं । परेऽचः पूर्वविधौ । १ । १ । ५७ । इति स्थानिवत्त्वान्नोढैप् । कथयति । अकारस्य खत्वाद्दीसन्वद्भावौ न । अचकथत् । गण संख्याने । ३ । गणयति ।

ईच्चगणः । ५ । २ । १८३ । गणयतेश्चस्य कचि वा ईद्भवति । अजीगणत् । अजगणत् ॥ इति चुरादयः ॥ १० ॥

---

वीणयोपगायति । उपवीणयति । तूलेनानुकरोति अनुतूलयति । श्लोकैरुपस्तौति । उपश्लोकयति सेनया अभियाति । अभिषेणयति । लोमान्यनुमार्ष्टि । अनुलोमयति । त्वचं गृह्णाति । त्वचयति वर्मणा संनह्यति । वर्मयति । वर्णं गृह्णाति । वर्णयति । चूर्णैरवध्वंसयति अवचूर्णयति । चुरादिः स्वार्थे । चोरयति । इति सूत्रोदाहरणानि ।

# अथ ण्यन्तप्रक्रिया।

**स्वतन्त्रः(१)कर्ता** । १ । २ । १२४ । स्वतन्त्रः आत्मप्रधानः कर्तृ(२) संज्ञो भवति ॥ **तत्प्रयोजको हेतुः** । १ । २ । १२५ । स्वतन्त्रस्य प्रेरको यः स हेतुसंज्ञो भवति। **हेतुमति** ।२।१।२४। हेतु(३)मतिच्यर्थे णिच् स्यात्। भवन्तं प्रेरयति भावयति भावयते। **ओः(४)पुयण्ज्यपरे**।५।२।११७। अस्योवर्णस्य इत्त्वं स्यात्पवर्गयण् जकारे ष्ववर्णे परेषु परतः। अवीभवत्। ष्ठा गतिनिवृत्तौ । १ । **अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुक् णौ वैप्** । ५ । २ । ४१ । अर्त्यादीनामाकारान्तानां च णौ परे पुग्भवत्यैप् च। स्थापयति। **स्थ इत्** । ५ । २ । ११८ । अस्योक्तः कवपरे णौ इम् स्यात्। अतिष्ठिपत्। घट चेष्टायां ॥ २ ॥ **प्रः** । ४ । ४ । ८६ । घटादीनां ज्ञपादीनां

---

(१) प्रधानीभूतधात्वर्थाश्रयत्वं स्वातंत्र्यम्। कर्तृसंज्ञाधूपात्तव्यापाराश्रयत्वं।

(२) प्रेरकः=प्रयोजकः तद्व्यापारानुकूलव्यापारवानित्यर्थः॥

(३) स्वनिष्ठाधारतानिरूपितभयता सम्बन्धेनहेतुर्यत्राविद्यतेसहेतुमान् व्यापारः। तादृशप्रयोजकव्यापारेप्रेषणादौ च वाच्येणिच्स्यादिति फलितार्थः।

(४) पक्षे वाक्यमपि साधु।

घोषः पः । घट्यति । क्षप क्षान्ते ज्ञापने च । क्षपयति । अचि-क्षपत् ॥ इति ण्यन्तप्रक्रिया ॥ १ ॥

## अथ सन्नन्तप्रक्रिया ।

**तुमीच्छायां धोर्वोप्** । २ । १ । ५ । (१)धोरिच्छायां कृते तुमि सन् वा भवति तुमश्चोप् । पठ व्यक्तायां वाचि ।१। **सन्यङोः** । ४ । ३ । ८ । सन्नन्तस्य यङन्तस्य च द्वे रूपे भवतः । पठितुमिच्छति पिपठिषति । **सगे (२)सः** । ५ । २ । १५१ । सकारादावगे सस्य तः स्यात् । अत्तुमिच्छति जिघत्सति । **हनिङ्गम्यचां सनि** । ४ । ४ । १४ । अजन्तानां हन्तेरिङादेशगमेश्च दी झलादौ सनि । **झलिकः** । १ । १ । ८३ । इगन्ताद्धोः परो झलादिः सन् किद्वति । ऋतामिद्धोः । कर्तुमिच्छति चिकीर्षति । **सनि ग्रहगुहश्च** । ५ । १ । ११८ । ग्रहगुहाभ्यां उगन्ताच्च परस्य सनो नेट् भवति । बुभूषति । इति सन्नन्तप्रक्रिया ॥ २ ॥

---

(१) धोः किम् । अगेमांभूत् । प्राचिकीर्षत् । इच्छायां किम् । कर्तुं जानातीत्यादावपि सन् स्यात्प्राप्तेः ।

(२) सः किम् । भक्ष्यति । इकः किम् । पिपासयति । झल् किम् । शिशयिषते ।

# अथ यङन्तप्रक्रिया ।

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्(१) । ३ । १ । २२ ।

धो यङ् भवति क्रियासमभिहारे ॥ यङोऽचि च । २ । ४ । ७४ । यङि यङ्लुपि च परत अस्य एव भवति । ङित्-त्वात्तङ्। पुनः पुनरतिशयेन वा भवति बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट । नित्यं कौटिल्ये गतौ । ३ । १ । २३ । नित्यं यङ् भवति गति विशेषे गम्यमाने ॥ दीर्घोऽकितः । ७ । ४ । ८३ । अकितोऽभ्यस्य दीर्घो भवति यङ्यङ्लुपोः । कुटिलं व्रजति वाव्रज्यते ॥ हलो यः(२) । ६ । ४ । ४९ । हलः परस्य यकारस्य लोपः भवत्यार्धधातुके । परस्योदेः । अतः लोपः । वाव्रजाञ्चक्रे । वाव्रजिता ॥ रीगृदुपधस्य च । ७ । ४ । ९० । ऋकारवतोऽभ्यासस्य रीगागमो भवति यङ्यङ्लुपोः । वरीवृत्यते । वरीवृताञ्चक्रे । वरीवृतिता ॥ क्षुभ्नादिषु । ८ । ४ । ३९ । णत्वं न । नरीनृत्यते । जरीगृह्यते । इति यङन्तप्रक्रिया ॥२॥

# अथ यङ्लुक् प्रक्रिया ।

यङोऽचि च । २ । ४ । ७४ । यङोऽचि परे लुक् बहुलं भवति । बहुलग्रहणात् विनापि क्वचित् । त्यक्ते त्यात्ययन्यायेन द्वित्वादिः । चकारार्थे च । धुत्वाहलादयः । अदादिपाठाच्छप् लुक् ।

---

(१) एकाच इत्येव । तेन भृशं जागर्तीति विग्रहे यङ् न । हलादेरित्येव । तेन भृशमीक्षते इति विग्रहे यङ् न ।

(२) य इति संघात ग्रहणम् । संघात ग्रहणं किं ईर्ष्येवा ।

यङो(१)वा । ५ । २ । १९२ । यङ्लुबन्तात्परस्य हलादेः पितो गस्य ईड्वा स्यात् । बोभवीति, बोभोति । बोभूतः । अभवत् । बोभुवति । बोभवाञ्चकार । बोभवामास । बोभविता । बोभविष्यति । बोभवीतु । बोभोतु । बोभूताम् । बोभुवन्तु बोभूहि । बोभवानि । अबोभवीत्, अबोभोत् । अबोभूताम् । अबोभवुः । बोभूयात् बोभूयाताम्, बोभूयुः । बोभूयास् । बोभूयास्ताम् । बोभूयास्तुः । स्थेपिति सेट्प् । यङो पेतीट्पक्षे पर्वं बाधित्वा नित्यत्वाद्वुक् । अबोभूवीत् । अबोभोत् । अबोभूताम् । अबोभुवुः । अबोभविष्यत् । इति यङ्लुप्प्रक्रिया ॥ ४ ॥

## अथ नामधुप्रक्रिया ।

स्वपेः क्यच् । २ । १ । ६ । स्व(२)स्य यदिबन्तं तस्मादिच्छायां वा क्यच् भवति ॥ सुपोधुमृदोः । १ । ४ । १४२ । धुमृदोरन्तस्यावयवस्य सुप उप् भवति । क्यचि ४।३। १४२ । अवर्णस्य इर्भवति क्यचि । आत्मनः पुत्रमिच्छति पुत्रीयति । नः क्ये । १ । २ । १०३ । नां(३)तस्य क्ये प-

(१) यङन्तानितो गस्या भावात्सामर्थ्याद्यङ्लुबन्त ग्रहणम् ।

(२) वाक्यान्माभूत् । महान्तं पुत्रमिच्छति । स्वस्येति किम् । राज्ञः पुत्रमिच्छति ।

(३) नान्तस्येति किम् । वाच्यति ।

रतः पदसंज्ञा भवति । न त्वं । राजीयति । नान्तमेवेति किम्-वाच्यति । का(१)म्यस्य । ४ । ४ । ५१ । हलः परयोः क्यच्क्यङोः खं वा स्यादगे । परस्यादेः । अतः खंः । तस्य स्थानिवत्वात् ध्युकुः इत्येष न । समिधिता । समिध्यिता । का(२)म्यः । २ । १ । ७ । उक्तविषये काम्यः स्यात् । पुत्रकाम्यति । पुत्रकाम्यिता । गौणादाचारे । २ । १ । ८ । गौणात्सिबन्तादाचारेऽर्थे वा क्यङ् भवति । पुत्रमिवाचरतीति पुत्रीयति छात्रम् । विष्णूयति द्विजम् । ( सर्वमृदभ्यः क्विब्वा भवतीत्येके ) अश्व इवाचरति अश्वति । स्व इवाचरति स्वति । ङ(३)स्य क्विझलोः क्ङिति । ४ । ४ । १२ । ङसंज्ञकस्योङोर्डीः क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति ॥ कष्टाय । २ । १ । १२ । अबन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् भवति । कष्टायक्रमते कष्टायते । पापं कर्तुमुत्सहत इत्यर्थः । रोमन्थतपः शब्दवैरकलहाभ्रकण्वमेघात्कृञि । २ । १ । १४ । एभ्यः करोत्यर्थे क्यङ् भवति । शब्दं करोति शब्दायते । मृदोऽध्यर्थो णिजबहुलं । २ । १ । १ । २८ ।

---

(१) समिधमिच्छति । समि दिवाचरतीति विग्रहे क्यच् क्यङौ भवतः ।

(२) कस्य नेत्वम् । उच्चारण सामर्थ्यात् ।

(३) ङस्येति किम् । ओदनपक् । क्वौझलादौ च किम् गम्यते । क्ङिति किम् । गन्ता ।

सूत्रो धूनामर्थे णिज् भवति बहुलं। घटं करोत्याचष्टे वा घटयति। इति नामधुप्रक्रिया।

## अथ कण्ड्वादयः।

कण्ड्वादेर्यक्। २। १। २५। कण्डूञ् इत्येवमादिभ्यो य(१)क् स्यात् स्वार्थे। कण्डूञ् गात्रविघर्षणे। १। कण्डूयति। कण्डूयते इत्यादि॥ इति कण्ड्वादयः॥

## अथ पदव्यवस्था।

### द (आत्मनेपद) प्रक्रिया।

कर्त्तरिञे। १। २। ८। कर्तरि आर्थे दो भवति। व्यतिलुनीते। (क(२)र्मव्यतिहारे ञ इति ञो विहितस्तत्सहचरितः कर्मव्यतिहारोऽत्रार्थः कर्मव्यतिहारश्च कर्मग्रहण सामर्थ्यात् क्रियाव्यतिहारः) न गतिहिंसार्थेभ्यः। १। २। ९। गत्यर्थेभ्यो हिंसार्थेभ्यश्च धुभ्यो आर्थे दो न भवति। व्यतिगच्छन्ति। व्यतिघ्नन्ति। निर्विशः। १। २। ११। निर्विशते॥ विपराजेः। १। २। १३। विजयते। पराजयते॥ स्थोऽवविप्राच्च। १। २। १७। अवतिष्ठते। वितिष्ठते। प्रतिष्ठते॥ ज्ञोऽ(३)पह्नवे। १। २। ४०।

(१) यकः कित्त्वं धुरवेर्नियामकम्। तद्धि गुणनिषेधाय क्रियते धुत्वाभावे एव प्रवृत्यात्तत्कार्यस्यपरत्मेव।

(२) कर्मव्यतिहारो नामक्रिया विनिमय इत्यर्थः।

(३) अपह्नवोऽपह्नुतिरपलापः। अथाश्रितपरोक्षविपरीत-

हातमपजानीते । अलपतीत्यर्थः । घेः । १ । २ । ४१ । जानातेर्ह्नौ भवति । सर्पिषो जानीते सर्पिषोपायेन प्रवर्तत इत्यर्थः । उदश्चरोऽ(१)धेः । १ । २ । ४८ । गुरुवचनमुच्चरते । उत्क्रम्यचरतीत्यर्थः । समो भया । १ । २ । ४९ । रथेन सञ्चरते । स्वीकृतावुपाद्यमः । १ । २ । ५० । उपपूर्वाद्यमः स्वीकृतावर्थे ह्नौ भवति । दास्या संयच्छते का(२)मी । सनः पूर्ववत् । १ । २ । ५७ । पूर्वो यो धुस्तद्वत्सन्नन्ताद्ह्नौ भवति । शिशयिषते । पदिदिषते ॥ हलन्तात् । १ । १ । ८४ । इको(३)ऽन्तः समीपो यो हल् तदन्तार्द्धौझलादिः सन्किद् भवति । बिभित्सते ॥ गन्ध(४)नावक्षेपसेवनन्यायप्रतिपन्नप्रकथोपयोगेकृञः । १ । २ । २७ । एष्वर्थेषु कृञो ह्नौ भवति । गन्धनं–सूचनं । उत्कुरुते । सूचयतीत्यर्थः । अवक्षेपो–भर्त्सनम् । श्येनो वर्ति-

---

कौधमायतदुपपादकाभावप्रतिपादनेच्छाभपलाप इति हृदयम् ।

(१) अधेरिति किम् । बाष्पमुच्चरति । उपरिष्टाद्गच्छतीत्यर्थः ।

(२) कामी सत्संपेदातीत्यर्थः । अशिष्टव्यवहारेऽर्थे भायसकऽया इति नियमेन मा भवति ।

(३) इकोऽन्तात् किम् । यियक्षते । झलादिः किम् । चिवर्तिषते । कर्तरीत्येव । भावकर्मणो मांभूत् ।

(४) एषु किम् । कटं करोति ।

कामुपकुरुते । जिनमुपकुरुते । सेवत इत्यर्थः । परदारान् प्रकुरुते तेषु सहसा प्रवर्तते । एधोदकस्योपस्कुरुते । गुणमाधत्ते । कथाः प्रकुरुते । कथयतीत्यर्थः । शतं प्रकुरुते । धर्मार्थं विनियुंक्ते । पचतीति किं ? धर्मं करोति ॥ भुजोऽनवने । ओदनं भुंक्ते । अनवने किं महीं भुनक्ति महीपालः । इति दप्रक्रिया ॥

## अथ मप्रक्रिया ॥

परानुकृञः । १ । २ । ७५ । परानुभ्यां कृञो मं भवति । अनुकरोति, पराकरोति ॥ प्रत्यभ्यत्क्षिपः । १ । २ । ७६ । प्रत्यभ्यां क्षिपेर्मं भवति । अभिक्षिपति ॥ प्राद्वहः । १ । २ । ७७ । प्रवहति ॥ मृषः परेः(१) १ । २ । ७८ । परिमृषति । व्याङ्श्चरमः । १ । २ । ७९ । विरमति । उपात् । १ । २ । ८० । देवदत्तमुपरमति । उपरमयतीत्यर्थः । इति पदव्यवस्था । ७ ।

## अथ भावकर्म प्रक्रिया ॥

क्तौ । १ । २ । ७ । ज्ञावर्थे दो भवति ॥ गे यक् । २ । १ । ६३ । धोर्यक् भवति क्ङ्वाश्रिते गपरे । आख्यातवाच्यस्य भा(२)वस्यैकत्वात् अस्मद्युष्मत्संज्ञाभावाच्चान्यसंज्ञक प-

(१) इह परे रिति योगविभज्य परिवहतीत्यपि सिद्ध्यति ।

(२) साध्यरूपा सिद्धरूपा वा क्रियाभावः । अत्र साध्यत्वं च क्रियान्तराकांक्षानुत्थापकतावच्छेदक रूपवत्त्वम् । यथा पचति करोति । इत्यादि । सिद्धत्वंच क्रियान्तराकांक्षोत्थापकतावच्छेदक धर्मवत्त्वम् यथा पाक इति ।

क एव च भवति। त्वया मया अन्यैश्च भूयते। बभूवे। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च । ४ । ४ । ६० । उपदेशेऽजन्तेभ्यो हनदृग्भ्यश्च परेषां स्यादीनां भावकर्मणोः ञिवत्कार्यं स्यादिडागमश्च ञिवद्भावपक्षेऽयमिट्। ञिवद्भावाद् वृद्धिः। भाविता, भविता। भाविष्यते, भविष्यते। भूयताम्। अभूयत। भाविषीष्ट। भविषीष्ट। कर्मण्यात्मनि । २ । १ । ५३ । यदा सौकर्यात् कर्म कर्तृत्वेन विवक्ष्यते तदा कर्मण्यात्मनि विहिते तशब्दे परतो वा ञि भवति। अकारि कटः स्वयमेव। (विवक्षाद् कर्मकोऽपि सकर्मकः) अनुभूयते आनन्दश्चैत्रेण त्वया मया च। अनुभूयेते। अनुभूयन्ते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषाताम्, अन्वभविषाताम्। णि खं। भाव्यते। भावयाञ्चक्रे। भावयाम्बभूवे। भावयामासे। ञिवद्। "असिद्धवदत्राभात्" इत्यसिद्धत्वाण्णिखं। भाविता भावयिता। भाविष्यते। भावयिष्यते। आभाव्यत। भाव्येत। भाविषीष्ट। भावयिषीष्ट। अभावि। अभाविषाताम्। अभावयिषाताम्। बुभूष्यते बुभूषाञ्चक्रे। बुभूषिता। बुभूषिष्यते। बोभूय्यते। बोभूयाञ्चक्रे। दीर्घः। स्तूयते। ञिनः। स्ताविता, स्तोता। स्ताविष्यते, स्तोष्यते। अस्तावि। अस्ताविषाताम्, अस्तोषाताम्। ऋगतौ। गुणोऽर्तीति गुणः। अर्यते। स्मर्यते। सस्मरे। ञिवदिट्। आरिता, अर्ता। स्मारिता, स्मर्ता। हलुक इति न खं। स्रस्यते। इदितो निति·

जुम् । नन्द्यते । जिः । इज्यते । तपोऽनुताऽपे च । २ । १ । ५६ । अस्मात् जिर्न भवति कर्मकर्तर्यनुतापे च । अन्वतप्त पापेन(१) । तनोतेर्यकि । ४ । ४ । ४५ । तनोते रात्वं वा स्याद्यकि । तायते, तन्यते । दायिते, दये । जिकृणो युक् । ५ । २ । ३८ । आतो युगागमो भवति, कृति ञिणति च परे । दायिता, दाता । दायिषीष्ट, दासीष्ट । अदायि । अदायिषाताम् । भज्यते । भञ्जे ञौ । ४ । ४ । ३१ । भञ्जे र्नं खं वा भवति ञौ परतः । अभाजि अभञ्जि । लभ्यते ॥ ञिणमोर्वा र्गेः । ५ । १ । ४८ । लभे र्नुमागमो वा भवति । अलम्भि, अलाभि । इति भावकर्म प्रक्रिया । ८ ।

## अथ कर्मकर्तृप्रक्रिया ।

यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात्कर्तरि भावे च लकाराः । कृ(२) र्मवत्कृऽन्वादीनां ॥ २ । १ । ७९ । अवस्थादिवर्जितानां धूनां कर्म(३)क

(१) पुंसेति शेषः । अविचार्य कर्म कृत्वा पश्चादशोचीत्यर्थः ।

(२) कर्म कर्तृत्वं च । धूपात्त व्यापाराश्रयत्वे सति णिजर्थव्यापारेणाऽऽप्यमानत्वेन विवक्षितत्वम् ।

(३) कर्मणा तुल्य क्रियः कर्ता कर्म वत्स्यादिति फलितार्थः । कर्म कारकं यदा कर्तृत्वेन विवक्ष्यते तदा कर्म कार्याणि यगादीनि भवन्तीति भावः । तत् किम् । ध्याश्रयो भावे लो यथा स्यात् । भिद्यते कुसूलेन ।

तरि विहिते लकारे कर्मवत् कार्यं भवति। तेन यगादयो भवन्ति। भिद्यते कुशूलः स्वयमेव। एवं पच्यते फलं स्वयमेव। अपाचि, अभेदि। भावे। भिद्यते काष्ठेन। इति कर्मकर्तृप्रक्रिया।

# अथ लकारार्थ प्रक्रिया।

**अयद्यभिज्ञोक्तौ लृट्।** २। २। ९३। अविद्यमाने यच्छब्दे (१)अभिज्ञावचने वाचि धोर्लृट् स्यात्। लङोऽपवादः। वस निवासे। १। स्मरसि जिनश्च मथु(२)रायां वत्स्यामः। अयदि किम्। अभिजानासि जिनश्च यद्वने अभुञ्ज्महि। एवं बुध्यसे, चेतयसे। (३)स्मे।२।२।१००। धोर्लट् भवति स्मे परे। लिटोऽपवादः। यजतिस्म देवश्चः। **वा परे।** २।३। ११४। अवधेः परस्मिन् भागे काले वर्त्स्यति लडादिर्भवत्यनहोरात्रे। कदागतोऽसि। अयमागच्छामि, अयमागमं वा। कदागमिष्यसि। एष गच्छामि, गमिष्यामि वा। **हेतुफलयोर्लिङ्।** २। ३। १३२। हेतौ तत्काले च स्वर्थे वर्तमानाद्धोर्लिङ् भवति। जिनंनमेच्चेत् सुखं यायात्। जिनं नस्यति चेत्सु-

(१) अभिज्ञावचनं—स्मरणपर्यायोपपदम्। तस्मिन्नुपपदे लृट् भवतीति फलितार्थः।

(२) मथुराधिकरणकास्मत् कर्तृकभूतानद्यतनवासकर्मकं स्मरणमिति शाब्दबोधः।

(३) स्मशब्दो भूतकालद्योतकः।

स्वं यास्यति । भविष्यत्येव ध्यते । नेह हन्तीतिपलायते । विधिनिमन्त्रणेति लिङ् । विधिः प्रेरणं भृत्यादेः निकृष्टस्य प्रवर्त्तनम् । यजेत । निमन्त्रणं नियोगकरणं । आवश्यकं कुर्यात सामायिकम् । आमन्त्रणं स्वे च्छाकरणं । इह भवानासीत । अधीष्टः सत्कारपूर्वको व्यापारः । पुत्रमध्यापयेद्भवान् । संप्रश्नः संप्रधारणं किं भो जैनेन्द्रमधीयीय । उत तर्कम् । प्रार्थनं-याच्ञा । भोभोजनंलभेत । एवं लोट् इति लकारार्थं प्रक्रिया ।१०।

## अथ कृदन्ताः ।

कृदमिङ् । २ । १ । ८० । इतः प्रभृत्यत्र धोरधिकारे मिङ् वर्जितास्त्याः कृत्संज्ञा भवन्ति । प्राक्त्वोऽसमः । २ । १ । ८१ । ण्वु इत्यस्मात् प्राक् येत्यास्तेत्यसंज्ञका भवन्ति ।

कर्त्तरि(१)कृत् । २ । ४ । ५२ । कृत्यः कर्त्तरि स्यात् । इति प्राप्ते । तयोर्व्यक्तखार्थाः । २ । ४ । ५५ । एते भावकर्मणोरेव स्युः । तव्यानीयौ । २ । १ । ८३ । धोरेतौत्यौस्तः । एधितव्यं । एधनीयंत्वया । ( भावे औत्सर्गिकमेकवचनं क्लीबत्वंच ) चेतव्यश्चयनीयो वाधर्मस्त्वया । गुजूल्वाद्बहु(२)लम् । २ । ३ । ८५ । गुज् त्यसंज्ञकाश्च बहु-

---

(१) अनिर्दिष्टार्थाः कृतः कर्तरिभवन्तीति फलितार्थः ।

(२) बहूनर्थान् लाति गृह्णातीतिविग्रहे कस्त्यः । इटिचात्वं च भवति ।

ले भवन्ति । क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्, विभाषाक्वचिदन्यदेव । विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥ स्नात्यनेन तिस्नानीयं चूर्णं । दीयतेऽस्मै दानीयो विप्रः । **धोऽचोरासुयुवः** । २ । १ । ८४ । अजन्ताद्धोर्यो भवति रादीन् वर्जयित्वा ॥ **ईर्थे** । ४ । ४ । ६३ । आकारांतस्य धोरीत्वं भवति । देयं । ग्लेयं । पोरदुङो **ऽपि चपिरपिलपिचमः** । २ । १ । ८५ । पवर्गांताद्दुङो धो यो भवति शपादीन् वर्जयित्वा । शप्यम् । लभ्यम् ॥ **पिति कृति तुक्** । ४ । ३ । ५८ । प्रांत(१)स्य तुगागमो भवति पिति कृति परतः । इत्यः । स्तुत्यः । शास अनुशिष्टौ ॥ **शास(२)इत्** ।४।४।३२। शासउ
ङ इत्त्वमत्याङि हलादौ च किङति । शिष्यः । वृत्यः । आदृत्यः । जुष्यः । **कृमृजुषधृजपशासदुहगुहः** । २ । १ । ९८ । एभ्यः क्यप् वा भवति । कृत्यं । मृज्यं । **ण्यः** । २ । १ । १०० । धोर्ण्यो भवति । कार्यम् । भार्यम् । हार्यम् । च(३)**जोः कुघिण्यतोऽस्नेऽनिटः** । ५ । २ । ५ । ५६ ।

(१) प्रांतस्येति किम् । ग्रामणीः । पिति किम् । कृतम् । कृति किम् । पटुतरः । ननु ग्रामणिकुलमित्यादौ तुक् स्यादिति चेन्न । ह्रस्वस्य बहिरङ्गत्वेनासिद्धत्वात् । अत एव तुगागमो न भवतीति बोध्यः ।

(२) अङिहलादौ च किम् । शासति । किङति किम् शास्ति ।

(३) अत्र यथा संख्यं नेष्यते । तेन रक्तं रागादिति सिद्धान् ।

भनिंटो घौ अकार उकारयोः कुत्वं स्यात् णिति ण्ये च परतः । मृजेरैप् । ५ । २ । १। मृजगौरैब्भवति । मार्ग्यः । भुजोऽद्यौ । ५ । २ । ७६ । भुजश्चार्थे ण्ये कुत्वं भवति। भोज्यम् । भोज्यमन्यत् । इति कृदन्त कृत्य प्रकृया ।

## ॥ अथ कृदन्ताः ॥

ण्वुतृच् । २ । १ । १०५ । धोरेतौस्तः कर्तरि। युवोरनाकौ । ५ । १ । १ युवु एतयो रनाकौ स्तः । कारक(१) कः । कर्ता ॥ नन्दिग्रहि पचादिभ्योल्युणिनस्चः । २ । १ । १०६ । नन्द्यादेर्ल्युः ग्रहादेर्णिन् पचादेरच्स्यात् । नन्दतीति नन्दनः। जनमर्दयतीतिजनार्दनः। लवणः। ग्राही । स्थायी । मन्त्री । ज्ञाकृप्रीगुडः कः । २ । १ । १०७ । एभ्यः कःस्यात् । जानातीतिज्ञः । कृशः । प्रियः । आतो गो । २ । १ । ०८ । आकारान्ताद्धोः को भवति गावाचि । प्रज्ञः । सुग्लः ॥ गेहेकः । २ । १ । १.१० । गे(२)हे कर्तरिग्रहेः कोभवति । गृहम् । कर्मण्य(३)ण् । २ । २ । १ । कर्मणि वाचि धोरण् भवति । कुम्भ-

(१) करोतीति विग्रहः

(२) गृह्णाति धान्यादि कमिति गृहम् ।

(३) तत्र त्रिविधकर्म । निर्वर्त्यं, विकार्यं प्राप्यं चेति भेदात् तत्र निवर्त्यं-कुम्भकारः । विकार्यः । काण्डंलु नातीतिकाण्डलावः ।

कारः । आतः कः । २ । २ । ३ । आकारांताद्धोः कर्मणि-
वाचि को भवति । अणोऽपवादः । इतिचात्रं । गोदः । धनदः ।
कम्बलदः ।(ग) मूल विभुजादिभ्यः कः । मूलानि विभुजतीति
मूल विभुजो रथः । अलरुद्रम् । महीध्रः । च रेष्टः । २ ।
२ । २१ । अधिकरणवाचिचरेष्टो भवति । कुरुचरः
भि(१)क्षासे नादाये २ । २ । २२ । भिक्षादिषु वाक्षु
चरेष्टो भवति । भिक्षाचरः । से नाचरः । आदये तिष्यान्तः
आदायचरः । कृञो हेतुशीलानुलोम्येऽशब्दश्लोक
कलह(२)गाथावैरचाटूसूत्रमन्त्रपदे । २ । २ । २५ ।
शब्दादि वर्जिते कर्मणिवाचि कृञष्टः स्यात् हेतौ शीलेऽनुलोम्ये
च गम्यमाने । कृ कमि कंस कुम्भ कुशा कर्णी
पात्रेऽतोऽस्रोः ५ । ४ । ३४ । कृ कम्यादि स्थतः परस्या
भ्रेरव्युरस्थस्य रेफस्य से सिर्भवति । यशस्करी विद्या । वचन-
करः । यशस्कर्गा । अतः किम्–गीःकारः । अभ्रेः किम् । स्वः
कामः । से किम् । यशः करोति । एजेः खश् । २ । २ ।
३२ । ण्यन्तादेजेः खश् स्यात् । मुमचः । ४ । ३ । १७७ ।
अजन्तस्याभ्रे मुम् भवति खितिकृति परतः । जनमे(३)जय-

(१) कथं सहचरः सहचरीति प्रयोगसिद्धिरिति चेदुच्यते पचादिषु चरडिति पठ्यते । अत एव प्रयोगसिद्धिः सुल-भैव स्यात् ।

(२) अनुलोम्येतिकिम् । कुम्भकारः ।

(३) जनान् कम्पयतीत्यर्थः ।

तीति जनमेजयः। प्रियवशेवदः खच् । २ । २ । ३९ । प्रियंवदः । वशंवदः । मन्वन् क्वनिविचः क्वचित् । २ । २ । ६२ । एते त्याः क्वचिद्दृश्यन्ते । वश्चि । ५ । १ । ११४ । धोर्वशादौ परे नेड् भवति । शृ हिंसायाम् । सुशर्मा । प्रातरित्वा । खम्याः । ४ । ४ । ४१ । खम्नतस्य धोरात्स्या द्वन्यादौपरतः । रुष् रिष् हिंसाम् । रोट्-इ रेट्-इ । क्विप् । २ । २ । ६३ । धोः क्विप् क्वचिद् दृश्यते । उखा-स्रत् । पर्णध्वत् । वाहभ्रट् इ । सुपि शीलेऽजातौ णिन् । २ । २ । ६६ । जातिवर्जिते सुपिवाचि धोर्णिन् भवतिशीले (१)गम्यमाने । उष्णभोजी । मनः । २ । २ । ७० । सुपि मन्यते र्णिन् स्यात् । दर्शनीयमानी । खश्चात्मनः । २ । २ । ७१ । स्वस्या(२)त्मनः सुपि वाचि मन्यतेः खश् स्यात् चाण्णिन् । पण्डित मात्मानं मन्यते पण्डितंमन्यः। पण्डितमानी। खित्यऽक्षेः । ४ । ३ । १२६ । खिदन्ते परे पूर्व पदस्य प्रःस्यान्नुभेः । ततोमुम् । कालिं मन्या । करणेयजः । २ । २ । ७३ । करणे सुबन्ते वाचि (३)भूतार्थे यजेर्णिन् भवति कर्तरि । सोमेनेष्टवान सोमयाजी । अग्निष्टोम याजी (४)दृशेः

( १ ) शीलेगम्यमानेकिम् । कदाचिदुष्णम् भुङ्क्ते ।

( २ ) आत्मनः किम् । दर्शनीयमानी देवदत्तो जिनदत्तस्य ।

( ३ ) भूतार्थे किम् । सोमेन यजते ।

( ४ ) न च पारदृश्वेत्यादौ मन्वन्नित्यादिना क्वनिपि सिद्धे

क्वनिप् । ३ । २ । ८१ । कर्मणि भूते । पारंदृष्टवान् पार-दृश्वा । **राजनि युधि कृञः** । ३ । २ । ८२ । क्वनिप् स्यात् । युधिरन्तर्भावितण्यर्थः । राजानं योधितवान्-राज-युध्वा । राजकृत्वा । **सहे** । ३ । २ । ८३ । कर्मणीति निवृ-त्तम् । सह योधितवान्, सहयुध्वा । सहकृत्वा । **जनेर्डः** । ३ । २ । ८४ । **घे कृति बहुलं** । ४ । ३ । १४ । ङेरलुप् । सरसिजम् । सरोजम् । **क्वचित्** । ३ । २ । ९९ । क्वचिदन्यस्मिन्नपि जनेर्डो भवति । प्रजा । **क्तक्तवतू** । १ । १ । २८ । क्तक्तवतू तसंज्ञौ भवतः । **तः** । ३ । २ । ८५ । धोर्भूते तसंज्ञकस्त्यो भवति । तत्र तयोरेवेति भावकर्मणोः क्तः । कर्तरि कृदितिकर्तरिक्तवतुः । उकावितौ । स्नातंमया । स्तुतस्त्व-याविष्णुः । **द्रान्तस्य तोनः पूर्वस्य ऽद्योऽमूर्च्छिमदाम्** । ५ । ३ । ५९ । (१)दकाररेफाभ्यां परस्य तसंज्ञकस्य तस्य नत्वं भवति पूर्वस्य दस्य च प्रादीन् वर्जयित्वा । शीर्णः । भिन्नः छिन्नः । **स्फादे(२)रातोधोर्यण्वतोऽध्यारुपः** । ५ । ३ । ६० । त संज्ञकस्य तस्य नो भवति । द्राणः। ग्लानः। **ल्वादेः** ।

---

पुनः क्वनिप् विधानं व्यर्थमितिवाच्यम् । त्यान्तरबाधनार्थ मावश्यकत्वात् ।

(१) दकार रेफाभ्याम् किम् । कृतम् । तसंज्ञकस्येति-किम् । कर्ता । पूर्वस्य किम् । परस्यमाभूत् । भिन्नवद्भ्याम् ।

(२) स्फादेरिति किम् । यातः । आतःकिम् । च्युतः ।

५ । ३ । ६१ । ल्वादिभ्यस्तसंज्ञकस्य तस्य नो भवति । लूनः । ज्यानः । ग्रहिज्येतीक् । हलः । ४ । ४ । २ । गोर्यच(१)वाद्धलः परस्येगन्तस्य दीर्भवति । जीनः । ओदितः । ५ । ३ । ६३ । ओकारेतस्तत्तकारस्य नो भवति । भुजो भुग्नः । टुओश्वि गतिवृद्ध्योः—उच्छूनः ।शुषि पचेः कौ । ५ । ३ । ६८ । आभ्यां तकारस्य ककारवकारौ भवतः । शुष्कः । पक्वः । क्षै क्षये । क्षै मः । ५ । ३ । ६८ । क्षामः । ते सेटि । ४ ।४।५३ । णेः खं ।भावितः । भावितवान् । दृह हिंसायाम् । दृढं बलिस्थूले । ५ । १ । १२४ स्थूले बलवति च निपात्यते । घाप्रोर्हिः । ५ । २ । १४६ । धाप्रो हिर्भवति । हितम् । दो दद्घोः । ५ । २ । १४८ । दा इत्येतस्य घुसंज्ञकस्य दद्भवति किति परे । चत्वं । दत्तः । लि(२)टः क्वसुकानौ । २ । २ । १०३ । लिटः स्थाने क्वसुकानौ स्तः । "इङानंदः" । चक्राणः। म्वोः । ५ । २ । ८४। धो मंकारस्य नत्वंभवति म्वो परतः । जगन्वान् । (३)सत्क्रुटः । २ । ३ । १३ । संप्रतिकाले यो लट् तस्य शतृशानौ

---

(१) गोरचयवादितिकिम् । निरुतम् ।

(२) लिट् ग्रहणमन्यत्यान्तरत्वशंका निरासार्थम् ।

(३) ननु पचतितरामित्यादौ शत्रुस्त्यः स्यादिति चेन्न । व्यवस्थित विभाषा श्रयणात् । व्यवस्थित विभाषानाम प्राप्ताप्राप्त विभाषेत्यर्थः ।

विभाषयास्तः । पचन्तं चैत्रं पश्य । आनेमुक् । ५ । १ । १४१ । गोरकारांतस्य मुगागमो भवत्यानेपरे । । पचमानं चैत्रं पश्य ( विभाषा ग्रहणेन क्वचित् वा सामानाधिकरण्येऽपि स्यात् ) सन् द्विजः । विदेः शतुर्वसुः । ५ । १ । ५५ । विदः परस्य शतुर्वसुर्भवति । विद्वान् । तौसत् । २ । ३ । १३ । तौ शतृशानचौसत्संज्ञौस्तः । विभाषा लृटः सत् । २ । ३ । १३ । परस्मैति लृट् तस्य स्थाने सत्संज्ञौ शतृशानौ विभाषया भवतः । करिष्यन्तं । करिष्यमाणं पश्य आक्वेः शीलधर्मसाधुत्वे । २ । २ । ११२ । आ एतस्मात् क्विप् संशब्दनात् यानित ऊर्ध्वं वक्ष्यमाणास्त्याः शील धर्मसाधुत्वेषु वेदितव्याः । तृन् । २ । २ । १२५ । कर्ता कटान् । जल्पभिक्षकुट्टलुण्टवृङष्टाकः । २ । २ । १३८ । जल्पाकः । भिक्षाकः । लुण्टाकः । वराकः । सनाशंस(१)भिक्ष उः । २ । ४७ । चिकीर्षुः । आशंसुः । भिक्षुः । अन्येभ्योऽपि । २ । २ । १५७ । अन्येभ्योऽपि धुभ्यः शीलादिषु क्विप् भवति । भ्राजभासधुर्विद्युतोर्जिपृजुभ्यः क्विप् वक्तव्यः । विभ्राट् भाः । र्वोः । ४ । ४ । १९ । रेफान्तयोर्वोरूपधाया दीर्घः । रेफपरयो र्वोः खं भवति । धूः विद्युत् ऊर्क्, पूः । जूः । ग्रावस्तुवः क्विप् । २।२।१५६। ग्रावस्तुत् । क्विब् वचिप्रच्छायतस्तु कटप्रु जुश्रीणांदी र्घसम्प्रसारणश्च)

( १ ) आङः शसि इच्छायामित्यस्यैव ग्रहणं न त्वन्यस्यव्याख्यानात् ।

छ्वोः शूट् च । ४ । ४ । १७ । धोश्छकार वकारयोः शूठा वा देशी स्तो ङ्संज्ञे झलादौ क्विति क्वौ च परतः । पृच्छतीति प्राट् । आयतं स्तौतीति आयतस्तूः । कटं प्रवते कटप्रूः । श्रयति हरिं श्रीः । दाम्नीशस युयुजस्तुतुदसिसिचमिहपतदशनहः करणे त्रट् । २ । ३ । १६० । एभ्यः करणे त्रट् स्यात् । दात्यनेन दात्रम् नितुत्रनथसि सुसरकसेऽग्रहादेः । ५ । १ । ११६ । एषां कृत्यानां इट् न भवति । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेढ्रम् । पत्रम् । दंष्ट्रा । नद्ध्री । लूधूसूखनर्तिसहचर इत्रः । २ । ३ । १६२ । लवित्रम् । धवित्रम् । अरित्रम् । पुवः स्वौ । २ । ३ । १६३ । पवित्रम् । "कृवापाजिमिस्वदिसाध्यश्भ्यउण्" करोतीति कारुः । वातीति वायुः । पायुर्गुदम् । आयुरौषधम् । मायुः पित्तम् । स्वादुः । साध्नोति परकार्यमिति साधुः । (१)उणादयो बहुलम् । २ । ३ । १६७ । उण् इत्येवमादयस्त्याः सति काले बहुलं भवंति । केचिदविहिताऽप्यूह्याः । बहुलग्रहणेन क्वचिद्भूतेऽपि दृश्यन्ते । कषितोऽसौ कषिः । ततोऽसौ तन्तिः । भसितं भस्म । चरितं चर्म्म । वुण्तुमौ

---

( १ ) सम्प्रति कालेऽचर्थेखौविषये उणादयोबहुलं स्युरिति फलितार्थः । बहुलग्रहणादन्यथापि प्रकृतीत्यादिकल्पनया यथा प्रयोगं शब्दा ऊह्याः ।

क्रियायां तदर्थायाम् । २ । ३ । ८ । क्रियार्थायां (१)क्रियायामुपपदे भविष्यति काले तुण्तुमौ भवतः । जिनं द्रष्टुं याति । जिनं दर्शको याति । कालसमयवेलासु तुम्वा । २ । ४ । १४१ । कालादिषु वाच्येषु धो वा तुम् भवति । कालः समयो वेला वा भोक्तुम् । भावे । २ । ३ । १७ । भावे धोर्घञ् भवति । पाकः । (१)अकर्तरि । २ । ३ । १८ । कर्तृवर्जिते कारके घञ् स्यात्स्त्री । घञि भावकरणे । ४ । ४ । २१ । रंजेर्नखं स्यात् । रंजनं रज्यते वा रागः । अनयोः किम् ? रज्यत्यस्मिन्निति रङ्गः । निवासचितिशरीरोपसमाधाने चः कः । २ । २ । ३९ । एषु चिनो ते घञ् भवति चकारस्य च ककारः । निकायः । कायः । गोमयनिकायः । ऋवृग्रहदृगमोऽप् । २ । ३ । ५२ । इवर्णोवर्णऋवर्णान्तेभ्योग्रहादिभ्यश्चाभ्योऽप् त्योभवति । चयः । अयः । यवः । रवः । लवः । करः । गरः । शरः । ग्रहः । वरः । आदरः । गमः । (वा) घञर्थे कविधानं । प्रस्थः । विघ्नः । ड्वितः क्त्रिः । २ । ३ । ७० । क्त्रेः । ३ । १७२ । क्त्रिस्यान्तोऽम भवति । पक्त्रिमं । कृत्रिमं । द्वितोऽथुः । २ । ३ । ७१ । टुवेपृ कम्पने । वेपथुः ।

---

(१) क्रियायां किम् । भिक्षिष्य इत्यस्यजटाः । क्रियार्थायां किम् । धावतस्ते पतिष्यतिदण्डः ।

(१) प्रासीदन्त्यस्मिन्निति प्रासादः ।

यजयाचयतविच्छप्रच्छरक्षस्वपो नङ् । २ । ३ । ७२ । यत्नः । यज्ञः । याच्ञा । विश्नः । प्रश्नः । रक्ष्णः । स्वप्नः । ञौ घोः किः । २ । ३ । ७३ । प्रधिः । उपाधिः । (१)स्त्रियां क्तिः । २ । ३ । ७४ । स्त्रीलिङ्गे भावे क्तिः स्यात् । घञोऽपवादः । कृतिः । स्तुतिः । [संपदादिभ्यः क्विबपि वक्तव्यः] संपत् । (२) विपत् । ऋल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् । कीर्णिः । गीर्णिः । लूनिः । पूनिः । यूतिजूति सातिहेति कीर्तयः । २ । ३ । ७८ । एते निपात्यन्ते । ज्वरत्वरस्रिव्यविमवां वोर्ङ्कोः । ४ । ४ । १८ । ज्वरादीनां वकारस्योङ्च ऊर्भवति झलादौ क्वौ च परे । जूः । तूः । स्रूः । ऊः । मूः । इ(३)च्छा । २ । ३ । ८३ । इषेर्निपातोऽयम् । अः स्यात् । २ । ३ । ८४ । स्यान्तेभ्यो धुभ्यः स्त्रियाम त्यो भवति । चिकीर्षा । पुत्रकाम्या । सरोर्हलः । २ । ३ । ८५ । सरहलन्तो यो धुः ततः स्त्रियामत्यो भवति । ईहा । ण्यास-श्रन्थघट्टिवन्दिविदो युच् । २ । ३ । ८९ । एतेभ्यो धुभ्यः स्त्रियां युच् भवति । कारणा । श्रन्थना । घट्टना । वन्दना । वेदना । नङभावे क्तः । २ । ३ । ७५ युट् । २ ।

(१) घञादीनामपवादोऽयम् ।

(२) क्त्यपीष्यते—संपत्तिः, विपत्तिः, आपत्तिः ।

(३) इषेर्भावे स्त्रीयांयः यगभावश्चनिपात्यतोऽरपवादोऽयम् ।

३ । ९७ । हसितम् । हसनम् । पुं(१)सि घः प्रायेण । ३ । ३ । १०० । छादेर्घे । ६ । ४ । ९६ । छादेरुङ्कः ह्रो भवति घप्रत्यये परे । दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छदः । आकुर्वन्त्यस्मिन्नित्याकरः । अवे तॄस्त्रोर्घञ् । ३ । ३ । १२० । अवपराभ्यामाभ्यां घञ् स्यात् । अवतारः । अवस्तारः । हलः । ३ ।३। १२१। हलन्ताद्धोर्घञ् स्यात् । घाप वादोऽयम् । रमन्ते योगिनोऽस्मिन्निति रामः । अपामार्गः । ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् । ३।३।१२६।करणाधारइति निवृत्तं एषु वाच्येषु कृच्छ्राकृच्छ्रवृत्तिषु धोः खो भवति । कृच्छ्रे । दुष्करः कटो भवता । अकृच्छ्रे ।ईषत्करः । युजादिभ्यश्च।३।३। १२८ । खापवादोऽयम् । सुपानं पयो भवता । ईषत्पानम् । दुष्पानं । निषेधेऽलं खल्वोः क्त्वा । ३ । ४ । १८ । निषे(२) धवाचिनो अलंख ल्वो वाचोः क्त्वा स्यात् । "क्रो-दद्भोः" अलंदत्वा भूमारथेतीश्वम्—पीत्वा खलु । अलंखल्वोः किम् ? माकार्षीत् । निषेधवाचिनः किम्— अलंकारः । परकालैककर्तृकात् । ३ । ४ । २१ । परकालक्रियायाः (३)एककर्तृकात् पूर्वकालाद्धोः क्त्वा स्यात् ।

(१) पुम् किम् । प्रसाधनम् । सौकिम् । प्रहरणोद्दण्डः ।

(२) निषेधेकिम् । अलङ्कारः ।

(३) एक कर्तृ कात् किम् । भुक्तवति ब्राह्मणे व्रजतिदेवदत्तः ।

भुक्त्वा पीत्वा व्रजति । क्युङोऽशो हलः सन् । १ । १ । ९६ । उकारेकारोङोः हलादे रवन्तात्य सः सन् क्त्वा सैतौ सेटौ वा कितौ भवतः । द्युतित्वा, द्योतित्वा । लिखित्वा । लेखित्वा । व्युङ इति किम्—वर्तित्वा । अश इति किम्—देवित्वा । हलादेरिति किम्—एषित्वा । सेन् किम्—भुक्त्वा । वोदितः । ५ । १ । १०४ । उदितः परस्य क्त्वा-त्यस्य वेड् भवति । शान्त्वा, शमित्वा । देवित्वा । द्यूत्वा, हित्वा । हाकः हित्व । ५ । २ । १४७ । हाकः (१)हि-र्भवति क्त्वा त्ये परे । हित्वा, । हाङस्तु हात्वा । त्यपि तिसेवाक् से क्त्वः । ५ । १ । ३१ । तिसेवाक्से क्त्वत्यस्य य्यादेशो भवति । प्रकृत्य । वाक्से किम् ? अकृत्वा । णम् चाभीक्ष्ण्ये । २।४।८। परकालैक कर्तृकात् णमित्यर्थं त्यो भवति क्त्वात्यश्च । "क्त्वाणमौ द्वित्वमपेक्ष्या भीक्ष्ण्यं द्योतयतः"। स्मारं स्मारं नमति जिनं । स्मृत्वा, स्मृत्वा । पायम्पायम् । भोजम्भोजम् । श्रावंश्रावम् । अन्यथैवंकथमित्थं स्वऽन-र्थात् । २ । ४ । १२ । एतेषु वाक्षुभ्योणम् भव त्यन-र्थात् । अन्यथा कारं । एवं कारं । कथं कारं । अनर्थादिति किम्—शिरोऽन्यथाकृत्वा भुङ्क्ते । इति कृदन्तः ॥

(१) हित्वा राज्यं वनं गतः ।

# अथविभक्त्यर्थाः ।

**प्रातिपदिकार्थ(१) लिङ्गपरिमाणवचनमात्रे प्रथमा ।** २ । ३ । ४६ । नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात् । उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । तटः । तटी । तटम् । द्रोणो व्रीहिः । एकः । द्वौ । बहवः । (सम्बोधने(२) ऽपि प्रथमा) हे देवदत्त । (इति प्रथमा) । **कर्तु(३)रीप्सिततमं कर्म ।** १ । ४ । ४९ । कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं भवति । **कर्म(४)णि द्वितीया ।** २ । ३ । २ । अनुक्ते कर्मणि कारके द्वितीया ।

---

(१) गौश्चरतीत्यादौ गोशब्दस्यान्वयः क्रियायामेवजायतेऽभयो-रप्यन्वयान्वयीभावत्वेन कार्योपस्थितिजनकत्वात् ननुचरतीति-कर्तृत्वफलकारेणगोशब्दमिष्टकर्तृत्वस्याभिहितत्वात्कथं वा वि-भक्तिर्भवतीति चेन्न । लिङ्ग् सामानाधिकरण्ये वा विभक्तिर्भवती-ति न्यायात् । अत एव उक्तार्थानामप्रयोग इति नियमस्तुन प्रवर्तते ।

(२) प्रआमीश्यादि क्रिया गम्यते अत एव क्रियाविशेष-णमेतत् ।

(३) धात्वर्थव्यापाराश्रयत्वं कर्तृत्वम् ।

(४) कर्मत्वञ्चप्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्र-यत्वेनेच्छा विषयत्वम् ।

प्राप्यं विषय भूतं च, निर्वर्त्यं विक्रियात्मकम् ॥
कर्तुश्च क्रियया व्याप्य, मीप्सितानीप्सितेतरत् ॥ १ ॥

प्राप्यं=ग्रामं गच्छति । विषयं=जैनेन्द्रमधीते । निवर्त्यं=कटं करोति । ईप्सितम्=गुडं भक्षयति । अनीप्सितं=ग्रामं गच्छन् व्याघ्रं पश्यति । ग्रामं गच्छन् वृक्षमूलान्युपसर्पयति । ( उक्तेतु कर्मणि वाः स्यात् ) उक्तं च प्रायेण मिक् शतृ हृदादिभिः । जिनः सेव्यते । कृतः कटः । इत्यादि । अकथितञ्च । १ । २ । १२० । अपादानादि विशेषैरसंकीर्तितं च कारकं कर्मसंज्ञं भवति ।

दुह् याच् पच् दण्ड् रुधि प्रच्छि चि ब्रू शासु जि मथ् मुषाम् ।
कर्मयुक् स्यादकथितं तथा स्यान्नी हृ कृष् वहाम् ॥ १ ॥

गां दोग्धि पयः । माणवकं याचते । गामवरुणद्धि व्रजम् । आचार्यं धर्मं पृच्छति । देवदत्तं गांभिक्षते । वृक्ष मवचिनोति फलानि । माणवकं धर्मं ब्रूते । शास्ति वा । ग्राममजां नयति हरति कर्षति वहति वा । जिनदत्तं शतं जयति । इति इप् । स्वतन्त्रः कर्ता । १ । २ । २४ । क्रियायां स्वातन्त्र्येण विवक्षितोर्थः कर्तृसंज्ञो भवति । साधकतमं (१)करणः । १ । २ । १२३। क्रियासिद्धौ साधकतमं कारकं करणसंज्ञं भवति । कर्तृकरणेभा १ । ४ । २९ । अनुक्ते कर्तरि करणे च कारके भा भवति ।

---

(१) क्रियासिद्धौ प्रकृष्टोपकारकत्वं करणत्वं ।

जिनदत्तेन स्तुतम् । दात्रेण लुनाति । इति भा । (१)सम्प्रदानेऽप् । १ । ४ । २३ । उपाध्यायाय गां ददाति । नमः स्वस्तिस्वाहास्वधालंवषड्योगे । १ । ४ । २६ । एभिर्योगेऽप् भवति । नमोऽर्हते । स्वस्ति प्रजाभ्यः । स्वाहा इन्द्राय । स्वधा पितृभ्यः अलमिति पर्याप्त्यर्थग्रहणम् । मल्लः मल्लायालं प्रभुः समर्थो वा । इति अप् । ध्रुवमपायेऽपा-(२)दानम् । १ । २ । १०९ । बुद्ध्या कृतः प्राप्तिपूर्वको विश्लेषो ध्यपायस्तत्र साध्ये यद् ध्रुवं कारकं तदपादानसंज्ञं भवति । काऽपादाने । १ । ४ । ३७ । ग्रामात् आग-

---

(१) स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनं सम्प्रदानं ।

(२) आपादानत्वञ्च विश्लेषस्य साधनीभूतोपकारकत्वं । आपादानं द्विविधं, चलाचलभेदात् । यथा धावतोऽश्वात्पतितः । ग्रामादागच्छति चैत्रः ननु धावतोऽश्वात्पतित इति अश्वोदेशसंयोगानुकूलव्यापारस्य कारणीभूतोपकारकं अश्वं पर्येति कृत्वा तस्यापादानत्वं सिद्धं ननु ग्रामादागच्छतीत्यादौ अपादानत्वं यथा सिध्यति तथा धावतोऽश्वात्पतित इत्यादौ न ध्रुवत्वाभावादपादानत्वं कथमिति चेन्न—ध्रुवत्वञ्च प्रकृतधात्वर्थव्यापारानाश्रयत्वे सति तज्जन्य विभागाश्रयत्वरूपध्रुवत्वस्वीकारात् । अत एव धावतोऽश्वात्पतित इत्यादावपादानत्वंसिद्धम् ।

च्छति चैत्रः। धावतोऽश्वात्पतितः। इति का। (१)ताशेषे ।१।४।८७। कर्मादिकारकाणामविवक्षा स्वस्वामि सम्बन्धादिः शेषस्तत्र ता भवति। नटस्य शृणोति। स्वस्वामिसम्बन्धसमीपसमूहविकारावयवस्थानादयस्तार्थाः। राज्ञः पुरुषः। मद्राणां राजा। ग्रामस्यसमीपम्। यवानांराशयः। वारीणां वीचयः। देवदत्तस्य हस्तः। गवां स्थानम्। इत्यादि स्मर्थदयेशां कर्मणि ।१।४।५९। स्मृत्यर्थानां धूनांदय ईशश्च कर्मणि शेषत्वेन विवक्षिते ता भवति। मातुः स्मरति। पितुरध्येति। सर्पिषो दयते। पयस ईष्टे॥ प्रतियत्नेकृञः ।१।४।६०। प्रतियत्नो गुणाधानम्। करोतेः कर्मणि शेषे ता भवति प्रतियत्ने गम्ये। एधोदकस्योपस्कुरुते। प्रतियत्न इति किम्? कटं करोति। इति ता। आ (२) धारोऽधिकरणः ।१।२। ११५। क्रियाश्रययोः कर्तृकर्मणोराधारोऽधिकरणसंज्ञो भवति॥ ईब्धिकरणे च ।१।४।४४। अधिकरणे ईब्भवति दूरान्तिकार्थेभ्यश्च॥

उपश्लेषो वैषयिकः सामीप्यो व्यापकस्तथा।
चतुर्विधोऽयमाधारो विभक्तिस्तत्र सप्तमी॥ १॥

कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्ना-

---

(१) उक्तादन्य एव शेषः, अर्थात् प्रागुक्तादनभिहिताधिकार पठितकर्मादि तत् तत्कारकविशेषान्मृदर्थाच्च व्यतिरिक्तो यः स्वस्वाम्यादिः स शेषस्तत्र ता भवतीति फलितार्थः।

(२) आधारत्वञ्च आधेयाश्रयत्वं।

रमास्ति । यनस्य दूरेऽन्तिके वा । इति इप् इति विभक्त्यर्थः ।

सः (१ः) पञ्चधा ॥ विशेषसंज्ञाविनिर्मुक्तः केवलसः प्रथमः ॥ १ ॥ प्रायेण पूर्वपदार्थप्रधानो ह्योद्वितीयः ॥ २ ॥ प्रायेणोत्तरपदार्थप्रधानः ष.तृतीयः ॥ ३ ॥ षभेदो थः । यभेदो रः ॥ प्रायेणान्यपदार्थप्रधानो बश्चतुर्थः ॥ ४ ॥ प्रायेणोभयपदार्थ प्रधानो द्वन्द्वः पञ्चमः ॥ ५ ॥ स(२)मर्थः पदविधिः ।१।३।१ सर्वः पदसम्बन्धी विधिः समर्थपदाश्रितो वेदितव्यः ॥ सह् । १ । ३ । २ । आपादपरिसमाप्तेरधिकारोऽयं । सुप्सु(३)पा १ । ३ । ३ । सुबन्तं सुबन्तेन सह समस्यते । सस्वात् सूत्संज्ञात्वेन सुप इप् । कद्भृत्ससनाद्यन्तधुरूपाः चतस्रो वृत्तयः । वृत्त्यर्थावबोधकं वाक्यंविग्रहः । स च लौकिकोऽलौकिकश्चे-

(१) समासस्य स इति लघु संज्ञा क्रियते । समसनं समासः । अनेक पदानामेकीभवनमिति यावत् ।

(२) विधीयत इति विधिः सयासादिः । पदसम्बन्धी योविधिः ससमर्थाश्रितो बोध्य इति सूत्रफलितार्थः । विग्रहे वाक्यार्थाभिधाने यः शक्तः ससमर्थः यद्वा समर्थपदाश्रयत्वात्समर्थ इत्युच्यते । पदानां च सामर्थ्यं द्विविधम् । एकार्थीभावोव्यपेक्षाच । एकार्थीभावो विशिष्टैकार्थाभिधानम् । परस्पराकांक्षाव्यपेक्षा । समासादिवृत्तिष्वेकार्थी भावः वाक्ये व्यपेक्षा ।

(३) सहेतिविभज्यते, तेन अनव्ययकलदितिमिङन्तेनापिक्वचित्सविधिः सिद्ध्यति ।

ति द्विधा। तत्र पूर्वं भूत इति लौकिकः। पूर्व अम् भूत सु इत्यलौकिकः। भूतपूर्वः। भूतपूर्वेचरडितिनिर्देशात्पूर्वनिपातः। (इवेन सो विभक्त्यलश्च। वागर्थौ इव वागार्थाविव॥ इति केवलसः॥ १॥

## अथहसः।

हः। १। ३। ४। अधिकारोऽयं षमित्यतः प्राक्। ङि विभक्त्यभ्याससर्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रभवपश्चाद्यथानुपूर्व्ययौगपद्यसम्पत्साकल्यान्तोक्तौ। १। ३। ५। एष्वर्थेषु वर्तमानं यद्धिसंज्ञं तत्समर्थेन सुबन्तेन सह समस्यते स च हसंज्ञको भवति। विभक्तौ। स्त्री सुप् अधि इत्यलौकिको वाक्य विग्रहः। वोक्तं न्यक्। १। ३। १३। समविधायिकेषु सूत्रेषु वानिर्दिष्टं न्यक्संज्ञं भवति। पूर्वम्। १। ३। १७। समवृत्तौ न्यक्संज्ञं पूर्वं प्रयोक्तव्यं। इत्यधेः पूर्वप्रयोगः। हृश्च। १। ४। १०७। हसो नप् भवति। प्रो। न पोतिप्रादेशः। सत्वात्मृत्संज्ञा। सुपाधु मृदेः १।४।१४२। धुमृदो ह्यव्ययस्य सुप उब्भवति। इति सुप उप्। ततो मृत्त्वात्स्वाद्यः। ह्रादित्युप्। अधिस्त्रि। नातोऽम् त्वपञ्चम्याः। १। ४। १५२। हाद(१)कारांतास् सुपो नो-

(१) अकारान्तात् किम्। उपगिरि।

व्भवति अम् तु भवति क्रां विहाय । उपकुम्भम् । ई(१)व्भ-योर्विभाषा । १ । ४ । १५३ । अम् । उग्तुम्भमुपकुम्भेन वा । उपकुम्भमुपकुम्भे वामद्रापासमृद्धिः सुमद्रम् । यवनानां-घृद्धि दुर्यवनम् । मक्षिकाणामभावो निर्मक्षिकम् । हिमस्यात्य-योऽतिहिमम् । निद्रा संप्रति नयुज्यते इत्यतिनिद्रम् । हरि श-ब्दस्य प्रकाश इतिहरि । विष्णोः पश्चादनुविष्णु । रूपस्य योग्यम-नुरूपं । अर्थमर्थंप्रति प्रत्यर्थं । शक्तिमनतिक्रम्य यथाशक्ति । हृऽकाले । ४ । ३ । १८९ । हसे सहस्य सादेशो भवति अकालवाचिनि धौ । सदृशंशीलस्य सशीलम् । ज्येष्ठस्यानु-क्रमेणेति अनुज्येष्ठम् । चक्रेण युगपदिति सचक्रम् । सदृशः सख्या ससखि । क्षत्राणां सं पत्तिः सक्षत्रम् । वृत्तस्य सम्पत् सवृत्तं साधूनां । तृणमप्यपरित्यज्य सतृणमत्ति । अग्रिग्रन्थपर्य-न्तमधीते साग्नि । नदी(२)भिश्च । १ । ३ । १७ । संख्या नदीवाचिभिः सह सम स्यते ( चकारात्समाहारेऽयमिष्यते ) सप्तसिन्धु । द्वियमुनम् । सान्तः । ४ । २ । ६८ । अधि-कारोऽयमापादपरिसमाप्तेः । हे शरदादेः । ४ । २ ।

---

(१) सुमद्रमुन्मत्तगङ्गमि—त्यादौ नित्यमम् भावो भवति । नतुविकल्पेन कुतः समृद्धिनदीसंख्यावयवेभ्यः परस्य ईपोनि-त्यमम् भाव इति नियमात् ।

(२) नदीपदंन न दीसंज्ञकपरं न शब्दस्वरूपपरं च । बहुव-चननिर्देशात् । किन्त्वर्थपरम् ।

२०९ । शरदाद्यन्ताद्धसाट्टः सान्तो भवति । शरदः समीप-मुपशरदम् । प्रतिशरदम् । (जराया जरस्) उपजरसम् । अनः । ४ । २ । ११० । अन्नन्ताद्धसाट्टो भवति । नोऽपुंसो हलि । ४ । ४ । १२८ । न(१)कारान्तस्य भस्य टिखं भवति हलि परे न तु पुंसः । अध्यात्मम् । नपो वा । ४ । २ । १११ । अन्नन्तं यन्नप् तदन्ताद्धसाद्वा टो भवति । उपच-र्मम् । उपचर्म । गिरिनदीपौर्णमास्याग्रहायण्यांझयः । ४ । २ । ११२ । गिर्यादिभ्यो झयन्ताच्च वा टो भवति हसे । उपगिरम् । उपगिरि । उपदृषदम् । उपदृषत् । इत्यादि ।

## अथ षप्रकरणम् ।

षम् । १ । ३ । १९ । अधिकारोऽयं प्राग्वसात् । इप् तच्छ्रितातीतपतितगतात्यस्तैः । १ । ३ । २१ । इबन्तं प्राप्तापन्नाभ्यां श्रितादिप्रकृतिभिश्च सह समस्यते स च षसो भवति । धर्मश्रितो धर्मश्रित इत्यादि । भा गुणोक्त्या-र्थेनोनैः । १ । ३ । २७ । भान्तं सुबन्तं गुणोक्त्या अ-र्थशब्देनोनवाचिभिश्च सह समस्यते स च षसो भवति । शङ्कु-लया खण्डः शङ्कुलाखण्डः । धान्येनार्थो धान्यार्थः । भान्त-मितिकिम् । अक्ष्णा काणः । भाभृत् कृता बहुलम् । १ । ३ । २९ । भान्तं कारकं बहुलं कृदन्तेन सह समस्यते षसो

(१) नः किम् । सान्ततः । हलि किम् । शर्मणा ।

(२) गम्यादेरपि तेनग्रामगमीतिसिद्धम् ।

भवति। मुनिना ज्ञातः मुनिज्ञातः। नखैर्भिन्नो नखभिन्नः। **अप्रत्यर्थैर्बलिहितसुखरक्षितैः ।१।३।३१।** अबन्तं सुबन्तमपस्तार्थेनार्थादिभिश्च सुबन्तैः सह षसो भवति। कुण्डलायहिरण्यम् कुण्डलहिरण्यम्। तदर्थेन प्रकृति विकृति भाव एव गृह्यते। तेनेह न–रन्धनायस्थाली। अर्थ शब्देननित्यं सोविशेषलिङ्गता च। द्विजार्था यवागूः। द्विजार्थः सूपः। द्विजार्थं पयः। देवबलिः। अश्वहितम्। गो सुखम्। गो रक्षितम्। **का भीभिः ।१।३।३२।** कान्तस्य सुबन्तस्य भ्यादिभिः सुबन्तैः सह षसो भवति। वृकेभ्यो भीः वृकभीः। वृकभयम्। वृकभीतः। **स्तोकान्तिकदूरार्थकृच्छ्रंक्तेन। १।३।३४।** ( कायाः स्तोकादेरित्यनुवृ वक्ष्यते। स्तोकान्मुक्तः। अन्तिकादागतः। अभ्यासादागतः। दूरादागतः। कृच्छ्राल्लब्धः। **ता ।१।३।७०।** तान्तस्य सुबन्तेन सह षसो भवति। स्वर्ग सुखम्। मोक्षमार्गः। **पूर्वापर प्रथमचरमजघन्यसमानमध्यमध्यमवीराः।१।३।६३।** एतेषां सुपा सह षसो भवत्येका(१)श्रये। पूर्वं कायस्य पूर्वकायः। एकाश्रये किं। पूर्वंछात्राणाम्। **अर्द्धंनप् ।१।३।६८।** अर्द्धं न पुंसकं समस्यते अंशिना सह। अर्द्धं पिप्पल्याः अर्द्धपिप्पली। **ईप् शौ(२)प्रेः ।१।३।३५।** ईबन्तस्य शौ-

(१) आश्रयशब्दोद्रव्यवाची।

(२) बहुवचन निर्देशाद्गणग्रहणम्।

चडादिभिः सह षसो भवति । अक्षेषु शौण्डोऽक्षशौण्डः । दिक्संख्यं खौ । १ । ३ । ४८ । खुविषये षत्र नियमार्थं सूत्रं । दक्षिणपञ्चालाः । सप्तर्षयः । खाविति किम्–दक्षिणा ग्रामाः पञ्चग्रामाः । हृदर्थेषु समाहारे । १।३।४६ । हृदर्थविषये थौ परतः समाहारे चाभिधेये दिक्संख्ययोः प्राग्वत् । पूर्वस्यां शालायाम्भवः इति से जाते ( सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ) । दिगादेर ञ्यौ । ३ । २ । ८६ । अखौचतमनाम्नु दिगादेर्णो भवति । हृत्य चामादेः ।५ । २।८५ । ञिति णिति च हृति अचामादे रैप्स्यात् । परित्यक्षम् । पौर्वशालः । गोरहृ(१)दुपि । ४ । २ । १०४ । गो शब्दाट्टो भवति षसे नतु हृदुपि । पञ्चगावोधनंयस्येतिविग्रहे पञ्च गवधनः । संख्यादीरश्च । १ । ३ । ४७ । हृदर्थेत्यत्रोक्तः संख्यादिर्यः स रसंज्ञो भवति चात्संज्ञश्च । ( समाहारस्यैकत्वं नप् संज्ञात्त ) । पञ्चानां गवां समाहारः पञ्चगवम् । नावो रात् । ४ । २ । १०२ । नौ शब्दान्ताद्राट्टो भवति । पञ्चनाव प्रियः । द्वयोर्नावोः समाहारो द्विनावम् । विशेषणं विशेष्येणेति । १ । ३ । ५५ । व्यावर्तकस्य व्यावृत्येन सहषसो भवत्येकाश्रये । नीलं च तदुत्पलं च नीलोत्पलं । इति शब्दः किम्—नेह रामो जामदग्न्यः । संज्ञात्यादिह नित्यः सः । कृष्ण सर्पः ।

( १ ) अहृदुपिकिम्पञ्चभि र्गोभिः क्रीतः पञ्चगुः ।

सामान्येनोपमानम् । १ । ३ । ५० । (१)उपमानवाचिनः साधारण धर्मेण सह वसो भवति । घन इवश्यामो । मघश्यामः । मयूरव्यंसकादयश्च । १ । ३ । ६६ । एते निपात्यंते । मयूरोव्यंसकः । मयूरव्यंसकः । ( ततोऽविहित लक्षणःसविधिरिह द्रष्टव्यः ) । शाक प्रियः पार्थिवः शाकपार्थिवः । इह मध्यम पदस्य खं । एवं देव पूजको ब्राह्मणो देवब्राह्मणः । चकारान्नेह वृत्त्यन्तरम् । नञ् । १ । ३ । ६८ । नञ् सुपा सह समस्यते । नञोऽन् । ४ । ३ । १८१ । नञः अनित्यमादेशो भवति धौ । स्थानिवद्भावेन पदत्वाभ्रत्वम् । न हिंसा अहिंसा । अचि । ४ । ३ । १८२ । अजादौ च धौ नञोऽन भवति । पूनर्वचनं न खनिवृत्त्यर्थं । न आदिः अनादिः । तिकुप्रा(२)दयः । १ । ३ । ८१ । एते समर्थेन सह नित्यं समस्यन्ते । कुत्सितः पुरुषः कुपुरुषः । च्विडाजूर्यादिः । १ । २ । १३१ । च्व्यन्ता डाजन्ता ऊरी प्रभृतयश्च क्रियायोगे तिसंज्ञा भवन्ति । ऊरीकृत्य । शुक्लीकृत्य । पट-पटाकृत्य । एकविभक्ति । १ । ३ । ९४ । से थश्चियतविभक्तिकं तन्न्यग्संज्ञं भवति । परम् । १ । ३ । ९५ । "एक विभक्ति" इत्यनेन विहितन्यक्संज्ञं परं प्रयोक्तव्यं । प्रादयो गताद्यर्थेवया

( १ ) उपमाने किम् । देवदत्ता श्यामा । सामान्येनेति किम् । गिरिरिव मेघः ।

( २ ) प्रादिग्रहणमगित्यर्थं । कुः पापर्थे वर्तते । कुत्सितः पुरुषः । कुपुरुषः । ति । ऊरी कृत्य ।

(ग) प्रगतः आचार्यः । प्राचार्यः । स्त्री गोर्नीचः । १ । १ । ८ । (१ न्यग्भूतोयोगोशब्दः स्त्रीत्वं च तदन्तस्य । मुद्रः प्रोभवति । अत्याद्यः क्रान्ताद्यर्थे इपा । अतिमाल । अवाद्यः कुष्टाद्यर्थे भया । अवकुष्टः कोकिलया अवकोकिलः । पर्याद् योग्लानाद्यर्थेऽपा । परिग्लानोऽध्ययनायपर्यध्ययनः निराद्यः क्रान्ताद्यर्थे कया (गः) निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । ईपाऽत्रवाक् । २ । १ । ७९ । अत्र योराधिकारे कर्मण्यणित्यादि ईपा निर्दिष्टं वाक् संज्ञं भवति । वागमिङ् । १ । ३ । ८२ । वाक्संज्ञस्य समर्थेन नित्यं षसो भवति अमिङ(२)न्तेनार्थ सः । कुम्भं करोतीति कुम्भकारः । अमिङ् किम् । माभवान् भूत् । तिवाक् कारकाणां प्राक् सुबुत्पत्तेः कृद्भिः सह सविधिः । व्याघ्री । अश्वक्रीति । कच्छपीत्यादि । षऽङ्गुलेर्झि संख्यादेः । ४ । २ । ८८ । झि संख्यादेरङ्गुल शब्दादः सान्तो भवति षे । द्वे अङ्गुली प्रमाणमस्य=द्व्यङ्गुलम् । निर्गतमंगुलिभ्यो निरंगुलम् । अ(३)हः सर्वैकदेश संख्यातपुण्याच्च रात्रेः । ४ । २ । ८९ । पभ्यो रात्रेरस्यो भवति झि संख्यादेश्च ।

---

(१) न्यग्भूतत्वं च पदान्तरनिष्ठ विशेष्यतानिरूपित प्रकारता श्रयत्वम् ।

(२) अमिङन्तेन किम् । पथानाहारको व्रजति ।

(३) अहर्ग्रहणं द्वन्द्वार्थं । षसोसम्भवात् ।

पूर्वराग्रेः पूर्वरात्रः । रात्राह्नाहाः पुंसि । १ । ४ । १०४ । कृत सांतौ एतौ पुंसि भवतः । अहश्चरात्रिश्चाहोरात्रः । सर्वरात्रः । संख्यातरात्रः । पुण्यरात्रः । संख्यापूर्वं रात्रं नपु । द्विरात्रम् । त्रिरात्रम् । राजा(१)हः सखिभ्यष्टः । ४ । २ । ९३ । एतदन्तात् षष्ठो भवति । परम राजः । आन्महतः(२)समानाधिकरणजातीययोः । ४ । ३ । २०३ । महतो आतीये एकार्थे च द्यौ परतः आनादेशोभवति । महामुनिः । महाजातीयः । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योःप्राक्शतात्त्रेस्त्रयः । ४ । ३ । १५९ । द्वि अष्टन् इत्येतयोरात् भवति स्थिसंज्ञे द्यौ परतः शतात् प्राक्स्यादिषसमशिति वर्जयित्वा च । द्वादश । अष्टाविंशतिः । द्वन्द्वे पुंवाल्लिङ्गम् । १ । ४ । १०२ । द्वन्द्वे सेपुंवल्लिङ्गं भवति । कुक्कुटमयूर्यौ इमे । मयूरकुक्कुटाविमौ । षंऽप्राप्तालंप्रासापन्नादौ । १ । ४ । १२० । प्राप्तलंगासापन्नपूर्ववर्जिते षसे पुंवल्लिंगं भवति । पूर्वं शालेयं । अर्द्धपि लीयं । अप्राप्तलंप्रासापन्नादाविति किम् ? निष्कौशांबिः । अलंकुमारिः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । पुंसि चार्द्धर्चाः । १४ । १०८ । अर्द्धर्चादयः शब्दाः पुंसिनपि च वेदितव्याः । अर्द्धर्चः । अर्द्धर्चम् । सामान्येनप् । मृदुपचति । इति षसाधिकारः ।

---

( १ ) राजेतिपुंसोग्रहणान्नेह । मद्राणां राज्ञीमद्रराज्ञी ।

( २ ) अनयोः किम् । महतः पुत्रः । महत्पुत्रः ।

# अथ बसप्रकरणम् ।

(१)अन्यपदार्थेऽनेकं बस् । १ । ३ । ८६ । अन्यस्य पदस्यार्थे वर्तमानमनेकं सुबन्तं समस्यते स च बसो भवति । ङ्यन्विशेष(२)णं बे । १ । ३ । १०१ । ईबन्तं विशेषणं च बसे प्राक् प्रयोक्तव्यम् । ईपोऽद्रूलः । ४ । ३ । १६७ । अदन्तात् (३)हलन्ताच्च परस्या ईपोऽनुप् भवति । कण्ठेकालः । प्राप्तमुदकं यं स प्राप्तोदकोग्रामः । ऊढ-रथोऽनड्वान् । उपहृतपशूरुद्रः । उद्धृतौदना स्थाली । पीता-म्बरो हरिः । वीरपुरुषको ग्रामः । सङ्गतार्थे 'समर्थ' इतिनिर्दे-शादेवंजातीयस्य सुर्व वा द्रष्टव्यं । तेनप्रपतितपर्णः, प्रपर्णः अविद्यमानपुत्रः अपुत्रः । स्त्र्युक्तपुंस्कादनूङ्काऽर्थेऽड्डप्रि-यादौ स्त्रियां पुंवत् । ४ । ३ । १४६ । उक्तपुंस्कात्परो यः स्त्र्याख्यः अनूङन्तः शब्दः पुंशब्देन तुल्यो भवतिडडन्तप्रिया-दिवर्जिते स्त्रियांवर्तमाने एकार्थे द्यौ परतः । 'स्त्रीगोर्नीच' इति प्रः । चित्रगुः । दर्शनीयभार्यः । अनूङिति किम् । वामोरूभार्यः । दृढ स्त्रीप्रमाण्योरः । ४ । २ । ११६ । डडन्ता ये

(१) अयंबसोवाविभक्त्यर्थेचनायमिष्यते । अतएव वृष्टे-मेगत इत्यादौबसोनभवति ।

(२) कण्ठेकालः । चित्रगुरेतवृद्वयंसुप्तोदाहरणम् ।

(३) हलदन्तात्किम् । नद्यांकुक्कुटिका नदीकुक्कुटिका । भूम्यां पाशः भूमिपाश इत्यादावतिव्याप्तिः ।

त्प्रमाणीशब्दान्ताच्च अस्त्यो भवति । ( कल्याणीदशमी यासां रात्रीणाम् ) ताः कल्याणीदशमारात्रयः । स्त्री प्रमाणी येषां ते स्त्रीप्रमाणाः । (१)स्वाङ्गाद्दूऽक्षिसक्थः । ४ । २ । ११३ । स्वाङ्गवाचिनौ यौ अक्षिसक्थिशब्दौ तदन्ताद्बाहो भवति । कल्याणे अक्षिणी यस्य सः कल्याणाक्षः । जलजाक्षी । स्वाङ्गात् किम् । दीर्घसक्थि शकटम् । स्थूलाक्षा वेणुयष्टिः । द्वित्रिभ्यां मूर्ध्नः । ४ । २ । ११५ । द्वित्रिपूर्वपदान्तान्मूर्धान्ताद्बाहो भवति । द्विमूर्धः । त्रिमूर्धः । लोम्नोऽन्तर्बहिभ्याम् । २ । ११७ । आभ्यां परो यो लोमनशब्दस्तदन्ताद्बाहस्त्यो भवति । अन्तर्लोमः । बहिर्लोमः । खं पादस्याहस्त्यादेः । ४ । २ । १३९ । हस्त्यादिवर्जितादुपमानात्परस्य पादस्य सान्तं खं भवति बसे । सिंहस्येव पादावस्य सिंहपात् । अहस्त्यादेस्तु हस्तिपादः । कुसूलपादः । सुसंख्यादेः । ४ । २ । १४० । सुसंख्यादेः परस्य पादस्य खं भवति बसे । सुष्ठुपादावस्य सुपात् । द्विपात् । (२)उदुत्काकुत् । ४ । २ । १४८ । खं स्यात् । उत्काकुत् । विकाकुत् । (३)पूर्णाद्वा । ४ । २ । १४९ । पूर्णकाकुत् । पूर्ण-

---

(१) अक्षिसक्थः किम् । दीर्घजानुः । स्वाङ्गात्किम् । दीर्घसक्थि शकटम् ।

(२) काकुदं तालु इत्यर्थः ।

(३) पूर्णं काकुदमस्येति विग्रहः ।

काकुदः। सुहृद्दुर्हृदौ(१)मित्रामित्रयोः। ४। २। १५०। सुदुर्भ्यां परस्य हृदयस्य हृदादेशो निपात्यते। सुहृन्मित्रम्। दुर्हृदमित्रः। उरः प्रभृ(२)तिभ्यः कप्। ४। २। १५१। उरः प्रभृत्येन्ताद्बसात्सान्तः कप् भवति। (३)व्यूढोरस्कः। 'कुप्वोस्त्ये' इति रेफस्य सत्वम्। प्रियसर्पिष्कः। (४)शेषाद्वा। ४। २। १५४। (अत्र प्रकरणे यस्माद्बषात् सान्तो न विहितः स शेषः। तस्माद्वा कप् भवति। महायशस्कः महायशाः। इति बहुव्रीहिः।

## अथ द्वन्द्वः।

चार्थे द्वन्द्वः। १। ३। ९९। अनेकंसुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः। चत्वारश्चार्थाः—समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। तत्र जिनं गुरुं च भजस्व इति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। भिक्षा-

(१) शोभनं हृदयं यस्येतिविग्रहः। अन्यत्र सुहृदयः दुर्हृदयः।

(२) अर्थनित्यः कप्। एकवचनान्तानामेव द्याहणामात्। द्विवचनान्तानां तु शेषाद्वेति विकल्पपक्ष। द्विपुमान्। द्विपुंस्कः त्रिपुमान्। त्रिपुंस्कः। इत्यादि।

(३) व्यूढं विशाल मुरोयस्येति विग्रहः।

(४) यस्माद्बसात्सान्तो नोक्तस्तस्मात्कप् वास्यादिति फलितार्थः।

भट गां चानय' इत्यन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः। परस्परसापेक्षाणामवयवभेदानुगतः सम्बन्ध इतरेतरयोगः। अनपेक्षितावयवभेदः संहतिप्रधानः समाहारः । (१)अनयोर सामर्थ्यान्न सन्निधिः। (२)इतरेतरयोगे। प्लक्षन्यग्रोधौ छायां कुरुतः। (३ समाहारे नपुं । प्लक्षन्यग्रोधम् । राजदन्तः दौ। १ । ३ । ९६। एषु पूर्वप्रयोगार्हं परं प्रयोक्तव्यं । दन्तानां राजा (४)राजदन्तः ( क्वचिद्व्यत्ययोऽपि ) शब्दार्थौ । अर्थशब्दौ । द्वन्द्वे घु । १ । ३ । ९८ । द्वन्द्वे घ्यन्तं पूर्वं प्रयोक्तव्यं मुनिश्रगुप्तश्चमुनिगुप्तौ । अजाद्यत् । १ । ३ । ९९ । अजाद्यदन्तं द्वन्द्वे पूर्वं प्रयोक्तव्यम् । इन्द्रचन्द्रौ । अल्पाच् तरम् ।

---

( १ ) समुच्चयान्वाचयोरेकानेक धर्मावच्छिन्नावच्छिन्नान्वयरूपसहविवक्षा रूपसामर्थ्या भावात्सविधिर्नस्यादितिभावः।

( २ ) अन्योन्यापेक्षयैक क्रियासम्बन्ध इतरेतरयोगः। अत्रेतरेतरयोगे परस्परापेक्षयोद्भूतावयवभेदसमूहत्वेन यथा यथं द्विवचन बहुवचनेभवतः।

( ३ ) समूहः समाहारः। अत्र समाहारेपरस्परापेक्षातिरोहितावयवभेद समूहत्वेन समूहस्यैव प्रधानत्वेनैकवचनमेव भवति।

( ४ ) राजदन्तास्तु चत्वारोदशनानां पुरः स्थिताः। इति त्रिकाण्डशेषः। हैमेतुराजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित्। इत्युपलभ्यते।

१ । ३ । १०० । घघस्रदिरौ । मातरपितरौ वा । ४ । ३ । १४५ । मातरपितरावित्ति वा निपात्यते । माता च पिता च पितरौमातापितरौ वा । प्राणितूर्यसेनाङ्गानां (१)द्वन्द्व एकवत् । १ । ४ । ७८ । एषां द्वन्द्व एकवत् । पाणिपादम् । मार्दङ्गिकवैणविकम् । रथिकाश्वारोहम् । (२)द्वन्द्वाच्चुदहषोरार्थे । ४ । २ । १०८ । चवर्गान्ता-द्दषहान्ताच्च द्वन्द्वाट्टच् स्यात्समाहारे । वाक् च त्वक्च वाक् त्व-चम् त्वक् स्रजम् । वाग्दृषदम् । छत्रोपानहम् । वाग्विप्रुषम् । समाहारे किम् प्रावृट् शरदौ । इति द्वन्द्वः ।

## अथ सान्तप्रकरणम् ।

ऋक्पूरब्धूः पऽनक्षे । ४ । २ । ७० । ऋगाद्यन्तस्य तस्य अःसान्तो भवति, अक्षसम्बन्धी योधूः तदन्तस्य न भवेत् । अर्धर्चम् । ललाटपुरम् । स्फटिकापं सरः । राजधुरा । मोक्षपथः । अनक्षे किम्? अक्षधूः दृढधूरक्षः । अजीवेऽक्ष्णः । ४ । २ । ७२ । अजीवेऽर्थे योऽक्षशब्दस्त-दन्तादः सान्तो भवति । गवामक्षीव गवाक्षः । गोरथ्यनः ।

---

( १ ) समाहारस्यैकत्वादेवैकत्वे सिद्धे प्राण्यङ्गादीनां समा-हार एव द्वन्द्वः । दधिपयआदीनामितरेतरयोग एव । वृक्षमृगा-दीनामुभयथेति नियमार्थमिदं प्रकरणमिति बोध्यम् ।

( २ ) द्वन्द्वात्किम् । पञ्चवाचः समाहृताः पञ्चवाक् । चुद-हषोरिति किम् । वाक्समित् ।

४ । २।८७। प्रगातोऽश्वानां प्राच्यो रथः । इति सान्तप्रकरणम् ।

## अथ हलन्तप्रकरणम् ।

समर्थानां(१)प्रथमाद्वा । ४ । १ । ८२ । किं विहृत्यतः प्रागिदं पदत्रयमधिक्रियते । अश्वपत्यादेः । ४ । १ । ८४ । एभ्यो अण् स्यात् प्राग्दीव्यतीयेषु । अश्वपतेरपत्यादि-आश्वपतम् । गाणपतम् । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । ४ । १ । ८५ । दित्यादिभ्यः पतिपदोत्तरपदाच्च ण्यो भवति प्राग्दीव्यतीयेषु । अणोऽपवादोऽयम् । दितेरपत्यं दैत्यः । अदितेरादित्यस्य वा । हलो यमां (२)यमि लोपः । ८ । ४ । ६४ । हलः परेषां यमां यमि परे लोपो भवति । आदित्यः । (देवाद्यञञौ) दैव्यम् । दैवम् । (बहिषष्टिलोपो यञ्च) बाह्यः । (ईकक् च) । इत्यचा मादेरित्यर्थ । बाहीकः । (गोरजादिप्रसङ्गे यत्) गोरपत्यादि गव्यम् । उत्सादिभ्योऽञ् । ४ । १ । ८६ । औत्सः । इत्यपत्य विकारान्तार्थक प्रकरणम् । अथापत्याधिकारः । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात् । ४ । १ । ८७ । धान्यानां भवने क्षेत्रे खञ् इत्यतः प्रागर्थेषु स्त्री पुंशब्दाभ्यामञ् भवतिलुक् च । स्त्रैणः । पौंस्नः । तस्यापत्यम् । ४ । १ । ९२ । तस्येति समर्थादपत्य-

(१) समर्थात्किम् । कस्य उपगोरपत्यं चैत्रस्य । प्रथमात्किम् । देवदत्तोऽपत्यमस्येतिविग्रहे देवदत्तशब्दान्माभूत् । वाग्रहणाद्वाक्यमपि । उपगोरपत्यमिति ।

(२) हलः किम् । अप्यम् । यमां किम् । अर्घ्यम् । यमि किम् । शार्ङ्गम् ।

मित्यर्थे यथा विहितं त्यो वा भवति। कद्र्वाः स्वयंभुवः। ४।४।१३२। कद्रुशब्दस्य स्वयंभूशब्दवर्जितस्यो यणा-न्तस्य च ओर्भवतिद्रुति (१)परे। उपगोरपत्यमौपगवः। आश्वपतः। दैत्यः। औत्सः। स्त्रैणः। पौत्रादिवृद्धम्। ३।१।७८। प्रथमस्य पौत्रादि यदपत्यं तद्वृद्धसंज्ञं भवति। एकः। ३।१।७९। वृद्धेऽपत्ये विवक्षिते एक एव त्यो भवति। उपगोरपत्यमौपगवः। गर्गादेर्यञ्। ३।१।९४। गर्गा-दिभ्यो वृद्धेऽपत्ये यञ् भवति। गर्गस्य वृद्धापत्यंगार्ग्यः। यञञोऽगोपवनादेः। १।४।१५८। यञोऽञश्चगोत्रे-बहुषूप् भवति गोपवनादिभ्योविहितंविहाय। गर्गाः। जीवतितुर्वंश्ये युवाऽस्त्री। ३।१।८१। वंश्ये पित्रादौ जीवति पौत्रादि यदपत्यं चतुर्थादिकं युवसंज्ञं भवति स्त्री यास्तु न युवसंज्ञा। ततो यूनि। ३।१।८०। वृद्धे-र्याद्यञिञो तदन्तात् फण् भवति। आयनेयीनीयियः फ-ढखछघांत्यादीनाम्। ५।१।२। फादीनां निरत्नां युनिमि-त्तानामायनादयो भवंति। गर्गस्य युवापत्यं गार्ग्यायणः।दाक्षायणः। अत इञ्। ३।१।८५। अकारान्तान्मृद्बाह्वादिभ्य-श्चापत्ये इञ् भवत्यगोपरादः। आकम्पनिः। बाहविः। आकृतिगणोऽयम्। वि(२)दादिभ्योऽनृष्यानन्तर्येऽञ्।

---

(१) इतिकिम्। पद्वी।

(२) गुरूणामपत्यमितिविग्रहेपारशव इतिस्यात्। कुतः परस्त्रीशब्दस्यपरशवादेशनिपातनात्।

४ । १ । ९३ । पत्र्योषृष्ट्येऽन्नुषीणामान्तर्ये चअभ्रभवति गोत्रे । विदस्य गौत्रापत्यंवैदः । पुत्रस्यापत्यं पौत्रः । एवं दौहित्रादयः । शि(१)वादिभ्योऽण् । ४ । १ । ११२ । अपत्ये । शैवः । गाङ्गः । कुर्वृष्ण्यन्धककुरुभ्यो । ४ । १ । ११४ । कुर्वृष्ण्यन्धकवृष्णिवाचिभ्योमृड्भ्योऽपत्येऽण् भवति । कुरुभ्यः । नाकुलः । साहदेवः ऋषिभ्यः । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः श्वाफल्कः । वृष्णिभ्यः—वासुदेवः । मातु(२)रुत्संख्यासंभद्रपूर्वायाः । ४ । १ । ११५ । संख्यासंभद्रपूर्वस्यमातृशब्दस्योकारान्तादेशो भवत्यण् च । द्वैमातुरः सांमातुरः । षाण्मातुरः । भाद्रमातुरः । स्त्रीभ्योढक् । स्त्रीत्यान्तेभ्योढक् । वैनतेयः । कन्यायाः कनीन च । ४ । १ । ११६ । चादण् । कानीनोव्यासः कर्णश्च । राजश्वशुराद्यत् । ४ । १ । १३७ । ये चाभावकर्मणोः । ६ । ४ । १६८ । अनः खंन भवति यादौ इति, नतुझौ । राजन्यः ( अयमपिजातौ ) अन्यत्रापि । अनः । ६ । ४ । १६७ । अनः खंन भवत्यणि । राजनः । क्षत्राद्घः । ४ । १ । १३८ । क्षत्रियः । जातावित्येव । क्षात्रिरन्यत्र । रेवत्यादिभ्यष्ठक् । ४ । १ । १४६ । ठस्येकः । ७ । ३ । ५० ।

---

(१) इञादीनामपवादः ।

(२) स्त्रीलिङ्गमातृशब्दस्यैव ग्रहणंनतु पुंलिङ्गमातृशब्दस्य व्याख्यानात् । तेन संमिमीते ऽसौसंमातातस्यापत्यंसांमात्रः । इतिसिद्धति ।

रैवतिकः। **राष्ट्रशब्दाद्ब्राह्मणोऽञ्** ।३। १। १५०। क्षत्रियवाचिनो जनपदशब्दादपत्येऽञ् भवति । पञ्चालानां राजा पाञ्चालः। क्षत्रियसमानशब्दात् जनपदात्तस्यराजन्यपत्यवत् । **पाण्ड्वोर्ड्यण्**।३।१।१५५। पाण्ड्यः। **कुर्वादिण्यः** ।३। १।१३९ ।कौरव्यः। नैषध्यः । **द्रिः** ।३।१।१४९। यानि सञ्जपाद परि समासेत्यान्वक्ष्यतितेद्रिसंज्ञाः स्युः। **द्रेर्बहुषुनैवाऽस्त्रियाम्** । १ ।४। १२२। द्रिसंज्ञकस्यत्यस्य बहुर्थे-वर्तमानस्य उप् भवति। तेनैवकृतं बहुत्वं नतुस्त्रियाम्। इक्ष्वाकवः पञ्चालाः। इत्यादि। **उप्चोलादेः** ३।१।१५६। चोलादेः परयोरणिञोरुब् भवति। कम्बोजः। चोलः। केरलः। शकः। यवनः। इत्यपत्याधिकारः। **तेनरक्तं (१)रागात्** । ३।२।१।अण् स्यात्। रज्यतेऽनेनेति रागः। कषायेणरक्तं वस्त्रं काषायम्। **माञ्जुक्तः कालः**। ३।२। ४। तिष्यपुष्ययोरणि यरवेच। पुष्येण युक्तं पौषमहः। **उपसोऽवदे**।३।२।५। पूर्वेणविहितस्योसभवति। चन्द्रेणयुक्तस्यरात्र्यादिविशेषेणाभिधीयेत चेत्। अद्यपुष्यः। **दृष्टं साम**। ३।२।१०। तेनेत्येव। वसिष्ठेनदृष्टंवा-

(१) तेनेतिभासमर्थात्—रागविशेषवाचिनः रक्तमित्येतस्मिन्नर्थे यथाविहितंत्यो भवतीतिफलितार्थः। रागात्किम्। देवदत्तेनरक्तंवस्त्रम्।

सिद्धं साम । (१)वामदेवाड्ड्यः । ३ । २ । १२ । वामदेवेनदृष्टं सामवामदेव्यम् । परिवृतोरथः । ३ । २।८ । अस्मिन्नर्थेऽण् त्योभवति । वस्त्रेण परिवृत्तोवास्त्रोरथः । तत्रोद्धृत(२) ममत्रेभ्यः । ३ । २ । ९ । शरावे उद्धृतः शाराव ओदनः । संस्कृतं भ(३)क्षाः । ३ । २ । ११ । ईप्समर्थात् संस्कृतमित्यर्थेयथाविहितत्योभवति भक्षाश्चेत् । भ्राष्ट्रेषुसंस्कृताभाष्ट्रायवाः । साऽस्यदेवता । ३ । २ । १९ । अर्हन् देवतास्य आर्हतः । भागवतः । पाशुपतः वार्हस्पत्यः । शुक्राद्घः । ३ । २ । २१ । शुक्रियम् । सोमाट्ट्यण् । ३ । २ । २७ । सौम्यम् । वाय्वृतुपित्रुषसोयः । ३ । २ । २८ । वायव्यः । ऋतव्यः । रीङ् ऋतः । ५ । २ । १३६ । ऋकारान्तस्या कृद्यकारे असयकारेच्वौच परतो रीङादेशोभवति । ( परितिसम् ) पित्र्यम् । उषस्यम् । पितृव्यमातु(४)लमातामहपितामहाः । पेते निपात्यन्ते । पितुर्भ्राता-पितृव्यः । मातुर्भ्रातामातुलः । मातुः पितामातामहः । पितुःपिता

(१) अणोऽपवादः ।

(२) अमत्रेभ्यः किम् । पाणा उद्धृतः ।

(३) भक्षाः किम् । पुष्पपुटे संस्कृतोमालागुणः ।

(४) पितृमातृभ्यां भ्रातर्य्यत् डुलच्च । ताभ्यांपितरिमहच् । मातरिषिच्च । तयोरानङ् च निपात्यते पितुर्मातापितामही । मातुर्मातामातामही । इत्यपिबोध्यम् ।

पितामहः। तस्य समूहः । ३ । २ । ३३ । काकानां समूहः काकम् । भिक्षादेः । ३ । २ । ३४ । भिक्षाणां समूहो भैक्षम् । प्रायोऽनपत्येऽणीनः । ४ । ४ । १५३ । अनपत्यार्थेऽणिइन्नं तस्य खंनभवति । गर्भिणीनां समूहो गार्भिणम् । युवतीनां समूहो यौवतम् । ग्रामजनबन्धुसहायेभ्यस्तल् । ३ । २ । ३८ । ( तलन्तं स्त्रियाम् ) ग्रामता । जनता । बन्धुता ( गजाच्चेति वक्तव्यं ) गजता सहायता । तदस्याधीते । ३ । २ । ५४ । छन्दोऽधीते वेत्ति वा छान्दसः । क्रमादेर्वुन् । ३ । २ । ५५ । क्र-(१)मकः । पदकः । शिक्षकः । तदस्मिन्नस्तीति देशः खौ । ३ । २ । ५८ । उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरो देशः । तस्य निवासादूरभवौ । ३ । २ । ६० । शालाकाया निवासः शालाकम् । वाराणस्याः अदूरभवा वाराणसी नगरी । जन-(२)पदे उस् । ३ । २ । ६२ । जनपदे देशविशेषेऽभिधेये चतुरर्थे मुक्तस्यत्यस्योस् भवति । पञ्चालानां निवासो जनपदः पञ्चालाः । कुरवः । अङ्गाः । बङ्गाः । वरणादेः । ३ । २ । ६३ । अजनपदार्थमिदम् । वरणानामदूरभवं वरणा नगरम् । । कुमुदनडवेतसाड्डित् । ३ । २ । ६४ । नद्यां मतुरित्यनेनानुवृत्तमतुर्डिद्भवति । मभोऽञ्झयोमतोर्वोऽयवाद्यः ।

( १ ) क्रममधीते वेत्ति वेति विग्रहः ।

( २ ) उदुम्बरा अस्मिन् सन्त्यस्मिन्नित्यौदुम्बरो जनपदः वैदिशाद्यत्वभिधानलक्षणत्वाद्धसेरुस् न भवति ।

५।३।३१। कुमुद्वान् । नड्वान् । वेतस्वान् । नडशादाड्ड्वलच् । ३।२। ७२। शिखाया वल इत्यतो ऽनुवृत्तवलोऽड्वच्भवति। न ड्वलः। शाड्वलः। शिखायावलच् । ३।२। ६९। शिखावलः(१)। इति चातुरर्थिकाः ॥

शेषे ।३।२।७३। अपत्यादिचतुरर्थान्तायेऽर्थास्तेभ्यो ऽन्यः शेषः। तत्राणादयो यथा सम्भवं स्युः। चतुर्भिरुह्यते चातुरंशकटम्। चक्षुषागृह्यतेचाक्षुर्षरूपम्। श्रावणः शब्दः। दृषदिपिष्टाः दार्षदाः सक्तवः। चतुर्दश्यां दृश्यतेचातुर्दशंरक्षः। राष्ट्रावारपाराद्घखौ । ३ । २ । ७४ । आभ्यांक्रमाद्घखौ भवतः शेषे। राष्ट्रेजातादिः राष्ट्रीयः। अवारपारीणः। (विगृहीताद्विपरीताच्चापीष्यते) अ(२)वारीणः। पारीणः। पा(३)रावारीणः। अत्र प्रकृतिविशेषमुद्दिश्यप्रत्ययविशेषोविधीयते। अर्थविशेषाः समर्थविभक्त्यश्चाग्रेवक्ष्यन्ते। ग्रामाद्यखञौ ३।२ ७५। ग्राम्यः। ग्रामीणः। नद्यादिभ्यो ढक् । ३।२।७७। नादेयम्। माहेयम्। दक्षिणा(४)पश्चात्पुरसस्त्यण् ।३।२।७८। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः। द्युप्रागपागुदक् प्रतीचोयत्।

(१) शिखावलोनामजनपदः।

(२) विगृहीतादपीष्यते–इति नियमात्)

(३) विपरीताच्चेतिनियमात्।

(४) पश्चादितिडित्साहचर्याद्दक्षिणेत्याजन्तस्यैवग्रहणंनतु-टाबन्तस्येत्याख्यानात्।

३।२।८१। दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम् प्रतीच्यम्। शेषेस्तुट् ।३।२।८२। क्षिसंज्ञकाद्योभवति तुडागमश्चशेषे। ( अमेहक्वतसित्रेभ्य इति परिगणनम् )अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः (नेध्रुवइतिवक्तव्यम्) नित्यः। अद्यचा(१)दैप्दुः। १।१।६८। अचुमध्येआदिभूतोऽच्पेप् यस्यसमुदायस्यसदुसंज्ञोभवति। दोश्छः। ३। २।१। दुसंज्ञकान्मृदश्छोभवतिशेषे। मालीयम्। शालीयम्। त्यदादि। १।१।६९। तदीयः। त्वदीयः। वानाम्नः। १।१। ७१। देवदत्तीयः। दैवदत्तः। गर्तेधुगहादिभ्यश्छः। ३।२।११५। गहींयः। युष्मदस्मदोऽकञ्खञ्। ३। २।१२२। आभ्यां वा खञ्भवतिखञ् पक्षेऽकञादेशश्च। युष्मयोर्युष्माकं वायं यौष्माकीणः। पक्षेऽणछौ। अणि। ३।२। १२३। अणिचपरेयुष्मदस्मदोरकञादेशोभवति। यौष्माकः। आस्माकः। युष्मदीयः। अस्मदीयः। तवक(२)ममकावेकार्थे। ३।२।१२४। एकार्थेवर्तमानयोर्युष्मदस्मदोस्तवकममकादेशौभवतोऽणिखञि च। तावकीनः। तावकः। मामकीनः। मामकः। छेतु, त्वदीयः। मदीयः। मध्यान्मः। ३।२।१२९। मध्यमः। काला(३)ट्ठञ्। ३। २। १३२।

---

( १ ) आद्येतिकिम्। सभासन्नयनेभवः साभासन्नयनः।

( २ ) अणिखञिचेति किम्। त्वदीयोमदीयः।

( ३ ) अणोऽपवादः। दोश्छं परत्वाद्बाधते। गौणादपि-

कालवाचिभ्यष्ठञ् स्यात् । मासिकः । सांवत्सरिकः । प्रावृष एण्यः । ३ । २ । १३७ । प्रावृषेण्यः । सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यस्ट्युट्युलौ तुट् च । ३ । २ । १४० । सायमित्यादिभ्योऽव्ययेभ्यश्च कालवाचिभ्यस्तनट् भवति । सायन्तनम् । चिरन्तनम् । ( आद्ययोस्त्वसन्नियोगेमान्तत्वंप्राह्णेप्रगयोस्त्वेदन्तत्वं च निपात्यते ) प्राह्णेतनम् । प्रगेतनम् । तत्र(१)जातः । ३ । ३ । १ । इत्समर्थाज्जात इत्यर्थेयथाविहितंत्योभवति । स्रुघ्नेजातः स्रौघ्नः । उत्सेजात औत्सः । राष्ट्रेजातः राष्ट्रियः । अवारपारेजातः अवारपारीणइत्यादि । प्रावृषष्ठः । ३ । ३ । २ । ठञेण्ययोरपवादोऽयम् । प्रावृषिकः । कोशाड्ढञ् । ३ । ३ । १५ । कौशेयंवस्त्रम् । तत्रभवः । ३ । ३ । २८ । स्रुघ्नेभवःस्रौघ्नः । राष्ट्रियः । दिगादिभ्यो यत् । ३ । ३ । ३० । दन्त्यम् । कण्ठ्यम् । जिह्वामूलाङ्गुलेश्छः । ३ । ३ । ३८ । यस्यापवादः । जिह्वामूलीयम् । अङ्गुलीयम् । वर्गान्तात् । ३ । ३ । ३९ । कवर्गीयोवर्णः । तत आगतः । ३ । ३ । ४८ । स्रुघ्नादागतः स्रौघ्नः । आयस्था(२)नेभ्यष्ठक् । ३ । ३ ।

कालवाचिनष्ठञिष्यते । कादम्बपुष्पिकः । इत्यादि ।

( १ ) शेषइत्यनेनैवसिद्धे असङ्करेणविशिष्टार्थं अपवादाथथास्युरित्येवमर्थं जाताद्यर्थनिर्देशः ।

( २ ) स्वामिग्राह्योभागआयउच्यते । सयस्मिन्नुत्पद्यते तदायस्थानम् । तद्वाचिभ्यष्ठक् स्यात् तत आगत इति विषये । इति फलितार्थः । अणोऽपवादः ।

४९। शुल्कशालाया आगत शौल्कशालिकः। यौनमौख्य(?)दुञ्। ३। ३। ५१। (१)औपाध्यायकः। पैतामहकः। हेतुमनुष्याद्वारूप्यः। ३। ३। ५५। धेनोरागतंधेनुरूप्यम्। पक्षे। गर्हादिलक्षणस्छः। समी(२)यम्। विषमीयम्। देवदत्तरूप्यम्। दैवदत्तम्। मय(३)ट्। ३। ३ ५६। सममयम्। देवदत्तमयम्। प्र(४)भवति। ३। ३। ५७। हिमवतः प्रभवतिहैमवतीगङ्गा। तद्गच्छतिपथिदू(५)तयोः। ३। ३। ५८। स्रुघ्नंगच्छतिस्रौघ्नः पन्थादूतो वा। अभिनिष्का(६)मतिद्वारम्। ३। ३। ६०। स्रुघ्नमभिनिष्कामतिस्रौघ्नंकान्यकुब्जद्वारम्। अधिकृत्यकृतेग्रन्थे। ३। ३। ६१। शारीरकमधिकृत्यकृतोग्रन्थः शारीरकीयः। सोऽस्यनिवासः। ३। ३। ६२। स्रुघ्नोनिवासो ऽस्यस्रौघ्नः। तेनप्रोक्तम्।

(१) उपाध्यायादागत इति विग्रहः। एवं पितामहादागत इति।

(२) समादागतमितिविग्रहः। एवमग्रेऽपि।

(३) हेतुमनुष्यादित्येव।

(४) प्रभवः प्रथमोपलम्भः।

(५) पथिदूतयोः किम्। मथुरांगच्छतिसेना।

(६) आभिमुख्येननिष्क्रमणमभिनिष्क्रमणम्। तत्र प्रसमर्थाद्यथाविहितंत्यो भवतीतिसूत्रार्थः। द्वारं किम्। स्रुघ्नमभिनिष्कामतिपुरुषः। निष्क्रमणक्रियायांकरणंद्वारमिति तस्यैवस्वतन्त्र्य विवक्षायां द्वारं निष्कामतीत्युपपद्यते।

३ । ३ । ७६ । समन्तभद्रेणप्रोक्तं सामन्तभद्रम् । **तस्येदम्** । ३ । ३ । ८८ । उपगोरिदमौपगवः । इति शैषिकाः ॥

## अथ विकाराधिकारः ।

(१)**तस्य विकारः** । ३ । ३ । १०२ । अश्मनो विकारः आश्मनः । भास्मनः । मार्त्तिकः । **प्राण्योषधिवृक्षेभ्योऽवयवे च** । ३ । ३ । १०३ । चाद्विकारे । चेतनावन्तः प्राणिनः । मौर्वं काण्डं भस्म वा । (२)**मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः** । ३ । ३ । १०८ । अभ्यवहार्यवसनवर्जितयोर्विकारावयवयोर्मयड् वा भवति । अश्ममयम् । आश्मनम् । अभक्ष्येतिकिम् मौद्गः सूपः । कार्पासः प्रावारः । **नित्यं वृद्धशरादिभ्यः** । ३ । ३ । १०९ । शरमयम् **गोश्च पुरीषे** । ३ । ३ । ११३ । गोः पुरीषं गोमयम् । **गोपयसोर्यत्** । ३ । ३ । ११८ । गव्यम् । पयस्यम् ।

इति विकारार्था० ॥ ५ ॥

## अथ ठणधिकारः ।

**प्राग्वहतेष्ठक्** । ३ । ३ । १२६ । तद्वहतीति यो

---

( १ ) तस्समर्थाद्धिकार इत्यस्मिन्नर्थे यथा विहितं त्यो भवतीति सूत्रार्थः । इत्यण् । अस्य सूत्रस्या प्राण्याद्युदाहरणम् व्याख्यानात् ।

( २ ) विकारावयवाधिकारे पुनरेतयोर्ग्रहणं अपवादविषयेऽपिमयटः समावेशार्थम् ।

वक्ष्यते। ततः प्राक्ठणधिक्रियते। **तेन** (१)**दीव्यति खनति जयति जितम्।** ।२।३।१२७। अक्षैर्दीव्यति आक्षिकः। **संस्कृतम्।** ३।३।१२८। दध्ना संस्कृतं दाधिकम्। मारीचिकम्। **तरति।** ३।३।१३०। तेनेत्येव। उडुपेन तरति औडुपिकः। **चरति।** ३।३।१३२। चरति गतिभक्षणेष्विष्यते। हस्तिना चरति हास्तिकः। दध्ना चरति दाधिकः। **संसृष्टे।** ३।३।१४७। दध्ना संसृष्टं दाधिकम्। **रक्षत्युञ्छति।** ३।३।१५५। नगरं रक्षति नागरिकः। नीवारानुञ्छतिनैवारिकः। **शब्ददर्दुरं करोति।** ३।३।१५६। शब्दं करोति शाब्दिकः। दर्दुरं करोति दार्दुरिकः कुलालः। **धर्मं चरति।** ३।३।१६२। धार्मिकः। (अधर्माच्चेति वक्तव्यम्) आधर्मिकः। (२)**शिल्पम्।** ३।३।१७४। मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः। **प्रहरणम्।** ३।३।१७६। असिप्रहरणमस्य आसिकः। धानुष्कः। **शीलम्।** ३।३।१७८। मोदकभक्षणं शीलमस्य मौदकिकः। **निकटावसथेवसति।** ३।३।१९०।

---

(१) कुद्दालेनखनतिकौ द्दालिकः। अक्षैर्जयति–आक्षिकः। अक्षैर्जितमाक्षिकम्। इति सूत्रोदाहरणानि। सर्वत्रकरणेभा।

(२) शिल्पं कर्मकौशलम्। वा समर्थाच्छिल्प वाचिनः अस्येत्यर्थे ठण्स्यादिति सूत्रार्थः। ननु मृदङ्गवादन शब्दाट्ठण् स्यादिति चेन्न। अनभिधानात्।

(१) नैकटिको भिक्षुकः । इति ठणधिकारः ॥ ६ ॥

## अथ यदधिकारः ।

**तद्वहतिरथयुगप्रासङ्गम्॥** । ३ । ३ । १०१ । रथं वहतिरथ्यः । युग्यः । प्रासङ्ग्यः । **धुरो यड्ढकौ** । ३ । ३ । १९२ । धर्येयः । धुरं वहति धौरेयः । नभकुर्छुर इति प्रतिषेधान्न दीः । धुर्यः । **नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु** ।३।३।१९७ । नावा तार्यं नाव्यं जलम् । धर्मेणप्राप्यं धर्म्यम् । विषेण वध्यो विष्यः । सीतया समितं सीत्यं क्षेत्रं । **वयस्तुलाभ्यां सम्मिते** । ३ । ३ । १९६ । वयसा सम्मितो वयस्यः । तुलया सम्मितस्तुल्यः । **तत्र (२)साधुः** । ३ । ३ । २०२ । अग्रे साधुः अग्र्यः । सामनिसाधुः सामन्यः । येऽङ्गाविति खंन । कर्मण्यः । शरण्यः । **परिषदो ण्यः** । ३ । ३ । २०५ । परिषदि साधुः पारिषद्यः । इति यदधिकारः ।

## अथ छयाधिकारः ।

**प्राक् ठणश्छः** । ३ । ४ । १ । आहांठ्ठणित्यतः प्राक्छाधिकारः । (३)**उगवादेर्यः** । ३ । ४ । २ । उवर्णान्ताद्गवादिभ्यश्चयोभवति प्राक्ठणोऽर्थेषु । छस्यापवादः । शङ्कवेहितं

---

( १ ) एवम्—आवसथेवसति आवसथिकः ।

( २ ) साधुरिह प्रवीणोयोग्योवा ।

( ३ ) एवं हविष्यमित्यादि ।

शङ्कव्यं दारु। गव्यम् (१)नाभिनभं च नभ्योऽक्षः नभ्यमञ्जनम्। **तस्मै हितम्** । ३।४।४। वत्सेभ्यो हितं वत्सीयो गोधुक्। **प्राण्यङ्गरथखलयवमाषवृषब्रह्मतिलाद्यः** । ३।४।५। दन्तेभ्योहितं दन्त्यम्। कण्ठ्यम्। नस्यम्। रथ्या भूमिः। खल्यम्। यव्यम्। माष्यम्। ब्रह्मण्यम्। (२)**विश्वजनात्मभोगान्तात्खः** । ३।४।७। विश्वजनात्मभ्यां भोगान्ताच्चहितमित्यर्थे खः स्यात्। छापवादः। विश्वजनेभ्यो हितं विश्वजनीनम्। अनः इति स्थितं। आत्मनेहितं आत्मनीनम्। मातृभोगीणः। इति छाधिकारः। अथ ठञधिकारः। **प्राग्वतष्ठञ्** । ३।४।६१। वतः प्राक्येऽर्थाः ते ष्ठञधिकृतो वेदितव्यः। **तेनक्रीतम्** । ३। ४। ३५। अशीत्याक्रीत माशीतिकम्। प्रास्थिकम्। **सर्वभूमिपृथिवीभ्यामण्** । ३।४।४७। **ईश्वरः** । ३।४।४२। सर्वभूमिपृथिवीभ्यामीश्वरइत्यस्मिन्नर्थे अण्स्यात्। अनुशतिकादीनामित्युभयपदस्यैप्। सर्वभूमेरीश्वरः सार्वभौमः। पृथिव्या ईश्वरः पार्थिवः। (३)**पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाश-**

---

( १ ) नाभेर्यः नभादेशश्चेत्यर्थः। नाभयेहित इति विग्रहः।

( २ ) यसादेवेष्यते। तावसयोरेतुच्छएव। विश्वजनीयमित्यादि।

(३) पञ्चप्दानिपरिमाण मस्येतिविग्रहेपञ्चनशब्दस्यटेः खंतिरयश्चनिपात्यते। एवं सर्वत्र।

त्रष्टिमसत्यशीतिनवतिशतम् । ५ । १ । ५८ । एते निपात्यन्ते परिमाणविषये । तदर्हति । ५ । १ । ६० । इप्समर्थादर्हत्यर्थे यथा विहितं त्योभवति । श्वेतच्छत्रमर्हतिश्वैतच्छत्रिकः । दण्डादेः । ५ । १ । ६४ । यः स्यात् । दण्डमर्हति दण्ड्यः । अर्घ्यः । वध्यः । तेननिर्वृत्तः । ५ । १ । ७५ । अह्णानिर्वृत्तः आह्निकः प्रासादः । इतिठञोऽवधिः ।

## अथ भावकर्मार्थाः ।

तेन (१)क्रियातुल्ये । ५ । १ । १०७ । क्षत्रियेण तुल्यं क्षत्रियवद्युध्यते । क्रियातुल्येतिकिम्–गुणतुल्ये माभूत् पुत्रेण तुल्यः स्थूलः । तत्रेव । ५ । १ । १०८ । मथुरायामिव-मथुरावत्स्रुघ्ने प्रासादः । तस्य । ५ । १ । १०९ । देवदत्तस्येव-देवदत्तवद्यज्ञदत्तस्य वनम् । (२)भावेत्वतलौ । ५ । १ । ११० । तासमर्थाद्भावेऽर्थेत्वत् तल्चत्यौ भवतः । गोर्भावो गोत्वं गोता । त्वान्तं नपम् । तलन्तं स्त्रियाम् । आच-

(१) क्रियाकिम् । गुणद्रव्यतुल्येमाभूत् । पुत्रेण तुल्यः स्थूलः । पुत्रेणतुल्योगोमान् ।

(२) भावोनाम प्रकृतिजन्यबोधेमुख्यप्रकारतयाभासमानत्वम् । यथागोजन्योयोऽर्थंगौ रितिबोधेमुख्योगौस्तत्प्रकारतया भासमानोधर्मः गोत्वरूपस्तस्यभाव इति कथ्यते इति समन्वयः यद्वा प्रवृत्तिनिमित्तएव भावः । यथागोशब्द प्रयोगादिप्रवृत्तौ-गोत्वादिरेवनिमित्तोभवतीतिसमन्वयः ।

स्थात् । ३ । ४ । १११ । ब्राह्मणस्य इति वक्ष्यते आप्तस्मा-
यदित ऊर्ध्वमनुक्रमिष्यामस्तत्वलाधिक्रियते । पृथ्वादेर्वे-
मन् । ३ । ४ । ११२ । वा वचनमणादिसमावेशार्थम् । त्वत-
लावपि । टेः । ४ । ४ । १४३ । भस्य टेः खं भवतीष्ठेमेयस्सु ।
इति टिखम् । पृथोर्भावः प्रथिमा । पार्थवम् । प्रथुत्वम् ।
प्रथुता । एवं मृद्वादीनाम् । ऋरोऽनादेर्घे । ४ । ४ । १५ ।
अनादेर्घे ऋकारस्य रेफादेशो भवतीष्ठेमेयस्सुपरतः । इति रादेशः ।
वर्णदृढादेष्ट्यण् । ३ । ४ । ११३ । इमनच । दार्ढ्यम् । द्रढिमा ।
शैत्यं । शीतिमा । गुणाङ्गब्राह्मणादिभ्यः कर्मणि
च । ३ । ४ । ११४ । चाद्भावे । जडस्य भावः कर्म वा जाड्यम् ।
मूढस्य भावः कर्म वा मौढ्यम् । ब्राह्मण्यम् । स्तेयसख्ये ।
३ । ४ । ११६ । निपात्येते । (१)सख्यम् । स्तेयम् । कपि-
ज्ञातेर्ढञ् । ३ । ४ । ११७ । कापेयम् । ज्ञातेयम् । पत्यन्त-
पुरोहितादेर्ण्यः । ३ । ४ । ११८ । सेनापत्यम् । पौरोहित्यम् ।

इति भावकर्मार्थाः ।

## अथ पाञ्चमिकाः ।

(२)धान्यप्ररोहणे खञ् । ३ । ४ । १२७ । प्ररोहन्त्य-
स्मिन् धान्यानीति प्ररोहणं क्षेत्रं । मुद्गानां भवनं क्षेत्रं मौद्गी-

---

(१) सख्युर्भावः कर्म वा—इतिविग्रहः ।

(२) तत्तद्धान्यविशेषवाचिनः क्षेत्रेऽभिधेये खञ् भवतीति
सूत्रार्थः ।

मम । व्रीहिशालेर्ढक् । ३ । ४ । १२८ । व्रैहेयम् । शालेयम् । तदस्य संजातं तारकादिभ्य इतः । ३ । ४ । १५८ । तारकितं नभः । प्रमाणे द्वयसज्दघ्नञ् मात्रचः । ४ । १५९ । ऊरुप्रमाणमस्य ऊरुद्वयसम् । ऊरुदघ्नम् । ऊरुमात्रम् । यत्तदेतेभ्यः (१)परिमाणे वतुः । ३ । ४ । १६१ । आ सर्वनाम्नः । ४ । ३ । १७१ । सर्वनाम्न आकारान्तादेशो भवति दृग्दृशवतुषु परतः । यत्परिमाणस्य यावान् । तावान् । एतावान् । संख्याया अवयवे तयप् । ३ । ४ । १६५ । दशावयवा अस्य दशतयो धर्मः । सप्ततयीनयवृत्तिः । द्वित्रिभ्यां या । ३ । ४ । १६६ । आभ्यां परस्य तयस्यायोवा स्यात् । द्वयम् । द्वितीयम् ॥ इत्यादि । उभात् त्वम् । ३ । ४ । १६६ । उभावयवावस्य—उभयो मणिः । तस्य पूरणे डट् । ४ । १ । १ । एकादशानां पूरण एकादशो जिनः नोऽसमट् । ४ । १ । २ । नान्तायाः संख्याया असे मट् । पञ्चानां पूरणः पञ्चमः । षट्कतिपयचतुरां थुक् । ४ । १ । ३ । एषांडति थुगागमः । षण्णां पूरणः षष्ठः । कतिथः । अर्थवशादिबन्तत्वेन डटो विपरिणामः । ] अत एव डट् । कतिपयथः । चतुर्थः । द्वेस्तीयः । ४ । १ । ६ । डटोऽ-

(१) आयामस्तुप्रमाणं स्यात्परिमाणं तुसर्वतः इतिप्रमाण परिमाणयोर्भेदः ।

पश्चाद्ः । द्वितीयः । श्रेस्तृ च । ४ । ७ । चात्तीयः । तृतीयः।

(१) **पूर्वादिनिः** ।४।१।१०। पूर्वंभुक्तमनेन पूर्वी ओदनः। **सपूर्वात्** । ४ । १ । २१ । भुक्तपूर्वी । **इष्टादेः** । ४ । १ । २२ । इष्टमनेन इष्टी । गणिती अङ्कषु ।

## अथ मत्वर्थीयाः ।

**त(२)दस्यास्त्यस्मिन्निति मतुः** । ४ । १ ।२३ । गावोऽस्यास्मिन्वा सन्ति गोमान् । **मत्वर्थेस्तौ** । १ । २ । १०७ । मत्वर्थेऽये परतः सान्तं तान्तं च भसंज्ञं भवति । **वसोर्जिः** । ४ । ४ । ११८ । वस्वन्त स्यभस्यजिः स्यात् । विदुष्मान् । गुणवचनेभ्योमत्वर्थीयस्योप् । शुक्लो गुणोऽस्यास्ति शुक्लः पटः । कृष्णः । **प्राण्यङ्गादातो लः** । ४ । १ । २४ । प्राण्यवयववाचकादादन्तान्मत्वर्थेवालो भवति । पदी मनुष्य । जटालः । जटावान् ।प्राणिन एव । नेह शिखावान् दीपः । **लोमपामादिभ्यां शनौ** । ४ । १ । २७ । लोमादेः

---

(१) क्रियाविशेषणादस्मादनेनेत्यर्थे इनिः स्यादितिसूत्रार्थं । अनेनेतिकर्तृत्वंक्रियांविनान संभवतीतियां कांचन कियामादायत्यविधिर्भवति ।

(२) भूमनिन्दाप्रशंसासुनित्ययोगेतिशायने । संसर्गेऽस्तिविवक्षायां भवन्तिमतुबादयः। भूम्नि। गोमान्। निन्दायां। काकतालुकी । प्रशंसायां रूपवान्। नित्ययोगे क्षीरिणो वृक्षाः। अतिशायने उद रिणीकन्या । संसर्गे दण्डी ।

शःपामादेर्नश्चभवति । वाग्रहणान्मतुश्च । लोमशः । लोमवान् । रोमशः रोमवान् । पामनः । अङ्गात् कल्याणे (गा०) अंगना । लक्ष्म्या अच्च (ग०) लक्ष्मणः । पिच्छादेश्च इलो भवति (ग०) पिच्छिलः । पिच्छवान् । **केशाद्वोऽन्यतरस्याम्** । ४ । १ । २५ । के(१)शवः । केशवान् । केशिकः । केशी । ( मणिप्रभृतिभ्यो वः ) मणिवः । अर्णसः सं च । अर्णवः । **ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः** ... **ज्योत्स्नातमिस्राशृङ्गिणोजस्विन्नुर्जस्वलवत्सलांसलदन्तुर हस्तिन् गोमिन् स्वामिन् वर्णिन् मलिनमलीमसाः** । ४ । १ । ४० । निपात्यन्ते । ज्योत्स्ना । इत्यादि । (२)**ठन्नावतः** । ४ । १ । ४१ । दण्डी । दण्डिकः । **व्रीह्यादेः** । ४ । १ । ४२ । व्रीही । व्रीहिकः । **विन्नस्मायामेधास्रजः** । ४ । १ । ४७ । मायावी, मेधावी, स्रग्वी । **वाचो(३)ग्मिन्** । ४ । १ ४८ । वाग्मी ।

(१) पक्षेमत्विनिठनः ।

(२) एकाक्षरान्नभवति । लक्ष्यानुरो धात् । अत एव 'स्ववान्' इति सिद्धम् । एवंकृदन्तादपिन भवति । कारकवान् । एवं जातिवाचकशब्दादपिन भवति । वृक्षवान् ।

(३) यद्यपिग्मिन्नित्येवकृतेजश्त्वेन गस्त्वंसिद्धति । ननुकादेशापत्तिरितिचेन्न । व्यवस्थितविभाषाश्रयणात् । नच गोभारणोव्यर्थमितिवाच्यम् । अर्थान्त रसूचनायतस्यावश्यकत्वात् । तेनयोग्दिसम्यक् बहुभाषतेवाग्मीसः–इत्यपिसिद्धम् ।

अर्शआदेरः । ४ । १ । ५० । अर्शोऽस्यविद्यते—अर्शसः । ऊर्गहंशुभंभ्यश्चयुस् । ४ । १ । ६२ । अहंयुः । अहङ्कारवान् । शुभंयुः । शुभान्वितः । इति मत्वर्थीयाः ॥

## अथ स्वार्थिकाः ।

किं बहुसर्वनाम्नोऽद्वयादेः । ४ । १ । ६८ । किमो बहुशब्दात् सर्वनाम्नश्च द्व्यादिवर्जिताद्वक्ष्यमाणास्त्या भवन्ति । अधिकारोऽयं ते विभक्त्य इत्यतः प्राक् । कायास्तस् । ४ । १ । ७३ । कान्तात्किमादेस्तस् भवति । बहुभ्यो बहुतः । यतः । अतः । इतः । कुकौतऽथोः । ५ । १ । १६३ । किमः कुआदेशो भवति तकारादौत्ये अकारे तु । क्व । कुतः । इदमइश् । ४ । १ । ६९ । इदम इशदेशो भवति तसादिषु परतः । इतः । अश् । ४ । १ । ७२ । एतदोऽश् भवति तसादौत्ये । अतः । पर्यभिभ्यां । ४ । १ । ७५ । आभ्यांतस् भवति । परितः । अभितः । ( यथासंख्यं सर्वोभयार्थे एवेष्यते ) सर्वतः । उभयत इत्यर्थः । ईपत्रः । ४ । १ । ७६ । कुत्र । यत्र तत्र । बहुत्र । इदमोहः । ४ । १ । ७७ । त्रापवादः । इह । किमोऽः । ४ । १ । ७८ । ईबन्तात्किमः अत्यो भवति । क्व । कुत्र । इतरथन्तेऽन्यतोऽपि । ४ । १ । ७९ । कामीपं चविहायान्यविभक्त्यन्तेभ्योपि किमादिभ्योदृश्यन्ते तसादयः । सतोभवान् । तत्र भवान् । सभवान् । एवदीर्घायुः । देवाना-

त्रिप्रयः । आयुष्मान् । दैकान्यकिंयत्तदः काले । ४ । १ । ८० । ईप्समर्थेभ्यः कालार्थेभ्यः स्वार्थे दाप्रत्यात् । सर्वस्यसोवादि । ४ । १ । ८१ । सर्वस्मिन् काले सदा । सर्वदा । अन्यदा । कदा । यदा । तदा । काले किम् । सर्वप्रदेशे इदमोर्हिः । ४ । १ । ८२ । ईवन्तादिदमः कालेर्हित्यो भवति । ( एतेतौ थौरिति एतादेशः ) अस्मिन् काले एतर्हि । अकाले तु । इहदेशे । धाऽनद्यतनेर्हिः । ४ । १ । ८३ । कर्हि कदा । तर्हि । तदा । यर्हि । यदा । प्रकारेथा । ४ । १ । ८९ । प्रकारे वर्तमानात्सर्वविभक्त्यन्तादङ्यादेः किमादेस्थात्यो भवति । तेनप्रकारेण तथा । किमिदंभ्यांथम् । ४ । १ । ९० । थाप्रवादोयम् । केन प्रकारेणकथम् ( एतेतौ-थौः ) इत्थम् ।

तमेप्राव(१)ऽतिशायने । ४ । १ । ११४ । अतिशायमांविशिष्टेऽर्थे वर्तमानन्मुरः स्वार्थे तमेप्रौत्यौ भवतः । अयमेषामतिशयेनाढ्यः—आढ्यतमः । लघुतमः । लघिष्ठः । त्रिङः । ४ । १ । ११५ । त्रिङन्तादतिशायेऽर्थे द्योत्ये मृदस्तमोभवति । तादौ ङ्मः । ४ । १ । ११७ । अतिशायनेऽर्थे वक्ष्यारस्याख्येषु तादीह्नौतरतमौ ङ्मसंज्ञो भवतः । किमेत्रिङ ङ्मादामऽद्रव्ये । ४ । २ । २० । किम एकारान्तात्त्रिङो ङ्मसंज्ञाच्च परो यो ङ्मसंज्ञस्त्यस्तद-

(१) अतिशयनमेवातिशायनम् । तच्चगुणक्रियागतमेवगृह्यते ।

न्तान्मुप् आमिति स्यो भवति । किं तमाम् । पचतितमाम् । पूर्वाह्णतमाम् । उच्चैस्तमाम । द्विविभज्ये तरेयसू । ४ । १ । ११६ । द्व्यर्थे विभक्तव्ये प्रयुक्ते सतिङ्न्तान्मृदोमिजन्मतर इयसु इत्येतौ त्यौभवतोऽतिशये । पूर्वयोरपवादः । अयमनयोरतिशयेन लघुः लघुतरो लघीयान् । ब्रदीव्याः प्राच्येभ्यः पटुतराः पटीयांसः । प्रशस्यस्य श्रः । ४ । १ । ११९ । प्रशस्य शब्दस्य श्रादेशो भवतीष्ठयसोः परतः । नैकाचः । ४ । ४ । १५२ । एकाचो भस्य यदुक्तं तन्न भवतीष्ठयसोः । श्रेष्ठः । श्रेयान् । ज्यः । ४ । १ । १२० । प्रशस्यस्य ज्यादेशोऽपि भवतीष्ठयसोः । ज्येष्ठः ॥ ज्यादीयसः । ४ । ४ । १५० । ज्यादेशात्परस्येयस आकारोदेशो भवति । परस्यादेः । ज्यायान् । बहोर्भ्वंस्मात् खं । ४ । २ । १४० । बहोर्भू इत्यादेशो भवतिस्त चास्मात्र परयोरिष्ठयसोः । भूयान् । यिट् चेष्ठस्य । ४ । ४ । १४९ । बहोर्भ्वादेशात्परस्येष्ठकारस्य खं प्राप्ते यिडागमो भवति । भूयिष्ठः । विन्मतोरुप् । ४ । १ । १२४ । एतयोर्भवतीष्ठयसोः परतः । अतिशयेन त्वग्वान्–त्वचिष्ठ, त्वचीयान् । आसिद्धौ देश्यदेशीय कल्पाः । ४ । १ । १२६ । ईषदूनो विद्वान् विद्वत्कल्पः । विद्वद्देश्यः । विद्वद्देशीयः । पचतिकल्पम ।

वा सुपो बहुः प्राक् तु । ४ । १ । १२७ । आसिद्धौ सुबन्ताद्बहुर्त्यो वा भवति, स च प्रागेव इष्टान्तेसुबन्तात् । ईषदूनः पटुः बहुपटुः । पटुकल्पः । सुपः किम्–पचतिकल्पम् ।

एवास्य कः । ४ । १ । १२९ । इवे प्रतिकृतौ क इति वक्ष्यति । इवात्प्राक् कोऽधिक्रियते । प्रि सर्वनाम्नोऽकच् प्राक्टेः कोदः । ४ । १ । १३० । सेः सर्वनाम्नो भिन्नाञ्जन्ताच्च टेः प्रागऽकच्यो भवति ककारश्चैतस्य च दः प्रागिवादर्थेषु । कुत्सायाम् । ४ । १ । १३१ । कुत्सितोऽश्वोऽश्वकः उच्चकैः । नीचकैः । सर्वकैः । युष्मकाभिः । युष्मकयोः । त्वयका । किंयत्तदो निर्धारणे द्वयोरेकस्य डतरः । ४ । १ । १४७ । अनयोः कतरो देवदत्तः । यतरः ततरः । वा बहूनां जातिपरिप्रश्ने डतमः । ४ । १ । १४८ । जातिविषये प्रश्नविषये च किमो डतमस्था भवति । कतमो भवतां कठः । यतमः । ततमः । 'वा वचनमुत्सर्गस्याकः प्राप्णार्थम्' यकः । सकः ।

इवे प्रतिकृतौ कः । ४ । १ । १५० । अश्व इव प्रतिकृतिरश्वकः । तत्प्रकृतास्यौ मयट् । ४ । २ । २८ । प्रकर्षेण कृतं प्रकृतं । तदर्थेवृत्तेःसमर्थान्मयड् भवति । आद्यं प्रकृतमन्नमन्नमयम् । दधिमयम् । अधिकरणे तु घृतमयी पूजा । प्रज्ञादेः । ४ । २ । ४४ । अण् स्यात् । प्रज्ञ एव प्राज्ञः । प्राज्ञी स्त्री । दैवतः । बान्धवः । आकृतिगणोऽयं । बह्वल्पार्थाच्छस्कारकाद्वा । ४ । २ । ४७ । बहूनि ददातीति बहुशः । अल्पशः । [ आद्यादिभ्यस्तसेरुपसंख्यानम् ] आद्यैः आदितः । मध्यतः । अन्ततः । पार्श्वतः । आकृति गणोयं ।

कृभ्वस्तियोगेऽतत्त्वे संपत्तरि च्विः । ४ । २ । ५५ ।

कर्तरि ( अतत्त्वे ) वर्तमानात्सुबन्ताच् च्विर्वा भवति। अशुक्लं शुक्लं करोतीति शुक्लशब्दाच् च्वौलति। अस्य च्वौ। ५। २। १४१। अवर्णस्य ईर्भवति च्वौ। शुक्ली भवति। शुक्ली स्यात्। ( ञः स्वार्थत्वं निवाच्यम् ) दोषाभूतमहः। दिवाभूता रात्रिः। साद्वा कार्त्स्न्ये। ४। २। ५७। च्विविषये सातिर्वा भवति कार्त्स्न्ये। सात्। ५। ४। ७७। सातः सस्य षोन स्यात्। अनग्निकृत्स्नमग्निं करोति अग्निसात्करोति। अग्निसाद्भवति। अग्निसात् स्यात्। च्वौ। ५। २। १३५। अजन्तस्य गो दीर्भवति च्वौ। अग्नी भवति। अव्यक्तानुकरणादनेकाचोऽनितौ डाच्। ४। २। ६१। अव्यक्तवर्णं (ध्वन्य) नुकरणवाचकादनेकाचो मृदोऽनितौ परतो डाज्भवति कृभ्वस्तियोगे। ( डाचीति विशेषनिर्देशात् प्राग्एव टिखात् द्वित्वमुक्तं ड्वौ डाचिनित्यमिति पूर्वतकारस्य पररूपत्वं च। पटपटा करोति। अव्यक्तानुकरणात् किम्? ईषत्करोति। अनेकाचः किम्? खात्करोति। अनितौ किम्? पटिति करोति। इति स्वार्थिकाः।

## अथ स्त्रियाः।

स्त्रियां। ३। १। ३। अधिकारोऽयं। अजाद्यतष्टाप्। ३। १। ४। अजादिभ्योऽकारान्तेभ्यश्चमृद्भ्यः (१)स्त्रियां

---

( १ ) स्त्रियां किम्। अजः

वर्तमानेभ्यष्टाप् भवति । अजा, एडका । अश्वा । चटका । मूषिका । बाला । वत्सा । होढा । मन्दा विलाता । गङ्गा । सर्वा । उगिदृन्नान्ङीः । ३ । १ । ६ । उगिदन्तेभ्य ऋकारान्तेभ्यो, नकारान्तेभ्यश्च मृद्भ्यः स्त्रियां वर्तमानेभ्यो ङीभवति । भवन्ती । पचन्ती । दीव्यन्ती । प्राची । प्रतीची । कर्त्री । हर्त्री । दण्डिनी ब्राह्मणी । (१)टिड्ढाणञ्ठण्ठञ्-क्वरपः । ३ । १ । १८ । अन्यग् पढ्ढादि तदन्तात् स्त्रियां ङीभवति । मद्रचरी । कुरुचरी आढ्यङ्करणी ऊरुद्वयसी ऊरुमात्री (३)सौपर्णेयी । अण्-कुम्भकारी । अञ्-औत्सी । ठण्-लाक्षिकी ठञ्, पारायणिकी । क्वरप्-इत्वरी । यञ् । ३ । १ । १९ । यञन्तान्मृदो ङी भवति स्त्रियां । हलो ह्यो ङ्याम् । ४ । ४ । १३८ । हल उत्तरस्य ह्यकारस्योङः खं भवति ङ्यां परतः । गार्गी । फद् । ३ । १ । २० । यञन्तमृदः फद् भवति स्त्रियां । गौरादेः । ३ । १ । २३ । गौरादिभ्यो ङी भवति स्त्रियाम् । गौरी अनडुही । अनड्वाही ( ङित्व सामर्थ्यादमृत्वेऽपि ङीः ) भार्ग्यायणी । गौरादिराकृतिगणः । (२)वयस्यनन्त्ये । ३ । १ । २४ । अनन्त्ये वयसि वर्तमानादकारान्तान्मृदो ङी भवति स्त्रियां । कुमारी । रात् । ३ ।

---

( १ ) ननु पचमानेत्यादौ ङीत्यादिरितिचेन्न । ऊदो ह्यनुबन्धकत्वात् ।

( २ ) अदन्तात् किम् । शिशुः । कन्या वयो वाचित्वमिह विवक्षितम् । नेह । उत्तानशया । लोहितपादिका ।

१ । २५ । संख्यकादकारान्तान्मृदो ङी भवति । अष्टसहस्री । त्रिलोकी । अजादिभ्योऽत्र, त्रिफला । वर्णादुदहुलं तो नस्तु । ३ । १ । ३६ । वर्णवाचिनोऽदन्तान्मृदो बहुलं ङी भवति स्त्रियां, ङीपक्षे तस्य च नादेशः । एनी । एता । रोहिता । रोहिणी । गुणोक्तेरुतोऽखरुस्फोरुङः । ३ । १ । ३० । गुणोक्तेरुकारान्तान्मृदः स्त्रियां वा ङी भवति खरुशब्दं स्फोरुं च वर्जयित्वा, पट्वी, पटुः । बह्वादेः । ३ । १ । ३१ । बह्वादिभ्यो मृद्भ्यो वा ङी भवति स्त्रियाम् । बह्वी । बहुः । कृदिकारादक्तेः ( ग० ) भूमिः । भूमी । ( अक्त्यर्थादित्येके ) शकटी । शकटिः । (१)पुंयोगात्स्त्रीगोपालकादेः । ३ । १ । ३७ । यः पुंविषयः शब्दः पुंयोगाद्धेतोः स्त्रियां वर्तते तस्मादकारान्ताद् ङीर्भवति गोपालकप्रकारान् वर्जयित्वा । उपाध्यायस्य स्त्री उपाध्यायी । अगोपालकादेरिति किम् । गोपालिका । अश्वपालिका । आदिशब्दः प्रकारवाची । तेन सूर्याद्देवतायां ङीर्न । सूर्यस्य भार्या सूर्या । देवतायां किम् । सूर्यो नाम कश्चित्तस्य स्त्रीत्यर्थे ङीत्वे । सूर्यागस्त्ययोश्छे च । ४ । ४ । १३६ । अनयोरुङो यस्य खं भवति छे ङ्यां च परतः । सूरी । मानुषीयम् । स्यस्थेक्यापादेतोऽसुपोऽयसदौ । ५ । ३ । ५० । स्यस्थककारात्पूर्वस्याकारस्यैकारादेशो भवत्य-

( १ ) योगः सम्बन्धः । सोऽत्र दम्पतीभाव एवाभिमतः । किन्तु जन्यजनकभावो विगृहीतः संकोचे मानाभावात् ।

सुप्प्रकापिपरतः यत्र सौवर्जयित्वा । सार्विका । कारिका । रथस्येति किम् । शक्नोतीतिशाका । अतः किम् । नौका । असुपः किम् । बहुपरिव्राजकानगरी । **वरुणभवशर्वरुद्रेन्द्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् । ३ । १ । ४२ ।** एषामानुगागमोऽन्तेऽस्य भवति । वरुणस्यस्त्री वरुणानी । एवं भवानीत्यादि हिमारण्ययोर्महत्त्वे । महद्धिमं हिमानी । महदरण्यमरण्यानी । यवाद्दोषे । दुष्टोयवो यवानी । यवनाल्लिप्याम् । यवनानां लिपिर्यवनानी । उपाध्यायमातुलाभ्यां वानुक् । उपाध्यायानी । उपाध्यायी । मातुलानी । मातुली । आचार्यादणत्वम् । आचार्यस्य स्त्री आचार्यानी । अर्यक्षत्रियाभ्यां पुंयोगेवेतिवक्तव्यम् । अर्याणी अर्या । क्षत्रियाणी । क्षत्रिया । **क्रीतात्करणादेः । ३ । १ । ४३ ।** क्रीतान्तात्करणादेरदन्तान्मृडो ङी भवति स्त्रियां । वस्त्रक्रीति । करणादेरिति किम् सुक्रीता । **स्वाङ्गान्नीचोऽस्फोडः । ३ । १ । ४७ ।** स्वाङ्गं न्यगस्फोड यत्तदन्तान्मृदो वा ङी भवति स्त्रियां । दीर्घकेशी, दीर्घकेशा । चन्द्रमुखी, चन्द्रमुखा । अस्फोड इति किम् ? कल्याणगुल्फा । न्यग्ग्रहणं किम् ? शिखा **नक्रोडादिबह्वचः ३ । १ । ४९ ।** क्रोडाद्यन्ताद्बह्वचः स्वाङ्गान्ताच्च मृदो ङी न भवति । कल्याणक्रोडा । आकृतिगणोऽयं । महाललाटा । **नखमुखात्स्वौ । ३ । १ । ५१ ।** नखमुखान्तान्मृदः खुविषये ङी न भवती । "पूर्वपदात्स्वौ" इति णः । चन्द्रणखा कालमुखा । स्वौ किम्—शूर्पनखी, ताम्र-

मुखी कन्या। जातेरयोङः ३।१।५३। (१)जातिवाचिनोऽयकारोङोऽदन्तान्मृशो ङी भवति स्त्रियां। आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥४॥ तटी, वृषली। कठी। बहवृची। जातेः किम्। मुण्डा। अयोङः किम्? आर्या। इतोऽमनुष्यजातेः ३।१।५५। ङीर्भवति। दाक्षी। ऊङुतः ३।१।५६। ऊकारान्तान्मनुष्यजातिवाचिनोऽयोङो मृदङूर्भवति स्त्रियां। कुरूः। अयोङः किम्—अध्वर्युं ब्राह्मणी। पङ्गोः ३।१।५७। पङ्गूः। (श्वशुरस्योकाराकारयो खञ्च) श्वश्रूः उरूपमानैरिवे ३।१।५८। ऊरुशब्दो धुयंस्य तस्मान्मृशः स्त्रियामूर्भवति इवार्थे गम्ये। करभोरूः। संहितशफलक्षणवामादेः ३।१।५९। संहितादिभ्यः ऊरुभ्यो मृदङूर्भवति स्त्रियां। संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः। (२)यूनस्तिः ३।१।६२। अनीचो युवनित्येतस्मात्ति र्भवति स्त्रियाम्। युवतिः॥ इति स्त्रीत्वं॥

शास्त्रान्तरे प्रविष्टानां बलानां चोपकारिका॥ कृता राजकुमारेण लघुजैनेन्द्रवृत्तिका।

इति श्रीराजकुमारकृता लघुजैनेन्द्रवृत्तिः समाप्ता।

समाप्तोऽयं ग्रन्थः॥

(१) जातिवाचिन इति किम्। मुण्डा।
(२) ङीत्यस्यापवादोऽयम्।

# शुद्धाशुद्धपत्रिका।

| अशुद्ध पाठः। | शुद्ध पाठः। | पृष्ठम्। | पङ्क्तिः। |
|---|---|---|---|
| अन्त्येनैतान्दि। | अन्त्येनैताऽऽदिः। | २ | १२ |
| प्रानसान्ति। | प्रोनास्ति। | ३ | १० |
| स्त्रानसान्ति। | स्त्रंनास्ति। | ३ | १४ |
| विवृतभेदात्। | संवृतभेदात्। | ३ | १९ |
| अज्भि। | अज्भिः। | ४ | १८ |
| यस्ना त्स। | यस्मा त्स। | ४ | २२ |
| रित्यत्रै न। | रित्यत्रैव्न। | ४ | २३ |
| चतुर्मात्रोन। | त्रिमात्रोन। | ४ | २३ |
| विदित। | विहित। | ५ | १५ |
| यण। | यण्। | ५ | २१ |
| ङादेशो। | ऽयङादेशो। | १० | ४ |
| रनङादेशो। | रचङादेशो। | १० | ६ |
| शकारच्चवर्गौ। | शकारश्चवर्गौ। | १२ | ३ |
| चिनति। | चिनोति। | १२ | ४ |
| त र नि। | त र ति। | १२ | १३ |
| पठन्ति। | पठन्ति। | १४ | ५ |

| अशुद्ध पाठः । | शुद्ध पाठः । | पृष्ठम् । | पङ्क्तिः । |
|---|---|---|---|
| नश्छद्व्यप्रशान् । | नश्छव्यप्रशान् । | १६ | ४ |
| ङितिप्रश्चा । | ङितिप्रश्च । | २९ | ४ |
| स्थाचिग् । | स्थाघ्वि । | ३२ | २२ |
| आग्निमड्ड । | अग्निमड्ड । | ४१ | १६ |
| ध्रीचः । | सध्रीचः । | ४२ | ३ |
| सय्ध्रङ् । | सध्र्यङ् । | ४२ | ४ |
| सम्यग्भ्यम् । | सम्यग्भ्याम् । | ४२ | ५ |
| सि | श्चि | ४३ | १४ |
| लेट् । | लट् । | ४८ | ५ |
| कर्मणिभ्र । | कर्मणिच । | ४८ | ६ |
| यात् | स्यात् । | ४८ | ९ |
| सामर्थ्याल्लस्थ । | सामर्थ्याल्लस्य । | ४८ | १० |
| जस्वरितेतः । | अस्वरितेतः । | ४८ | १५ |
| क्ङिति । | किति । | ६२ | ५ |
| इक्स्याल्लिङि । | जिःस्याल्लिङि । | ६६ | ४ |
| पऽनक्षे । | पथोऽनक्षे । | १४० | ११ |
| पुरोसिता । | पुरोहिता । | १५६ | १४ |